R S V L
00990

178/ XXIV
990

Registered No. M 2300.

Book XXIV ॥ श्रीः ॥ Nos. 1, 2, 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥



| | | | |
|---|---|---|---|
| पु. २४ कलि | ५०५१ विकृति | कन्या वृश्चिक तुला धनुः | साधारण सं १, ३ शास्त्रानुबन्ध सं २, ४ आहत्य सं ४ |



# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

September, October, November & December } 1950

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणपत्रिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणपत्रिकाः षट्सु मासेषु अनुबन्धपत्रिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यापत्रिकाप्रभृत्येव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । ३३३—३४०

1 मेनका ।
2 व्याजोक्तिरत्नावली ।
3 वेदः ।
4 संस्कृताभिवृद्धिः ।
5 संस्कृतग्रन्थजातम् ।
6 अजामिलोपाख्यानम् ।
7 रोदसीव्याप्तकीर्तिः ।
8 शिरिय तिरुमडल्दिव्यप्रबन्धः ।
9 यथाभिमतम् ।
10 काव्यपुरुषोत्पत्तिः ।
11 लोकवार्ता ।
12 प्रकृतिभेदः ।
13 पुस्तकपरामर्शः । [wrapper in the

मदीया मेनका पुनर्भूलोकमागत्य मामाश्वासयेच्चेत् इदं मे व्यसनं शाम्येत्, न प्रकारान्तरेण । दयया विवाहवार्तां न सम्प्रति भाषस्व । मनो मे परिभ्राम्यति ।" इति तामनुननाथ।

तदीया तदानीन्तनी स्थितिः शिलामपि विद्रावयितुं क्षमा अतिपरितापकारिणी बभूव । तदीयाः करुणा वाचः श्रुतवती सा वनिता "आः । मेनकाभाग्यमेव भाग्यम् । इयत्या धृत्या उत्तमेन गुणेन च सम्पन्नान् एकपत्नीव्रतान् भवतः पतित्वेन लब्धवत्या मेनकायास्तुला स ईश्वरोऽपि न भवति, स्वर्गोऽपि न भवति । तस्या अस्मादन्यो ब्रह्मानन्दः कोऽस्ति ? यद्भवद्भिरुच्यते तत्सर्वं साधु, न्याय्यम् । सा चेदद्य जीवन्ती भवेत् तस्यां यं कमपि दोषमनारोपयन्तः ईषदपि जुगुप्सां विना तां गृहिणीत्वेन कच्चित् भवन्तः स्वीकुर्युः ? अथवा यथा रामः सीतां 'अग्नौ निपत' इत्यवोचत् तथा कमप्याक्षेपं किं करिष्यन्ति ?" इत्यब्रवीत् ।

तदाकर्णितवान् वराहस्वामी "अरे रे ! जीवन्त्यास्तस्या दर्शनभाग्यं इतःपरं किं मे भविष्यति ? जीवन्तीमेव हि तामादाय अर्पितवानस्मि । किं प्रतिग्रहीष्यामीति सन्देहोऽपि नु कर्तव्यः । सा परं प्रत्यागमिष्यति चेत् कुलदैवमिति कृत्वा हि तां प्रणमेयम् । निर्मलार्धाधिकदशवर्णसुवर्णभूतां मदीयां मेनकां अस्मिन् जन्मनि इतः परं किमहं द्रक्ष्यामि" इति अपारेण औत्सुक्येन शोकेन च पीडितो जगाद । तदाकर्णितवती सा मुग्धा प्रहृष्टा स्मितं कृत्वा 'तथा चेत् मेनकां प्रतीच्छत । साऽस्मिन् श्वेतस्त्रीकञ्चुके निलीना वर्तते । एतदवधि यमलोके साऽवर्तत । अद्य स्वर्गलोकमागता ।' इति वदन्ती तावत्पर्यन्तमनपनीतं श्वेतशिरस्त्राणमपनीय अधो निधाय सानुरागं तमुपससर्प । तस्या वाचमाकर्ण्य जातदिग्भ्रमो वराहस्वामी तस्या मुखं निर्वर्णयामास । तस्याः शिरसि केशाः श्वेतस्त्रीणामिव बहुधा वेणीकृता आसन् । मुखे धवलचूर्णः लिप्त आसीत् । चिरात् यदा यदा तस्या ध्वनिमशृणोत् तदा तदा परिचितपूर्वः स ध्वनिरिति काचन मतिस्तस्य मनसि जायमानैव आसीत् । तस्या ध्वनिः मेनकाध्वनिसदृश इति तदा तदा तस्य प्रतिभानमभूत् । अद्य स्वयं मेनकेति तदुक्तिसमनन्तरं तस्या ध्वनिरेव तत् असन्दिग्धं निश्चाययामास । बहुविधानां केशवेणीनां उपरि लिप्तस्य पिष्टस्यान्तश्च निलीय अन्यथाभूतदर्शनायाः स्वगृहिण्या

सुखं सपदि उपलभते स्म। तस्य तदानीन्तनीं दशां वर्णयितुं कः शक्तः? आपादचूडं रोमाञ्च उदभूत्। आनन्दः प्रससार। आत्मानं विस्मृत्य उत्प्लुत्याभिपत्य तामपाकृष्य खट्वायामुपवेश्य सकौतुकमाश्लिष्य चुम्बितं कृत्वा 'मेनके, मम नेत्रायिते, मन्निमित्तं कियतः क्लेशस्य भाजनीभूताऽसि? आः! कः कालः, को वेषः? इति तस्मिन् ब्रुवाणे अपारेण सुखेन दुःखेन च समाक्रान्तायां तस्यां उत्कम्प्योत्कम्प्य रुदत्यां च उभौ विस्मृतात्मानौ मुक्तकण्ठं भाषितुमशक्नुवन्तौ मूकवत् तस्मिन्नालिङ्गन एव निबद्धौ सन्तौ निश्चलौ आनन्दवारिधौ न्यमज्जताम्।

सा चानवद्या स च निष्कलङ्कः एकात्मतां देहयुगस्य यातौ।
नौकाविभङ्गे शयनाद्वियुक्तौ समागतौ चेत् किमु भाषणेन॥

इत्युक्तरीत्या किं ताभ्यां भाषितव्यम्? उभावपि मनसि उज्जृम्भिते परिवाहिणि अनुरागस्रोतसि निखातनिलीनौ अर्धनाडीं यावत् तथैव दृषद्भूताववर्तेताम्।

तस्मिन् समये तदधिष्ठितस्य अन्तर्गृहस्य बहिः किमपि महानाक्रोश उदभवत्। पेरुन्देव्यम्बा अतिक्रुद्धा केनापि उच्चैर्भाषित्वा कलहायत इत्यभात। क्रमेण स आक्रोशः प्रवृद्धः तदध्युषितस्यान्तर्गृहस्य समीपमागच्छतीति अदृश्यत। तस्मिन्नाक्रोशे कनकाम्बाध्वनिरपि प्रादुरभवत्।

तदानीं पेरुन्देवी "अयि कनकि, यदि ते अस्ति मानः किन्नु मद्गृहस्यान्तः पदं निदध्याः? किमपि करिष्यामीति भर्त्सयित्वा हि त्वमगच्छः। किमयि अकार्षीः? ननु ते पौत्री नाटककारवटुना अधावत्। तस्याः नाटककारस्य च किल अपत्यमजनि। तव प्रपौत्रस्य जातकर्मनामकरणादि कारयितुं याहि। इतःपरं किमयि ते इह कार्यम्? जामातरं यदि त्वं न पश्यसि न स मरिष्यति। याहि बहिः। वयं 'निश्चयताम्बूलं' करिष्यामः। किमिति मुण्डरण्डा त्वं दुर्निमित्ततया तिरः प्रादुर्भवसि? सम्मार्जनीं तावदाददे।" इत्यगर्जत्। तदाकर्णितवती कनकाम्बा क्षमया "पेरुन्देव्यम्ब, यावत् तावदपि त्वमस्मान् निन्द। कन्यादाननिमित्तं एषां सम्मानानां लाभोऽस्माकमावश्यक एव। अन्ततः अस्मज्जामातरं सकृद् दृष्ट्वा प्रयास्यामः। स मृत्वा अजीवदिति वैद्यशालायां अश्रौष्म।

दृष्ट्वा गच्छेमेत्यागमाम । दृष्ट्वा सद्य एव गता भविष्यामः।" इति ससान्त्वमुत्तरमदात्।

तावति श्यामार्यः "पेरुन्देव्यम्ब, नवीनसम्बन्धिनां पुरतः न युद्धं कर्तव्यम्। जामातरं दृष्ट्वा गच्छन्तु नाम इमे। तेन का ते हानिः?" इत्याह स्म।

तदाकर्णितवती पेरुन्देवी, "साधु। तथा चेत् दृष्ट्वा याहि। अयि। अयमास्ते। अपि तु तेन सह भाषणं यदि करिष्यसि, पश्य। शिरो मुण्डयित्वा गर्दभमारोप्य निष्कासयेयम्।" इति ब्रुवाणा वराहस्वामिवासगृहस्य कवाटं पठेर्" इत्युदघाटयत्।

तदात्व एव स्वप्रज्ञां प्रतिलब्धवन्तौ वराहस्वामी मेनका च सम्भ्रान्तौ संश्लेषं शिथिलयामासतुः। सपदि मेनका खट्वातस्त्वरितमुत्थिता स्वकीयमुष्णीषमादाय शिरसि निधाय लज्जिता सङ्कुचिता च क्वापि कोणे अपासरत्। गृहस्य द्वारदारुणि पेरुन्देव्यम्बा, कोमला, श्यामार्यः, कनकाम्बा, स्वर्णाम्बा, किट्टुः, वरदाचार्यः अथ एतदीया बन्धवः सम्प्राप्ताः स्त्रियः पुमांसश्च इतीमे सर्वे अवर्तन्त। रुग्णं वराहस्वामिनं धात्रीं हूणीं च परस्परमालिङ्गय स्थितौ दृष्ट्वा ते सर्वे तथैव विभ्रान्ताः दृषद्भूता अतिष्ठन्। पेरुन्देवीकोमलयोः उभयोः हूणीं धात्रीं प्रति रौद्राकारः कोपोऽजायत। ते उभे कुपिते इव व्याघ्र्यौ मेनकामभिनिष्पेततुः। पेरुन्देवी 'अयि चण्डालि, बीजबन्धान्तर्मूषिकवत् त्वमत्र स्थिता नु मदनुजस्य प्राणान् पिबसि। अयि मानहीने शुनि, इदं पश्य तव पादौ गृहीत्वा द्वेधा विदारयामि' इति वदन्ती उग्रं मेनकोपरि पुप्लुवे।

---

## 26 अधिकारः॥

### 'कूकू चोरश्चोरः'

कतिपयानि दिनानि सापायायां स्थितौ स्थितो वराहस्वामी धात्री च यदन्योन्यमालिङ्गय स्थितौ, विपरीतं तत् प्रेक्षणकं प्रेक्षितवत्यौ कनकाम्बा स्वर्णाम्बा च तत् किं पारमार्थिकमेव अथ वा स्वप्नवृत्तमिति समशयाताम्।

यद्यपि स तावन्तं कालं सोदर्योर्दुर्बोधनवशंगतः स्वपत्नीं अतिमात्रं आयासितवान् तथापि व्यभिचारे अभिसन्धिरहितः परिशुद्ध इति निस्सन्दिग्धं ते ज्ञातवत्यौ । तथा निश्चितस्वभावः स मनुष्यः स्वशरीरे अतिदुर्बले सति किन्नु हूणकन्यया सरससल्लापकारी स्यादिति ते भृशं विभ्रान्ते अभवताम् । पेरुन्देवी कोमला च श्वेतकन्यां प्रति अतीव क्रुद्धे तां दण्डयितुं यदगच्छतां तत् न्याय्यमित्येव मत्वा इमे अपि क्रुद्धे तूष्णीं तिष्ठन्त्यावास्ताम् । महापिशाच्याविव धात्र्या उपरि अभिप्लुते सोदर्यौ उभे उच्चैर्गर्जित्वा उच्चावचं निन्दित्वा तां हिंसितुं प्रावर्तेताम् । कोमलया अभिताडितं तस्याः शिरसि स्थितमुष्णीषं अतिदूरं गत्वा निपपात । पेरुन्देवी करमुन्नमय्य धात्र्याः कपोले संघट्टय मृदुना मस्लिन्· वाससा निर्मितं तदीयं श्वेतसमुदाचारसिद्धमाच्छादनं करेण आकृष्य तां पोथयितुं पादमुद्धार ।

तथा तया कृतं क्रूरं कर्म दृष्टवान् वराहस्वामी दुर्निवारेण क्रोधेन सम्भ्रमेण च अयि कोमले, मा स्म तामुपगच्छतम् । तस्याः स्पर्शे हस्तं छिन्द्याम् । मा स्म गच्छतम् । इह आगच्छतम्" इत्युच्चैः अधिक्षिपन् आक्रोशन् शयनादुत्थातुमयतत । सोदर्यौ तु तस्य वाचं कर्णे अकृत्वा धात्रीं उपर्युपरि व्यथयामासतुः । तद् दृष्टवतो वराहस्वामिनः क्रोधावेशः शतगुणो ववृधे । स स्वसोदर्यौ अयथायथं गर्हितुमारभत । "अयि धूर्ते रण्डे, मा स्म तां स्पृशतमिति ब्रवीमि, प्रहरथो नु ताम् ? अयं वां मूर्धानं भिनद्मि, वधपातकिन्यौ । कां तां मन्येथे ? मेनका खलु सा । इतः परं यदि तां स्प्रक्ष्यथः जीवितं वामपहरिष्यामि" इति महता कण्ठेन साधिक्षेपमुवाच । तावत् धात्र्या उपरि स्थितं श्वेतसाम्प्रदायिकमाच्छादनं सर्वं सोदर्यौ विपाटयाम्बभूवतुः ।

तदानीं कूपखनने भूतप्रादुर्भावकथारीत्या श्वेतवेषाभ्यन्तरात् मेनका प्रादुरासीत् । सा यत् स्वकीयं रम्यं पट्टचेलं अन्तर्गात्रे सुसम्पृक्तं निबिडनिबिडं धृतवती तत् चक्षुषोरमात् अद्भुतप्रेक्षणमासीत् । ताभ्यां सोदरीभ्यां परिपीडयमानायास्तस्या मुखात् स्रुतः स्वेदः तत्र लिप्तं पाण्डरचूर्णं अत्यन्तं विलुप्य क्षालयामास । शिरसि वेणीर्विना अन्येभ्योऽवयवेभ्यः सा मेनकैवेति सर्वेषां तद्रूपतया स्पष्टं झटिति प्रतीतिरभूत् । तथा श्वेत-

[स्वीयफलविषये इत्युभयत्राध्याहार्यम् ॥]

Though covered all over with stiff thorns, the Jack fruit full round in shape and sweet within, has been considered deserving of being brought up in gardens. But oh ! jujube tree ! covered as you are with sharp thorns and bearing as you do fruits which are either sour or bitter and filled with worms to boot, how did it happen that you too got a place by the side of the Jack-tree ? 36

शैवालं सह लब्धजन्म सलिले दिष्ट्या विकासश्रियं
प्राप्तं नाद्रियतेऽन्तिके सरसिजं नूत्नानलीन् सेवते ।
वाप्याः पीतसमस्तपाथसि शुचौ किं त्वस्य संशुष्यतः
कस्तावत् समवस्थतामिह वहेन्मध्येऽलिशैवालयोः ॥ ३७ ॥

The moss was born with the lotus in the same pond but when the latter by God's grace blossomed and shone with rare beauty, it did not like the contact of the moss near itself and showed great solicitude for new-comers namely the bees. But which of the two, the bee or the moss will suffer along with the lotus when it withers in the pond the waters of which completely dry up in summer?37

यस्मादप्सरसः सुधा हिमकरः श्रीरित्यभूवञ्जग-
त्प्रह्लादैकरसाः सुपर्वपरिषन्निर्व्याजभाग्योदयाः ।
तस्मादेव पयोनिधेर्यदुदगाद्धालाहलोऽपि स्वयं
प्राणिप्राणहरः किमस्ति गमकं सौजन्यदौर्जन्ययोः ॥ ३८ ॥

From the ocean emerged the delights of the universe the celestial nymphs, nectar, the moon and Lakshmi herself, inaugurating the days of unique goodluck (enjoyment) for the Deva community. But from the same ocean also emerged the Halahala poison fatal to all life. What then is the reliable test to discriminate between goodness and wickedness ? 38

धन्यं जन्म तवैव वारणपते कान्तारसञ्चारिणां
सत्वानां बलशालिनामपि यतो मध्ये नृपैः प्रार्थ्यसे ।
यात्रासूत्सवमङ्गलेषु समितौ पट्टाभिषेकेऽथवा
का शोभा न विभूषितो यदि भवान्नासीरसीमाचरः ॥ ३९ ॥

Oh ! king of elephants ! yours alone is a lucky birth for, of all the mighty beasts roaming in the forests it is you the kings covet to possess. Whether it be in the processions or on the auspicious festivals, or at the battle array or again, during the coronation ceremony, what loveliness is there befitting the occasion if you do not grace the forefront with your majestic person well decked ! 39

अस्त्युद्यन् रजनीमुखे दशदिशो लिम्पन् सुधास्यन्दिभि-
र्नेत्रानन्दकरैः करैरनुपमः श्यामाधव द्योतसे ।
क्षीणे पक्षबलेऽपि भानुमभितो दुर्वारमानग्रहः
पूर्वस्यां दिशि यत्प्ररोहसि बलात्तल्लोकहास्योऽभवः ॥ ४० ॥

It is true, Oh, Lord of Night ! that you shine with unparalleled glory shedding your delightful rays of nectar in all directions when you rise at sunset. But inasmuch as you, with haughty indiscretion persist in rising in the east by the side of the sun when you are shorn of your lustre (reduced to nothing during the waning fortnight) you deservedly become the object of ridicule to the world. 40

पानायेह न वारि पावनमुत स्नानाय पर्याप्तमि-
त्याकुष्टेन जनैस्तथा मघवता वृष्टं सरः सीमनि ।
येनोत्तालचलत्पयोभरपरिक्षुण्णे तटीवन्धने
सारामः सगृहः सगोवृषगणो ग्रामः स एवाप्लुतः ॥ ४१

When Indra was bitterly reproached by the men of the village for not having given them water in the lake good enough for drinking or plenty enough for bathing, sent forth such a huge down pour of rain over the lake that the abundant waters surging up mightily broke the bunds and deluged the village itself with all its groves houses and cattle. 41

निस्तन्द्रोर्मिसमाकुलो जलनिधिर्नद्योऽप्यगम्या भुवि
प्रायेण भ्रमिभिर्महाजवतया भीमाश्च ते निर्झराः ।
मुस्ताशाद्वलपिच्छिलं स्थलमथो गाधं पयः पङ्किलं
त्वत्तः पल्वल, दर्दुरा वयममी नान्यत्र संप्राप्नुमः ॥ ४२ ॥

The ocean has ever an agitated mein on account of its restless billows; the rivers are unapproachable as they are full of eddies ; frightful are the cataracts because of their impetuosity. Oh, pond ! we, frogs, do not enjoy anywhere else than in you a surface wet and cool with grass and roots of weeds and the water muddy and shallow. 42

बद्धा सेतुभिरब्जिनी मलिनतामभ्यागता शैवलै-
र्धत्तां सा नदनिर्झरा इव बहिः स्वैरं परिक्रीडनम् ।
इत्यस्तोककृपाकुलस्य खनतः कुल्यां ततः स्वामिनः
सा रेखामतिलङ्घ्य दिक्षु वितता तूर्णं विशीर्णाऽभवत् ॥ ४३ ॥

'As the lotus pond was enclosed with the bunds, she became dirty with moss. Let her play freely in the open country even as the rivers and the cataracts'. The owner of the lake thus taking pity on her began to dig a narrow channel for her to flow out. But she transgressed the line marked out for her and spread out in every direction and soon lost all shape and form. 43

जृम्भामेष यदङ्गभङ्गविकटव्याधूतपुच्छः करो-
त्येतत्तस्य निसर्गतो मृगपतिर्न त्वां समालोकते ।
स्वैरं याह्यनुयाति नैष विरुवन् हन्तासि लक्ष्यीकृतो
धावन्तं समभिद्रवत्यहह भोः पान्थासि नष्टः क्षणात् ॥ ४४ ॥

He yawns twisting his limbs and flinging up his tail according to his wont; the king of beasts has not espied you. Go your own way; he does not mean to follow you. But alas! attracted by your shreiking in fright he has marked you with his eyes. You flee and he follows you in hot pursuit. What a pity! oh, way-farer! you are lost in a minute!
44

कैङ्कारैर्न विबोधितं जगदुषस्युत्थाय भुक्तं न च
स्वैरं निम्बवनेषु नोपरचितो यत्नात् कुलायोऽथवा ।
लोकः सम्यगुपासितो न बलिभिस्त्वां यावदासेवते
धत्से कोकिल, नः कुतो बलिभुजां सावर्ण्यमात्रं मुधा ॥ ४५ ॥

You never get up early in the morning and awaken the world by crowing hard; you have never eaten from the rows of Margossa trees; you have never laboriously constructed nests to live in. You have never made any persistent efforts to please the world to the extent of making them offer you the ceremonial food; Oh, kokil, in vain do you bear the great distinction of resembling us in complexion.
45

फुल्लं पद्ममुपासते मधुकरा माध्वीलवश्रद्धया
क्लिष्टेऽस्मिन् खलु कुत्र कुत्र चपला दृष्टाः पिबन्तो न ते ।
सौहार्देन गुणेषु हंसपरिषन्निर्व्याजमम्भोजिनी-
सक्ता कालविपर्ययेऽपि विदिता नान्यत्र संमानिनी ॥ ४६ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २३] कलि ५०५१ विकृति { कन्या, वृश्चिक } साधारण सं १, ३
{ तुला, धनुः } शास्त्रानुबन्ध सं २, ४
आहत्य सं ४

## वेदः ॥

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥
उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् ।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ॥
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्ध्यति ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः ॥
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् ।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ॥
सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥
यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् ।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

[मनुः 12, 94-102, 106]

# संस्कृताभिवृद्धिः ॥

(V. Ananthachariar)

बहोः कालादारभ्य विषयोऽयम् अखण्डमिदम् अवनिमण्डलम् अधितस्थुषां प्रेक्षावताम् अधिस्वान्तम् अनेकप्रकाराम् अप्रतीकारां चिन्तासन्ततिम् आतन्वानो दरीदृश्यते ।

इदानीन्तनी हि लोकस्थितिः अस्मत्पूर्वमहत्तरैः महानुभावैः महर्षिभिः प्रहतां प्राक्तनीं पद्धतिं सर्वात्मना परित्यज्य नैसर्गिकीमपि मर्यादां विपरीतं विपरिवर्तयन्ती न केवलं मनुष्यजनतायाः, किन्तु प्राणिमात्रस्य महतीं दुर्दशामावहति ।

सारासारविवेकनिपुणान् विविधासु विद्यासु कृतपरिश्रमान् विपश्चितोऽपि अव्युत्पन्नमतिषु त्रिवेकपदवीवैदेशिकेषु यथाजातेषु भ्रुकुटीभटवृत्तिं परिग्राहयति । महता धनव्ययेन प्रतिष्ठापितासु कलाशालासु अध्ययनाध्यापनरीतिः, छात्राणां स्वोदरपरिपोषणसाधनप्रदर्शनमात्रे विश्राम्यति; दाम्पत्ये स्त्रीपुंसयोः धर्मव्यवस्थां विपरिवर्तयति ; शिष्याचार्ययोः पठनपाठनपरिपाटीम् अन्यथाकरोति ; ज्ञानाज्ञानयोः स्वरूपभेदं तिरोधापयति; उत्तमर्णाधमर्णयोः व्यवहारवैखरीं विपर्यासयति ; पुण्यपापयोः परिस्थितिं परिवर्तयति ; दुराचारसदाचारयोः प्रकृतिसिद्धमपि वैलक्षण्यं प्रध्वंसयति। किं बहुना— सुखदुःखयोः उपलब्धिमपि प्रतिहन्ति ; परोपकारचिन्तां बिस्मारयति ; अपकारकरणं धर्मपक्षे स्थापयति ; स्वधर्मं हापयति ; परधर्मं ग्राहयति ; कुलधर्मं दूरीकरोति ;स्वदेशाभिमानं परित्याजयति ; शीलवृद्धाः परिहस्यन्ते ; ज्ञानवृद्धाः अवमन्यन्ते ; सर्वानपि मनुजान् पशुपक्षिनिर्विशेषेण जीवनेन तृप्तान् करोति ; सर्वत्र नास्तिकवादेषु कुतूहलमभिवर्धयते। एतादृशीनां दुःस्थितिपरम्पराणां मूलकारणं भगवत्याः सुपर्वभारत्याः विषये भारतीयैरस्माभिः प्रदर्श्यमानम् अनादरणमेवेति निश्चप्रचं सहस्तोत्क्षेपम् उद्घुष्यते । सा हि स्वयम्भूगेहिनी सकलधर्माधर्मव्यवस्थानां प्रथमप्रमाणभूतस्य कृतकेतरस्य वाङ्मयस्य ननीभूता सर्वेश्वरवदनादिनिधना सन्ततपवित्रीकृतनिखिलभुवनान्तराळा सर्वैर्जनिमद्भिरभिवन्दनयोग्या इत्यत्र न कोऽपि विवादः । वस्तुस्थितौ विमृश्यमानायाम् इदमिदानीम् अतिमहत् अस्माकं विषादस्थानम्—भारतीयेऽस्मिन् मण्डले इतरदेशापेक्षया दक्षिण-

देशे गैर्वाण्याः अधिकाधिकमनादरणं परिदृश्यते । इतरासु बह्वीषु स्वदेशजासु प्राघुणिकीषु च भाषासु तत्तदभिमानिभिः परिगृहीतासु सुभगतां नीयमानासु इयमेका तपस्विनी, अतिकृशोद्यानपत्रिकादिकं केवलमवलम्ब्य जीवन्ती कथञ्चित् श्वसिति । भारतीयानां पण्डितानां पुरस्तात् इदानीं किमपि निवेदनीयमस्ति । प्रायेण पण्डिताः सर्वे क्षमावन्तः शमप्रधानाः लौकिकेषु राजकीयेषु च कार्येषु अप्रदर्शितोत्साहाः औदासीन्यमेव भजन्तो दृश्यन्ते । 'अन्यदा भूषणं पुंसां शमो लज्जेव योषिताम्' इति माघः । 'लब्धास्पदोऽस्मीति' इति कालिदासः 'धिक्क्षमामीदृशे जने' इति रामभद्रश्च । तस्मात् अवश्यकर्तव्येषु औदासीन्यप्रदर्शनमन्याय्यमेव । उचितविषये उत्साहप्रदर्शनमेव पुरुषलक्षणम् । 'स्त्रियं पुरुषविग्रहम्'. इति सीतावाक्यं स्मर्यताम् । पृथक्जनाः सर्वेपि पण्डितान् अनुत्साहिनः कार्यकरणासमर्थान् मन्यन्ते । लोकक्षेमाय धर्मो रक्षणीयः । स च धर्मः गैर्वाणीमेवाश्रित्य वर्तते । तदर्थं गैर्वाणीसंरक्षणम् अवश्यकर्तव्यम् । पत्रिकाद्वारेणैव तत्परिपोषणं सुशकमिति सर्वे जानन्ति । सर्वेपि पण्डिताः उद्यानपत्रिकायामस्यां यथोचितमादरं प्रदर्शयन्तु । ग्राहकसङ्ख्याभिवृद्धिः प्रथमं कर्तव्या । तन्मुखात् गैर्वाण्यभिवृद्ध्यपायान् उत्प्रेक्ष्य प्रकाशयन्तु । ततश्च आसेतुहिमाचलवर्तिनां संस्कृतप्रणयिनां सान्द्रः परिचयः सम्पादयितव्य इति ।

---

# संस्कृतग्रन्थजातम् ॥

—— o❀o ——

(2)

## वैदिककाण्डः—ऋक्संहिता ।

मन्त्रभागस्य अस्त्याख्या संहितेति । यथा– ऋक्संहिता यजुस्संहिता सामसंहितेति । भिन्नभिन्नैः ऋषिभिरुपलब्धाः विविधा मन्त्रा बहुधा विप्रकीर्णाः आसन् । गच्छति काले तान् अनपायं परिपालयितुकामाः सर्वान् सङ्कलय्य एकसमुदायीचक्रुः । तेन संहितेति व्यवहार इत्याधुनिका मन्यन्ते । वस्तुतस्तु संहितापदप्रवृत्तिनिमित्तम् अन्यदेवेति भाति । पदपाठे तावत् पदानां पृथक्पृथक् सन्धिकार्यपरिहारेण उच्चारणं भवति । एवंविधे पदपाठे प्रसिद्धे तत्प्रतियोगितया सर्वसन्धिकार्यवत्त्वात्

संहितापाठव्यवहारः प्रावर्तत। 'अधीता संहिता; पदाध्ययनमिदानीं क्रियते' इति ह्यवत्यानाम् अध्येतॄणां व्यवहारः। ऋक्पदस्य तु एवं व्युत्पत्तिः– ऋच्यते स्तूयते अनया; यद्वा स्तूयते स्वयं देवतात्वात् इति। ऋच स्तुतौ इति धातोः 'सम्पदादि'त्वात् क्विप्। ऋचा वनेम अनृचः इति निगमः।

ऋक्संहितायाः प्राचीनो विभागः एकधा दृश्यते। अपरधा च नवीनः। तत्र आद्यः दशमण्डलात्मना। एकैकस्मिन् मण्डले बहवोऽनुवाकाः। एकैकस्मिन्ननुवाके बहूनि सूक्तानि। एकैकं सूक्तमपि अनेकऋगात्मकम्। ऋक्संहितायामाहत्य पञ्चाशीतिः(८५) अनुवाकाः, सप्तदशसहस्रं (१०१७) सूक्तानि च सन्ति। तत्र अष्टममण्डले वालखिल्यसूक्तनामानि अधिकानि एकादश सूक्तानि च सन्ति। तेषामपि संयोजने सूक्तसङ्ख्या अष्टाविंशतिसहस्रम् (१०२८) भवति। कृत्स्नऋक्संख्या पुनः अशीतिपञ्चशतीदशसहस्री (१०५८०)।

अपरो विभागः अष्टकात्मना। तत्र अष्ट अष्टकानि। एकैकमष्टकमपि अध्यायात्मना विभज्यते। एकैकस्य अष्टकस्य अष्टौ अध्यायाः। अत एवाष्टकत्वम्। एकैकस्मिन्नध्यायेपि बहवो वर्गाः। प्रायः त्रयस्त्रिंशत्। प्रतिवर्गं प्रायः पञ्च ऋचः। आहत्य अध्यायानां सङ्ख्या चतुष्षष्टिः। वर्गाणां षड्द्विसहस्री(२००६)। अयं विभागः कात्यायनीयायाम् अनुक्रमण्यां दृश्यते, न तु ततः प्राचीनत्वेन निश्चितेषु निरुक्तप्रातिशाख्यगृह्यसूत्रादिषु। मण्डलात्मना विभागस्तु न परम् आश्वलायनशाङ्खायनगृह्यसूत्रादिषु, किन्तु ऐतरेयारण्यकेपि प्रतिपादितो दृश्यते। तस्मादयं प्राचीनः। एवं चिरन्तने विभागे सत्यपि नवीनस्य प्रकारान्तरेण विभागस्य प्रसक्तिः अध्ययनसौकर्यमूलेति मन्यन्ते। मण्डलेषु हि एकमत्यल्पम्, अपरमतिमहदिति बहुवैषम्यम्; तस्मादध्येयभागसाम्यमुद्दिश्य विभागान्तराश्रयणमिति। प्राचीने विभागे निमित्तमन्यादृशम्।

द्वितीयप्रभृतिसप्तमपर्यन्तानां षण्णां मण्डलानां एकैक ऋषिः द्रष्टा। यथा—द्वितीयस्य गृत्समदः, तृतीयस्य विश्वामित्रः, चतुर्थस्य वामदेवः पञ्चमस्य अत्रिः, षष्ठस्य भरद्वाजः, सप्तमस्य वसिष्ठ इति। एवम् एकैकस्य ऋषेः नाम्नः कीर्तनेन, एकयैव ऋषिव्यक्त्या एक मण्डलं दृष्टमिति न मन्तव्यम्। तत्तद्वंशजास्तु बहवः ऋषयः द्रष्टारो भवितुमर्हन्ति। अत एवैषां वंशमण्डलानि' इति व्यवहार इत्यप्याहुः।

प्रथमचरममण्डलयोर्द्रष्टा न पूर्ववत् एकः, न वा एकवंशजाः । किन्तु भिन्नभिन्ना बहवः । अष्टमनवमयोरपि यद्यप्येवं बहवः ऋषयः । तथापि अष्टमे भूयिष्ठानां सूक्तानां द्रष्टा कण्ववंशः, नवमे अङ्गिरोवंश इत्यस्ति विशेषः । नवमे प्रतिपाद्या देवता सोम इत्येकैव नान्येति ज्ञेयम् । एतेषां दशानां मण्डलानां असाधारणविशेषान् परीक्षमाणाः कालतोपि पौर्वापर्यं निरूपयन्ति । द्वितीयादिमण्डलषट्कस्य एकवंशप्रादुर्भूतत्वं विशेष इत्युक्तम् । अपरोऽप्येषां मण्डलानां मण्डलान्तरापेक्षया अस्ति विशेषः । प्रथमं अग्निप्रतिपादकानि सूक्तानि ; अनन्तरं इन्द्रप्रतिपादकानि ; अनन्तरं इतरदेवप्रतिपादकानीति । तथा पूर्वपूर्वसूक्तापेक्षया उत्तरोत्तरसूक्ते ऋचः अल्पसङ्ख्याः । केषुचन सूक्तेषु अस्य नियमस्य व्यभिचारो दृश्यते । किन्तु एवं नियमं कल्पयित्वा विमर्शकाः एतदननुसारीणि सूक्तानि पश्चात्कालिकानि प्रक्षिप्तानि स्युरिति सन्देहमुद्भावयन्ति । तथा द्वितीयमण्डले यावन्ति सूक्तानि ततोऽधिकानि तृतीयमण्डले । एवं सप्तमपर्यन्तमिति सूक्तविवृद्धिरपि एषु मण्डलेषु अस्तीति प्रदर्शयन्ति । परं तु द्वितीये द्विषष्टिः सूक्तानि, चतुर्थे अष्टपञ्चाशत् ; पञ्चमे सप्ताशीतिः, षष्ठे पञ्चसप्ततिः ; इति तस्य नियमस्य भङ्गो भवति । अथापि प्रक्षिप्तसूक्तपरित्यागे स नियमः अभङ्गुर एवेति मन्यन्ते । एभिः अनुगतैर्विशेषैः एकसङ्घातभूता इयं षण्मण्डली प्रथमं स्थिता ; पश्चात् तस्याः पुरस्तात् अन्ते च मण्डलान्तराणि घटितानि । तद्यथा—अष्टमे तावत् मन्त्रेषु वंशमण्डलतुल्येष्वपि प्रग्रथनरूपः कश्चिद्विशेषः अस्य वंशमण्डलसङ्घातप्रवेशं निरुणद्धि । सप्तमे यावन्ति सूक्तानि ततोऽल्पान्यत्र सूक्तानीति इदमेव वंशमण्डलेभ्यः बहिर्भूतत्वमस्य प्रकाशयति । प्रथममण्डलस्य भागद्वयात्मना विभागः सुकरः । आदितः प्रभृति पञ्चाशसूक्तपर्यन्तः एको भागः ; अवशिष्टः सर्वोऽपरः इति । अयं द्वितीयो भागः सूक्तानुपूर्वीपरिशीलने वंशमण्डलैस्समानः प्रतीयते । तेनायं वंशमण्डलानां अव्यवहितपूर्वभागतया निवेशितः । यः पुनराद्यो भागः स बहुधा अष्टमेन तुल्यः । अर्धाधिकानि कण्ववंशीयानि । पदानां पादानां च बहुधा तौल्यम् । प्रग्रथनमप्यत्रास्तीति एवं बहुधा साम्येपि अस्य प्रथममण्डलप्रथमभागस्य अष्टममण्डलस्य च मध्ये कस्य प्राचीनत्वं कस्य अर्वाचीनत्वमिति न निर्धारयितुं शक्यते । इदं तु दृढमध्यवसीयते यत् प्रागेव स्थितस्य ग्रन्थसङ्घातस्य आदावन्ते च इमे संयोजिते इति ।

नवमस्य तु पूर्वमण्डलाष्टकादनन्तरकालिकत्वं कामं युज्यते । वंशमण्डलानां ये ऋषयः त एवात्रापीति तत्तत्सूक्तान्ते व्यपदेशेन गम्यते। प्रथमाष्टममण्डलसाम्यमप्यत्र वर्तते । अस्मिन् मण्डले प्रतिपाद्या देवता सोमः पवमान एक एव । तेन अस्य मण्डलस्य ऐक्यापादकः उपाधिः एकदेवतापरत्वम् । प्राक्तनानां तु मण्डलानां द्रष्टृऋष्यैक्यमुक्तम् । यथा एवं एकवंशप्रादुर्भूतानां सूक्तानां एकावयविरूपेण संकलनं निष्पन्नमभूत् तद्वदेव द्रष्टृैक्याभावेऽपि विषयैक्यमादाय पृथक् पृथक् तत्तद्वंशस्थितानां पवमानसूक्तानां एकमण्डलात्मना सङ्कलनमिति प्रतिभाति। अत्र देवताभेदाभावात् सूक्तानां सन्निवेशः छन्दोऽनुसारेण आश्रितो दृश्यते। आद्यानां सप्तषष्टिसूक्तानां गायत्री छन्दः, ततःपरं षडशीतिपर्यन्तानां जगती, अवशिष्टानां नानाछन्दः इति ।

दशमस्य तु सर्वार्वाचीनत्वे न सन्देहः । अत्र ऋषीणां प्राक्तनमण्डलनवकपरिचयः महानस्तीति पदे पदे ज्ञायते । कश्चित् ऋषिः प्रथममण्डलोपक्रममनुकुर्वन् "अग्निमीळे" इत्येव स्वकीयं सूक्तसङ्घमारभते । यदस्य मण्डलस्य चरमं स्थानं, यच्चात्र सूक्तसङ्ख्या प्रथममण्डलतुल्या कृता (१९१) तदस्य परिशिष्टरूपतां प्रकाशयति । सर्वपूर्वमण्डलसूक्तापेक्षया अर्वाचीनत्वमेवेह मुक्तकरूपाणां सङ्घातरूपाणां च सूक्तानां एकमण्डलीभावे निमित्तम्, नान्यत् । तथापि प्रायः अत्रत्यानि सूक्तानि पूर्वमण्डलस्थप्रक्षिप्तसूक्तापेक्षया प्राक्तनान्येव ।

भाषाविषययोः परिशीलनेनापि दशमस्य सर्वार्वाचीनत्वं निश्चेतुं शक्यते । 'देवासः' इति 'देवाः' इत्यस्य स्थाने प्रयोगो दृश्यते । अन्यानि च बहूनि एवंविधानि रूपाणि । एवंविधानां रूपाणां यथा पूर्वमण्डलेषु भूयान् प्रयोगः न तथा अत्र । 'सो अस्मान्' इत्येवमादिः असन्धिरपि पूर्वेषु मण्डलेषु बहुधा दृश्यते । नात्र । 'सीम्' इत्ययं शब्दः पूर्वमण्डलेषु पञ्चाशत्कृत्वः प्रयुक्तो दृश्यते । इह तु सकृदेवेति मेग्डानल् (Macdonell) परिगणय्य वदति ।

पूर्वत्र उषःप्रभृतयो देवताः अतिश्रद्धया स्तूयन्ते स्म । इह तासां प्रायोऽदर्शनमेव । अग्निं इन्द्रं च विना प्रायः अन्येषां देवानां इह न तथा प्राधान्यम् यथा पूर्वत्र । अभिनवाश्च काश्चन देवताः इह उत्पन्ना दृश्यन्ते – श्रद्धा, मन्युः, श्रीः, कामः, इत्यादयः । पूर्वं प्रत्येकं तस्यास्तस्या

देवतायाः द्यावापृथिवीजनकत्वं प्रत्यपादि । इह तु सर्वकारणीभूतवस्तुविशेषचिन्ता सर्ववेदान्तग्रन्थविस्तरबीजभूता उपक्रान्ता दृश्यते । तथा विवाहः, अभिचारः, द्यूतप्रसङ्गः, दातृप्रशंसा, प्रेतकार्यम्, इत्येवमाद्या लौकिका अपि विषया इह प्रतिपाद्यन्ते ।

अयं नवीनानां दृष्ट्या मण्डलानां पौर्वापर्यावधारणमार्गः । न परं मण्डलानां, नापि केवलं सूक्तानां, किंतु ऋचामपि एवं सूक्ष्मेक्षिकया चिरन्तनार्वाचीनत्वविवेकः कार्य इति कर्तुं शक्य इति च मन्यन्ते । प्राचां तु ऋषीणां ऋषिप्रायाणां च महतां वैदिकग्रन्थविमर्शे दृष्टिरन्यादृशीति निश्चप्रचम् । तथापि वंशमण्डलाद्यात्मना यः ऋक्संहिताविभागः तादृशः कोऽपि विभागः प्राचां सम्मतो विज्ञायते । तथा च आश्वलायनगृह्ये "अथर्षयः शतर्चिनः ; माध्यमाः गृत्समदः विश्वामित्रः, वामदेवः, अत्रिः, भरद्वाजः, वसिष्ठः ; प्रगाथाः, पावमान्यः, क्षुद्रसूक्ता महासूक्ताः इति ।"

---

# अजामिळोपाख्यानम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

कन्याकुब्जाख्ये जनपदे अजामिळ इति प्रसिद्धः कश्चिद्विप्रो दास्याः शूद्र्याः पतिर्बभूव । स दास्यास्संसर्गेण पतितः स्ववर्णाश्रमधर्ममननुतिष्ठन्, नित्यमशुचिः द्यूतैः कैतवैश्चौर्यैश्च कुटुम्बं पोषयन् , द्यूतादिभिः कुटुम्बस्यानिर्वाहे पशुपक्ष्यादिहिंसया तं बिभ्रच्चावर्तत । एवं जीवतः स्वोत्पादितान् तस्यास्सुतान् लालयतस्तस्य अष्टाशीतिर्वर्षांस्यत्यक्रामन् । प्रवयसस्तस्य दशपुत्रा आसन् । तेषां मध्ये कनिष्ठो नारायणनामा बालः पुत्रः पित्रोर्भृशं दयितस्समपद्यत । स स्थविरः कलभाषिणि नारायणे आसक्तमानसः तल्लीलां निरीक्ष्य मोदमानः स्वयं भुञ्जानः पिबन् स्नेहपरवशस्तमपि भोजयन् पाययंश्च मौढ्यात्सन्निहितं मृत्युं न विदांचकार । एवं वर्तमानस्स मृत्युकाल उपस्थिते सति तनयं नारायणमेव चिन्तयन् अतिदारुणान् वक्रमुखान् ऊर्ध्वरोम्ण आत्मानं यमालयं प्रति नेतुमागतान् पाशहस्तान् त्रीन् पुरुषान् दृष्ट्वा व्याकुलचित्तो दूरे क्रीडासक्तन्नारायणं प्लुतस्वरेण उच्चैर्नारायणेत्याजुहाव । विष्णोः पार्षदाश्चत्वारो दूता भर्तुर्मुखतस्य तस्य मुखतो हरि-

कीर्तनन्निशम्य सहसाऽभिपत्य ओजसा तमन्तर्हृदयाद्विकर्षतो यमदूतान् वारयामासुः ।

विष्णुदूतैर्निषिद्धा वैवस्वतभृत्यास्तान् प्रति 'धर्मराजस्य शासनं प्रतिषेद्धारो यूयं के । कस्य वा संबन्धिनः । कस्माल्लोकादायाताः । अस्याजामिळस्य कस्माद्गुणलेशात्कृतान्तस्याज्ञां प्रतिक्षिपथ । यूयं किं देवाः उत गन्धर्वाः आहोस्वित् सिद्धश्रेष्ठाः । पद्मपलाशाक्षाः पीतकौशेयवाससः, किरीटिनः कुण्डलिनो लसत्कमलमालिनो नूत्नवयसश्चारुचतुर्भुजा धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजधराः स्वेन रोचिषा दिशः प्रकाशयन्तो यूयं कस्मै प्रयोजनाय शमनस्य किङ्करानस्मान्निषेधथ' इत्यपृच्छन् । यमदूतैरेवमभिहिता वासुदेवस्याश्रवाः पारिषदाः प्रहस्य तानधिकृत्य घनगर्जितवद्गम्भीरया गिरेत्थमन्वयुञ्जत— 'यदि यूयं धर्मराजनिदेशकारिणस्तर्हि धर्माधर्मयोर्लक्षणं प्रमाणं चास्मभ्यं ब्रूत । केन प्रकारेण दण्डो विधीयते । किं कर्मिणस्सर्वे नरा दण्ड्याः आहोस्वित्कर्मिणान्नृणां मध्ये कतिचिदेव' इति । इत्थमुदिताः कालदूता इदमगदन्— 'वेदेन कर्तव्यत्वेन बोधितत्वं धर्मस्य तद्विपर्ययोऽधर्मस्य च लक्षणम् । वेद एवायं धर्मोऽयमधर्म इत्यत्र प्रमाणम् । वेदो नारायणादविप्लुतपूर्वानुपूर्वीक एवाजायतेति यमादिभ्यश्शुश्रुम । येनान्तःप्रविश्य धारके स्वस्वरूपे वेददेवतामनुष्यादयः पदार्थाः सत्वरजस्तमःप्रचुराः शान्तिक्षमाशौर्यादिगुणैः वेददेवमनुष्यब्राह्मणाद्यात्मकनामभिरर्थप्रत्यायनादिक्रियाभिः शब्दात्मकत्वार्थात्मकत्वादिधर्मैश्च यथाकर्म व्यज्यन्ते स नारायणः । आकशवाय्वप्पृथिवीगोसन्ध्यादिनरात्रिदिक्कालधर्माणामेकादशानामेकादशाधिदेवताः सूर्याग्निसोमाश्चेत्येते चतुर्दश बुद्धीन्द्रियमनःप्राणसहितेन देहेन क्रियमाणस्य कर्मणस्साक्षिणः । एतैर्धर्मोऽधर्मश्चास्मभ्यं ज्ञाप्यते । धर्ममनुतिष्ठतामपि शब्दादिविषयपरवशत्वादधर्मोऽवर्जनीय आपतति । अधर्मफलानुभवदशायां धार्मिका अधार्मिकवत् दण्डमर्हन्ति । धर्माधर्मपरिहारेण तूष्णीमवस्थातुन्तु न कोऽपि देही पारयति । अतस्सर्वेऽपि देहिनः कर्मकृत इति पर्यायेण दण्ड्या एव । जीवानामनाद्यविद्याकर्मवासनादिभिस्तिरोहितस्वस्वरूपाणां सत्त्वादिगुणत्रयसंसृष्टानां स्वस्वगुणोन्मेषनिमित्तधर्माधर्ममिश्ररूपेण कर्मणा सुखदुःखमिश्ररूपफलानुभवाय देवतिर्यङ्मनुष्यरूपेण संसरतां धर्मादिनिमित्तेश्वरानुग्रहादिहेतुकस्सुखाद्यनुभवस्सिध्यति । जीवः सुखदुःखमोहाननुभवन् मनस्संयुक्तैः पाण्यादिभिः पञ्चभिः कर्मेन्द्रियैः

पञ्चोपादानगत्यादीन् कलयति। हृदयसहितैः श्रोत्रादिभिः पञ्चभिः ज्ञानेन्द्रियैः शब्दादीन् जानाति। भूतपञ्चकैकादशेन्द्रियात्मकस्य विद्याकर्मवासनारूपशक्तित्रयाश्रयस्य कार्यदशायां स्थूलाकारस्य सूक्ष्मशरीरस्य सम्बन्धात् जीवस्य हर्षशोकभयार्तिदः गर्भजन्माद्यवस्थापरिवृत्तिरूपः संसार आपद्यते। संसार्ययं देही देहात्माभिमानवान् इन्द्रियकिङ्करः अनिच्छन्नपि सूक्ष्मशरीरेण धर्माधर्ममिश्ररूपाणि कर्माणि कार्यते। एवं कृतेन कर्मणा यथा कोशकारस्तन्तून् करण्डरूपेण सृष्ट्वा स्वनिर्गमोपायं न जानाति तद्वत् स्वस्वरूपं तिरोधाप्य, देह एवाहमिति मोहं प्राप्नोति। कश्चिद्देही जातु क्षणमप्यकर्मकृत् न तिष्ठति। अन्ततस्तृणच्छेदादिकं वा कुर्वन्नेव विद्यते। अवशोयमनादिसिद्धैः सत्वरजस्तमोरूपैर्गुणैर्बलात्कर्माण्यनुष्ठाप्यत एव। संसृतिनिमित्तापरिहार्यकर्मवासनाश्रयसूक्ष्मशरीरशालिनोऽस्य पिपीलिकादिरूपा गजादिरूपाश्च देहास्सात्विकादिकर्मवासनारूपस्वभावेन स्थूलशरीरं मातृसदृशं पितृसदृशञ्च परिणमन्ति। पुरुषस्य प्रकृतिसङ्गप्रयुक्तः संसार एवंविधः। तत्सङ्गनिबन्धनः परमार्थतो जीवेऽविद्यमानस्संसार ईश्वरभक्त्या क्षिप्रमपैति। अयमजामिळो वेदशास्त्राध्ययनसम्पन्नः सुस्वभावसदाचारशान्त्यादिगुणानामाश्रयः स्त्रीसङ्गराहित्यात्मकब्रह्मचर्ययुतः कोमलहृदयो जितबाह्येन्द्रियो हितवादी सावित्र्यादिमन्त्रोपासकस्सदा पवित्रो गुर्वग्न्यतिथिवृद्धानां शुश्रूषुः उक्तगुणकृताहङ्काररहितः सर्वभूतप्रियकारी परकार्यसाधको मितवागनसूयकश्चाशोभत। एवंभूतोऽयं ब्राह्मणः पित्रादिष्टकार्यकरणाय वनं श्रितः फलपुष्पसमित्कुशानादाय स्वस्थानं भेजे। स पुनस्तद्वनं गच्छन् तत्र मैरेयं मधु पीत्वा मदाघूर्णितनेत्रया मत्तया विस्रंसमाननीव्या दास्या सह वर्तमानं सत्पथादपेतं निरपत्रपं तया साकमन्तिक एव क्रीडानुगानहासान्कलयन्तं कञ्चित्कामिनं शूद्रं ददर्श। कामोद्दीपनहरिद्रादिलिप्तेन बाहुना परिरब्धां तां दासीं दृष्ट्वा बलात्स्वकीयदुरदृष्टेन विमोहितो मनसिजस्य वशंगतो यावद्बलं यथागुरूपदेशं विवेकेन मनस्स्तम्भयन्नपि मदनवेपितं तन्नियन्तुं न शशाक। दासीनिमित्तकस्मररूपकपटपिशाचग्रस्तो विगतपूर्वस्मृतिस्तामेव मनसा ध्यायन् स्वधर्माद्विरम्य समस्तेन पितृवित्तेन ग्रामेषु साधुभिस्तस्याः प्रियैर्वस्त्राभरणादिभिश्च तामतोषयत्। स्वैरिणीकटाक्षविनाशितविवेकः पापाचारोऽयं विप्रो महाकुलपरिणीतामजातरजस्कां सुन्दरीं स्वभार्यामचिराद्विससर्ज। न्यायतोऽन्यायतो वा यतः कुतश्चिद्धनमानीयास्याः कुटुम्बं पोषयामास। यस्मादयमजामिळः शास्त्रीयमार्गमतिक्रम्य स्वैरचारी शिष्टगर्हितो दासीसङ्गान्नित्यमशुचिस्सन् महान्तं कालमत्यवाहयत् ततः कृतकिल्बिषमकृतनिष्कृतिमेनं

दण्डग्रहणेऽर्हस्य यत्र सकाशे नरकानुभवरूपेण दण्डेनैव शुद्ध्यति तन्नेष्यामः'। इति। नयकोविदा भगवद्दूता यमदूतानामुत्तरं मनस्याकलय्येत्थमभणन् — 'स्वानुष्ठानेन धर्मप्रवर्तकानां वेदानुवर्तिनां भवादृशानां श्रेयसामिदमदण्ड्यदण्डनमनुचितम्। सापराधलोकस्य यमो दण्डयिता न त्वपापिनामिति स विश्वासविषय एव। स यदि प्राकृतवद्वैषम्येणानपराधिनोऽपि शिक्षकस्स्यात्तर्हि विश्वस्तघातुकतादोषस्तस्य प्रसजति। विवशस्याप्यस्याजामिळस्य प्राणप्रयाणसमये नारायणेति साङ्केतिकचतुरक्षरहरिनाम्न उच्चारणं जन्मनां कोटिभिरार्जितानां तदीयानां पापानां प्रायश्चित्तम्। न केवलं प्रतिपदोक्तप्रायश्चित्तादिवदन्तिमं विष्णुनामव्याहरणं कतिपयानां पापानां प्रायश्चित्तं किन्तु महापातकोपपातकसङ्कीर्णादिरूपेण बहुविधानां सर्वेषामपि। अनेनाभ्यस्तेन विरोधिसकलकल्मषनिरसनद्वारेणान्तिमस्मरणपर्यन्ता मुक्तिसाधनभूता अनभिसंहितफलकर्मयोगादिभक्तिरूपा मतिर्जन्यते। अतो मरणसमये निखिलकिल्बिषप्रायश्चित्तभगवन्नामोच्चारणमाचरितवन्तमेनं यमालयं मा प्रापयत। 'अयं पुत्रे सङ्केतितं नारायणेति पदमुदचारयत्। अत इदमेतत्पुत्रविषयकमत्युत्पादनद्वारा एनं संसारयेदेव न तु भगवद्विषयकमत्युत्पादनद्वारा मोचयेत्' इति भवद्भिर्न मन्तव्यं यतो यदृच्छया भस्मादिबुद्ध्या वा स्पृष्टस्याग्नेर्यदृच्छया पीतस्यौषधस्य च दाहकत्वारोग्यजनकत्ववद्वस्तूनां विलक्षणस्वभावत्वात्सङ्केतितस्यासङ्केतितस्य वाऽन्यादृशो भगवन्नाम्नस्सर्वाघनिवर्तकत्वं भगवद्विषयकमत्युत्पादकत्वं च स्वाभाविको धर्मः। यद्यस्मदुक्तार्थे युष्माकं संशयस्तर्हि वः पतिं पृच्छत। स भगवान् कृतान्तो धर्मस्य परमं गुह्यं वेत्ति' इति। अन्तकभटा विष्णुनामोच्चारणं निश्शेषदुरितक्षपणसमर्थं विनिश्चित्य तं विप्रं याम्यपाशान्निरमोचयन्। आयुःक्षयकरात्पापाधिक्यात्तस्य मृत्युः प्रसक्तः। तत्समये तमानेतुं याम्याः पुरुषा आजग्मुः। तस्मिंश्चाधिके पापेऽन्तिमनामोच्चारणेनाकस्मादापतितेन समूलं विनष्टे सति मृत्युरप्यपाक्रामत्। इत्थं प्रत्याख्याता दण्डधरस्य किङ्करास्तस्यान्तिकं यात्वा तस्मै विष्णुकिङ्करोक्तं सर्वमाचख्युः। वैवस्वतपाशाद्विनिर्मुक्तो गतभीः पुनर्जीवितवान् विप्रो नारायणस्य दूतान् तद्दर्शनेन हृष्टस्सन् शिरसा ववन्दे। भगवद्भटास्तं किञ्चिद्विवक्षुमालक्ष्य तस्य पश्यतस्सतस्तस्य भगवत्प्राप्त्यपेक्षाजननाय सहसाऽन्तर्दधिरे। स वैवस्वतकृष्णदूतैरभिहितं गुणवयवश्यजनाधिकारिकं वेदपूर्वभागविहितकर्मरूपं सात्त्विकजनाधिकारिकं भगवन्नामोच्चारणरूपञ्च धर्मं मनस्यवधार्य भगवति भक्तिमानासीत्। आत्मनः पापं स्मरतस्तस्य महाननुताप एवमभवत्। 'वृषळ्यां तज्जायात्वप्रयोजकजनिमता मया ब्राह्मण्यं

व्यनाशयत । सतीं बालां हित्वा सुरापामसतीमगाम । वृद्धावनाथाव-नन्यबन्धू तपस्सम्पन्नौ पितरौ कृतघ्नेन मया तत्क्षणमेव नीचेनेवात्यज्येताम् । यत्र भृशदारुणे नरके मादृशाः कामिनो यमयातनां विन्दन्ति तत्राहं व्यक्तं पतिष्यामि' इति । अथ स इत्थं निरधारयत् — 'मन्दभाग्यस्यापि मे विबुधोत्तमदर्शनेन पुण्येन कर्मणा भवितव्यं येन मे मनः प्रसीदति । पुण्येन विना वृषलीपतेर्मर्तुमुद्यतस्य मम जिह्वा वैकुण्ठनाम वक्तुं नार्हति । ईदृशोऽहं नियमितचित्तेन्द्रियानिलो यथा भूयो मदात्मानं नरके न निमज्जयेयं तथा यतिष्ये । देहतदनुबन्धिष्वहंममेत्ययथार्थधियमुत्सृज्य भगवति तत्कीर्तनादिभिश्शुद्धं मानसमाधास्ये' । इति । स उद्भूतभृशनिर्वेदस्साधुषु क्षणमात्रसङ्गेन मुक्तपुत्रादिस्नेहो भगवत्सन्निहितं गङ्गाद्वारमुपेत्य तस्मिन्नासीनः प्रत्याहृतेन्द्रियग्रामः प्रथमं प्रत्यगात्मानं देहादिभ्यः पृथक्त्वेनानुसन्धाय तस्मिन् प्रत्यगात्मनि चेतो न्यवेशयत् । ततो जीवान्तर्यामिपरमात्मनो ध्यानेन स्वरूपेण गुणैश्च निरतिशयबृहति ज्ञानस्वरूपे तस्मिन् परमात्मनि तत्प्रत्यस्थापयत् । स भगवति स्थिरीकृतहृदयस्सन् यदा शब्दादिभ्यो धियं व्यरमयत्तदा पूर्वदृष्टान् भगवत्पार्षदान्निरीक्ष्य तान्प्राक्प्राप्तान् प्रत्यभिज्ञाय मूर्ध्ना प्राणमत् । स भगवत्पार्षदानामालोकनात्पश्चाद्गङ्गातीर्थे स्वकळेबरमुत्सृज्य सद्यस्तैस्साकं हैमं विमानमारुह्य यत्र श्रीवैकुण्ठे श्रियःपतिरास्ते तमर्चिरादिमार्गेणासाद्य भगवत्पार्श्ववर्तिनां पार्षदानां समानं रूपं जगृहे ।

एवं स विनाशितस्ववर्णाश्रमोचितधर्मो दास्याः पतिः स्वधर्मात्प्रच्युतो निन्दितकर्मा हतश्रुतसम्पत्त्यादिव्रतो नरके पातयिष्यमाणोऽपि भगवन्नाम गृह्णन् मुक्त्युपायभक्तियोगानुष्ठानद्वारेण मुक्तोऽभूत् । मुमुक्षूणां संसारबन्धमूलकर्मरूपबन्धस्य निकृन्तनं भगवतः कीर्तनादन्यत्साधनं नास्ति यस्मात्कीर्तनात् रजस्तमोभ्यां कश्मलं मनः संसृतिहेतुषु कर्मसु पुनर्न सज्जते । उपायान्तरेण तु सज्जत एव । परमं गुह्यमघापहमेनमितिहासं यः पुमान् श्रद्धया युक्तः शृणुयात् यश्च भक्त्या कीर्तयेत् स नरकं न यात्येव । स यमकिङ्करैर्नेक्ष्यते । पापीयानपि मर्त्यश्श्रवणादिकं कलयन् भगवद्विषयकमत्युत्पत्तिद्वारा भगवल्लोकं लभते । तत्रत्यैर्बहुमन्यते च । अजामिळो मर्तुमुद्यतः पुत्रे सङ्केतितमेव हरेर्नारायणेति नामधेयमुच्चारयन् भक्तियोगनिष्ठश्च सन् श्रीवैकुण्ठमभजत । अन्यः पुरुषो हरिगुणप्रतिपादकान् नारायणादिशब्दान् श्रद्धया गृणन् तथाविधश्च सन् तं जुषत इति किमुत वक्तव्यम् ।

---

# रोदसीव्याप्तकीर्तिः ॥

(T. Ramachandra Sastri Siromani)

रोदसीव्याप्तकीर्तिरित्यपप्रयोग इति कश्चिद्भ्राम । अत्रोच्यते । भूमिवर्गे—'द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी । दिवस्पृथिव्यौ... ...' इत्यमरः । रोदस्याविती कारान्तः । रोदसी इति सकारान्तः । आद्यः स्त्रियामन्यः क्लीबे । उभयमपि नित्यद्विवचनान्तं द्यावाभूम्योर्वाचकम् । तथा नानार्थवर्गे— '... ... भूद्यावौ रोदस्यौ रोदसी च ते' इत्यमरः । अत्र सुधा—'रोदिति सर्वमस्मिन् । रुदिर् अश्रुविमोचने । असुन् । पक्षे गौरादित्वात् ङीप् ।' 'रोदसी' इत्यव्ययमप्यस्ति 'द्यावापृथिव्यौ रोदस्यौ रोदसौ रोदसीति च' विगृहितयोरप्येते नामनी । रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् । सहप्रयोगेऽप्यनयोः 'रोदस्यावपि रोदसी' इति विश्व इति । अयं श्लोकः 'सर्वधातुभ्योऽसुन्' इत्यत्र मनोरमादावुद्धृतः । 'रोदसी संपफालेव' (युद्ध २४-६) श्रीरामायणश्लोकव्याख्याने 'वस्तुतस्तु 'रोदश्च रोदसी चापि ... ...' इति विश्वोक्तेः रोदसी तन्त्रन्यायेन द्यौः पृथिवी च । विशीर्णेत्यर्थः । रोदसीत्यव्ययमप्यस्तीति भानुजीदीक्षितः' इत्युक्तम् । वाचस्पत्यशब्दार्थचिन्तामण्यादिकोशेष्वपि रोदसीशब्दः पठ्यते । एवमादिभिः प्रमाणैरेकवचनान्तस्यापि रोदःशब्दस्य रोदसीशब्दस्य च प्रयोगोऽभिमत इति विभाव्यते । अत एव प्रतापरुद्रीये— 'रोदसः कटाहत्वं निरूप्यते' (पु २७१) इत्युक्तम् । तत्रैव व्याख्याने रोद इत्येकवचनान्तं प्रतीकमुदधारि । 'यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी । क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः' इति प्रयोगश्च चकास्ति । नित्यद्विवचनान्तत्वेऽपि 'पातालायितरोदसीपरिकरः सोऽयं प्रकारोऽभवत्' इत्यादाविव समासघटकतया न किञ्चिद्बाधकम् । उभयथापि विवक्षितार्थः सङ्गृहीत एव भवति ।

रोदसीशब्दसत्त्वं तु सर्वेषामपि सम्मतम् ।
तत्त्वमेतदजानन्तो भ्रान्ता जल्पन्ति नीरसम् ॥

12-२१

दिव्यतुळसीदळपरिमिळिता परिमळवती माला इत्यालपत । इत्थमिदमखिलं देवावेशवशात् आत्मस्थतयाऽवदत् । तदनन्तरं प्रकृतिं गता भूत्वा इदमूचे । यूयं किंस्विदिदमिति मा भैष्ट मातरः । युष्माकं कुमार्याः आधिनिदानभूतः न यः कोऽपि सामान्यो देवो मानुषो वा । तमहमज्ञासिषम् । अयि निशितकुन्तदृशस्सुदृशः—किमियं वक्ष्यतीति किल कृतक्षणाः मामेव सूक्ष्ममीक्षमाणास्स्थ यूयम् । व्याकुलचित्तानां भवतीनां विशदमुदीरयेयम् । येनेयमुर्वी त्रिविक्रमेण विक्रान्ता पुरा बभूव । येन च लङ्कानगरी 'चूर्णरजस्ततोऽणुः' इति दशां नीता निपपात । येन च गोकुले गावो गोपाश्च ग्राववर्षतो गोपायिताः बभूवुः ।

---

ஆழிநீராரால் கடைந்திடப்பட்டது
அவன்காண்மின்-ஊரா நிரைமேய்த் துலகெல்லா முண்டு
மிழ்ந்தும்
ஆராத தன்மையனாயாங் கொருநா ளாய்ப்பாடி
சீரார் கலையல்குல் சீரடிச் செந்துவர்வாய்
வாரார் வனமுலையாள் மத்தாரப் பற்றிக்கொண்டு
ஏரா ரிடைநோவ எத்தனையோர் போதுமாய்
சீரார் தயிர்கடைந்து வெண்ணை திரண்டதனை
வேரார் நுதல்மடவாள் வேறோர் கலத்திட்டு
நாரா ருறியேற்றி நன்கமைய வைத்ததனை
போரார்வேற் கண்மடவாள் போந்தனையும் பொய்யுறக்கம்
ஓரா தவன்போல் உறங்கி யறிவுற்று
தாரார் நடந்தோள்க ளுள்ளளவும் கைநீட்டி
ஆராத வெண்ணெய் விழுங்கி" [14]

येन चागाधोऽम्भोधिरमन्थि । सोऽयं सर्वसुलभो भूत्वा परकीयाश्च गाश्चारयामास कृत्स्नं जगन्निगीर्य तुनरुद्गिरति स्म । इत्थमयं रक्ष्यवस्तु जातं भूयोमुखमभिरक्ष्याप्यस्वस्थमनाः निखिलजगन्निगरणेन बालरोगमिव जातं परिजिहीर्षुरपहृत्य हैयङ्गवीनमौषधवदास्वादयामास । पिबन्तु तत् कथामृतं भवत्योऽपि । श्रुतं हि नन्दगोकुलं रक्षकदुर्भिक्षम् । तत्र नन्दपत्नी यशोदा कदाचित् दधिमथितुमारभत । किमिति कथयेयमेत-

स्याः सौभाग्यसम्पदम्। बालकृष्णस्य गात्रोद्वर्तनाञ्जनादिनित्यदृश्यं दिव्यं वक्त्रमस्याः। श्रीकृष्णसंपर्कधन्यः कटिदेशः। सापराधे रुषा निरस्तेऽपि शिशौ पुनस्स्तनन्धयेन तेन जननीविश्लेषमसहमानेन गाढतरं परिष्वक्तौ दिव्यौ चरणौ। ईदृशं शिशोरभिमानविशेषमात्मनि समालोक्य हसन्त्याः मन्दस्मितसुन्दरं वदनम्। अथ च शान्तकोपा जननीति मत्वा पुनः स्तन्यं पातुं प्रवृत्ते शिशौ तस्यातिमात्रप्रवृत्तिं प्रतिरोद्धुं कञ्चुकेन दृढतर-माबद्धौ पीनौ पयोधरौ। सेयमेकपदे दधिमथितुमशक्नुवती मन्थान-दण्डमालम्ब्यालम्ब्य विश्रम्य विश्रम्य मध्ये मध्ये सीदन्ती चिराय दिव्यं दधिमथित्वा तदानीमेकीभूतं नवनीतं प्रस्विद्य दलिका यशोदा पात्रान्तरे निक्षिप्य रज्जुबद्धं शिक्यमध्यारोप्य स्थापयामास। अथ च स्थाप्यमानमिदं कृष्णः किमु पश्येत् इति संशयेन धनुरायते दृशौ युद्धरङ्ग इव दिशिदिशि चारयित्वा निद्राति शिशुः इति मन्यमाना व्यापारगौरवेण जगाम स्थलान्तरम्। तावन्तं कालं किमप्यजानान इव मायाशिशुरयं मायानिद्रामभिनीय तद्गमनानन्तरमेव जागर्ति स्म। प्रबुध्य च नवनीत-कुम्भमध्ये दिव्यतुळसीदामसुगन्धिस्कन्धान्तं हस्तं प्रसार्य शान्तोष्णं तदखिलं हैयङ्गवीनमास्वादयामास। तावताप्यपर्याप्तामृत एव बभूव। पूर्वं पूर्वमास्वादितममृतमुत्तरोत्तरमास्वादयितुं जाठराग्निदीपन लेह्यमिवासीत्।

---

அருகிருந்த மோரார் குடமுருட்டி முன்கிடந்த தானத்தே!
ஓராத வன்போல் கிடந்தானைக் கண்டவளும்!
வாராத்தான் வைத்தது காணாள்! [15]

निकटस्थितं तक्रपूर्णं घटमपि भुवि लुठितमकरोत्। सन्निधिरपि तक्रकुम्भस्या सह्य इवासीदस्य। महाभागवतसन्निधौ कृतव्रस्थितिमिव मेने। सारतममास्वाद्यासारमपसारयामास। 'असारमल्पसारञ्च सारं सारतरं त्यजेत्। भजेत् सारतमम्' इति ह्याहुः। अथ च शयितपूर्वं स्थलमेव पुनरास्थाय नवनीतवृत्तान्तवैदेशिक इवाधिशिश्ये। जननी च प्रतिनिवृत्य तत्रैव शयानं तमपश्यत्। अथापि सा चिरपरिचिततदीय-चेष्टिता समागच्छन्त्येव शङ्कमाना शिक्यमपश्यत्। न्यस्तपूर्वमंशतोऽपि न ददर्श।

---

வயிறடித்திங் காரார் புகுதுவார் ஐயரிவரல்லால்
நீரா மிதுசெய்தீ ரென்றோர் நெடுங்கயிற்றால்
ஊரார்க ளெல்லாரும் காண வுரலோடே
தீரா வெகுளியளாய்ச் சிக்கென வார்த்தடிப்ப
ஆரா வயிற்றினோ டாற்றாதான்" [16]

सोरस्ताडं लुण्टाकगोष्ठीगरिष्ठमेनं विना कोऽत्र प्रविशेत् ? त्वमेव नवनीतमचूचुरः । कुंभलग्नः तुलसीदळपरिमळः सत्यापयति तव चौर्यम्' । इत्याक्रुश्य हस्तगतेन केनचन दीर्घेण दाम्ना व्रजवासिषु सर्वेषु पश्यत्सु सामर्षमुलूखले बध्वा सुदृढमेनमताडयत् । आस्वादितमात्रं तु तस्य तदमृतं निजोदरैकदेशस्यापि न पर्याप्तम् । बद्धोप्ययं भाजनान्तरान्तस्थं हैयङ्गवीनमभुक्त्वा स्थातुमशक्तस्सुतरामनाश्वस्त आसीत् ।

---

அன்றியும் நீரார் நெடுங்கயத்தைச் சென்றலைக்கநின்
[றுரப்பி
ஓரா யிரம்பணவெங் கோவியல் நாகத்தை
வாரா யெனக்கென்று மற்றதன் மத்தகத்து
சீரார் திருவடியால் பாய்ந்தான்" [17]

आप्तमुखादाप्तोऽयंबन्धः । अनाप्त मूलकं बन्धान्तरमपि शृणुत मातरः । पूर्णोदकं महाह्रदमेत्य तमुल्लोलमुखरकीलालं कलुषीचकार । तत्र सहस्रफणः काळियनामा यमवत् अतिक्रूरस्वभावो नाग आसीत् । पञ्च फणोप्ययं क्रौर्येण सहस्रफण इव । अथ च सहस्रफणोस्मत्स्वामी शेषः जगत्संहारसमयेऽतीव तीव्ररूप इति प्रसिद्धम् "कल्पान्ते यस्य वक्त्रेभ्यो विषानल शिखोज्वलः । सङ्कर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम्" इति तद्वत् अयमपि काळियः । तमयं 'मम भागस्त्वम् । इत एहि' इति स क्रोधमाक्रुश्य तदीयमुन्नमितं मस्तकं दिव्याङ्घ्रिकुट्टनैर्मुहुर्मुहुरमृद्नात् ।

---

தன் சீதைக்கு நேராவளென்றோர் நிசாசரிதான் வந்தாளை
கூரார்ந்த வாளால் கொடிமூக்கும் காதிரண்டும்
ஈரா விடுத்தவட்கு மூத்தோனை [18]

एतस्य रामावतारवृत्तान्तं पुनरपि विस्तरतः श्रृणुत—"शूर्पणखा नाम काचन निशाचरी विकृतवेषाचारा, 'सीतया किं करिष्यसि? अहमेवानुरूपा ते भार्या' इति अभिदधती रामान्तिकमाजगाम। परपरिग्रहपराङ्मुखोऽसौ निशिततरेणासिना तस्याः नासालतां कर्णयुगलं चाच्छिनत्।' 'स्त्रीणां नासादिकृन्तनम्' इति हि प्रायश्चितमुपदिशन्ति याज्ञवल्क्यादयः। रामस्य दक्षिणो बाहुः किल लक्ष्मणः। अतः तेन कृतमपि विरूपणं श्रीरामकृतमेव ननु। शूर्पणखायाः भ्राता खरो नाम।

---

வெந்நரகம் சேரா வகையே சிலைகுனித்தான்
செந்துவர்வாய் வாரார் வனமுலையாள் வைதேவி காரணமா
ஏரார் தடந்தோ ளிராவணனை. [19]

तमेनं तपस्विजनकण्टकं अतिघोरात् नरकात् निस्तारयितुमेव तमुद्दिश्य निजं शरासनमनामयत्। 'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायान्ति सन्तस्सुकृतिनो यथा' इति हि मानवं वचनम्। तदिदमनूद्यते स्म वालिनं प्रत्यात्मनैव रामचन्द्रेण। अथ च धनुरवष्टभ्य तिष्ठतो राघवस्य दर्शनमात्रेण नरकयातनामिहैवानुबभूव खरः। 'खरस्याप्यभवत्त्रासो दृष्ट्वा रामस्य विक्रमम्' इति श्रीरामायणम्। न तु यातनान्तरं देशान्तरानुभाव्यमासीत्। 'रिपुषु निहतेरेव हितता' इति च भगवतो वैभवमनुसन्दाधिरे। अथ च परिणतबिम्बफलाधरायाः कञ्चुकाऽऽबद्धपीनपयोधरायाः वैदेह्याः कृते रावणं स्वानुरूपविशालविंशतिभुजं सञ्जहार।

---

ஈரைந்துசீரார் சிரமறுத்துச்செற்று கந்த செங்கண்மால்
போரார் நெடுவேலோன் பொன் பெயரோனாகத்தை [20]
கூரார்ந்தவள்ளுகிரால் கீண்டு

वीर श्रीसम्पन्नानि दशशिरांसि निकृत्य रावणं निहत्य मुमोद पुण्डरीकेक्षणः स्वामी। अपि च हिरण्यनामा कश्चिदसुरः सततं समरव्यापृतशरासनः साधुकण्टक आसीत्। तस्य हृदयं नृसिंहरूपी भास्वरेण नखरेण विदारयामास।

---

R S V L 00990 III. 2

शेकस्पियर्-कृतं

# यथाभिमतम् ॥

रोसलिन्द् — जोषमास्व। स्वसा मे आगच्छति अनुवाचयन्ती । अपसृत्य तिष्ठ ।

[प्रविशति सिलिआ पत्रमेकमनुवाचयन्ती]

सिलिआ— (अनुवाचयति)

कुतः खल्विदमरण्यमुच्यते ? किं जना न सन्तीति ? न। प्रतिवृक्षमहं जिह्वा आसञ्जयिष्यामि या उदाराणि वचांसि प्रादुर्भावयेयुः ; काश्चित् कथं मनुष्यस्यायुः चलन्त्यां लोकयात्रायामल्पमेव दूरं गच्छतीति ; काश्चित् कथं सुहृदः सुहृदश्च मध्ये प्रतिज्ञाभङ्गो भवतीति ।अथ रम्यतमासु पुनः शाखासु यद्वा एकैकस्य वाक्यस्यान्ते रोसलिन्दां लेखिष्यामि ; तेन बोधयिष्यामि सर्वमक्षरज्ञं यथा सर्वसौन्दर्यसारांशान् विधिरेकत्र दर्शयतीति। तथाहि देवः प्रकृतिमादिदेश विप्रकीर्णं सौन्दर्यं सर्वं एकस्मिन् देहे निधेयमिति । ततः सा हेलेन्* —अस्याः कपोले न हृदयं, क्लिओपत्रायाः* गाम्भीर्यं अतलन्ताया* अभ्यर्हितं भागं तपस्विन्या लुक्रेसिआयाः* पातिव्रत्यं च निष्पीड्य सारमादत्त । एवं दिव्यविधानेन अनर्घत्वसिद्ध्ये बहुभिः सारांशैः रोसलिन्दा निर्मिता । दैवसङ्कल्प एष यदियं सर्वसारमयी भवतु, अहं च तस्या जीवन् म्रियमाणश्च दासो भवानीति ।

रोसलिन्द् —अये उदार ईश्वर, कथं नाम ईदृशीभिः उद्वेजनीभिः कामगाथाभिर्जानपदान् क्लेशयसि ? न तु 'सुजनाः क्षमा वो भवतु' इति जात्वपि प्रतिबोधयसि ।†

सिलिआ — कथमिदानीम् ? पृष्ठतो यातं सुहृदौ । अजपाल अपसर मनाक् तेन सह याहि भोः ।

निकषोपलः -- एहि, अजपाल, सगौरवं निवर्तवहि, [उभौ निष्क्रामतः]

---

* इमाः सर्वाः पाश्चात्येतिहासप्रसिद्धाः स्त्रियः तत्तद्गुणविशेषवत्तया ख्याताः ।

† 'कथं स्वकामुकस्य एवमुन्मादं जनयसि । न तु क्षमाशक्तिं दिशसि' इति भावः ।

सिलिआ— अपि नाम इमा गाथाः* शृणोषि ?

रोसलिन्द् — अये, आम् । सर्वास्ता अश्रौषम् । ततोऽधिकं च, यतः कासुचित् यावतस्ता बिभृयुः ततोऽधिकाः पादा अभूवन् ।

सिलिआ — न स कश्चिद् विषयः पादा एव गाथा बिभृयुः ।

रोसलिन्द् — एवम् । किन्तु एते पादाः खञ्जाः स्वात्मनोऽपि भरणे अशक्ताः । अतो गाथासु खञ्जवद् वर्तन्ते स्म ।

सिलिआ — तदस्तु । किं त्वं कथं ते नाम एषु वृक्षेषु लम्बितां लिखितं चेति अजातविस्मया अश्रौषीः ।

रोसलिन्द् — मदीयो विस्मयः भवत्या आगमनात् पूर्वमेव प्रायः शान्तः । अवलोकय तावत् यदहं कस्मिंश्चित् तालवृक्षे उपलब्धवत्यस्मि । पिथगुरस्-कालात् प्रभृति, यदाऽहं अयर्लेन्द्-देशे मूषिकरूपा आसम् —नाहमिदं स्मर्तुं शक्ता न मे जातु एवं आकर्षणगीतं निबद्धम् ।†

# काव्यपुरुषोत्पत्तिः ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

—— o❀o ——

(अनुवृत्ता)

पाञ्चालनैपथ्यहृतान्तरङ्गः कामो मनाङ्मोदमवाप तत्र ।
ईषच्च नृत्तादिकमन्यदस्याः वृत्तिर्नवा सात्त्वतनामिकाऽभूत् ॥ ५५ ॥

मनाक्च नैपथ्यवशीकृतोऽसावीषत्समासं वचनं यदूचे ।
पाञ्चालरीतिश्च बभूव तां ते मुनिप्रवीराः स्तुतिभिर्वितेनुः ॥ ५६ ॥

---

* आत्मनः भिन्नजातीयबहुशरीरपरिग्रहो जन्मक्रमेण भवतीत्येतत् ग्रीसूदेशदार्शनिकेन पिथगुरस्-नाम्ना प्रथमं उपदिष्टम् । मृगाकर्षणाय व्याधाः किमपि गीतं गायन्तीति अस्मद्देशे ऐतिह्यमस्ति । तद्वत् अयर्लन्द्-देशे उपद्रवकारिणां मूषिकाणां विनाशाय गीतकरणमासीत् । तदुभयमिह स्मर्तव्यम् । जन्मान्तरं येन केनापि रूपेण यदि मे आसीत् तदापि मारणार्थमपि एतादृश्यो गाथा न प्रवृत्ता इति रोसलिन्द्-अस्या भावः ।

† इह वाक्यरूपेणानुवादेऽपि पुरोवादे गाथा(वृत्त)रूपा रोसलिन्दाविषया कामुकस्तुतिरितीदमिह स्मर्तव्यम् ।

पाञ्चालदेशं परिहाय यान्तं पतिं निरीक्ष्य प्रसभं विषण्णा।
साहित्यकन्याऽनुययौ तमेनं सौराष्ट्रलाटादिषु सञ्चरन्तम् ॥ ५७ ॥

आवन्त्यकन्याः परिवव्रुरेनां सुरम्यवेषादिविभूषिताङ्गीम्।
अवन्तिदेशोद्भवया प्रवृत्त्या पाञ्चालवैदर्भविमिश्ररूपाम् ॥ ५८ ॥

तां सात्त्वतीकैशिकवृत्तियुक्तां स्तुतां मुनीन्द्रैरनुगामिभिस्ताः।
आवन्त्यकन्या अनुचक्रुरेवमन्योन्यसम्भिन्नविमिश्ररीतिम् ॥ ५९ ॥

पाञ्चालवेषेण नराः सुरूपाः स्त्रियः पुनर्दक्षिणवेषरम्याः।
अवन्तिदेशे चरितं जनानां विमिश्रभावं न तयोर्जहाति ॥ ६० ॥

अवन्तिदेशं परिहाय यान्तं पतिं विलोक्यानुययौ वधूः सा।
तं दक्षिणस्यां दिशि सञ्चरन्तं देशान् महाराष्ट्रसुकेरलादीन् ॥ ६१ ॥

साहित्यकन्या जगृहेऽथ वेषं यो दाक्षिणात्याभिमतो बभूव।
प्रवृत्तिवृत्ती च तथा सुरीतिं व्यधत्त नूनाः पतिरञ्जनाय ॥ ६२ ॥

तां चानुयाता मुनयोऽभिरूपाः सुरम्यवाक्यैः परितुष्टुवुस्ते।
वेषादिकं यच्च चकार बाला प्रेम्णाऽऽहृतं केरलकामिनीभिः ॥ ६३ ॥

मूलात्समुज्जृम्भितचारुचूडः चूर्णालकालङ्कृतफालभागः।
कक्षानिवेशात्कमनीयनीविः वेषो बभौ केरलकामिनीनाम् ॥ ६४ ॥

साहित्यकन्यामभिरूपवेषां निरीक्ष्य रागेण हृतान्तरङ्गः।
काव्योऽतिरम्यं जगृहेऽथ वेषं यो दाक्षिणात्येषु चिरात्प्ररूढः ॥ ६५ ॥

रक्तं पतिं वीक्ष्य समुज्ज्वलाङ्गी नृत्तादिकं यद्विदधे विचित्रम्।
सा कैशिकी वृत्तिरभूत्सुरम्या यां दाक्षिणात्याः कवयोऽनुचक्रुः ॥ ६६ ॥

मुनीश्वराः काव्यविधानदक्षाः वृत्तिं तदीयां परितुष्टुवुस्ते।
काव्यश्च साहित्यवधूविधेयः प्रसन्नगम्भीरवचो बभाषे ॥ ६७ ॥

रीतिस्तदीये वचने निविष्टा वैदर्भनाम्नी कविवृन्दहृद्या।
यया प्रवृत्तानि मनोहराणि काव्यानि लोकैश्चिरमाद्रियन्ते ॥ ६८ ॥

तां काव्यविज्ञाः बहुमानयुक्ताः स्तुवन्ति सर्वोत्तमकाव्यभाव्याम् ।
वृत्तिं प्रवृत्तिं सरसञ्च रीतिं साहित्यविद्याभिमतां मनोज्ञाम् ॥ ६९ ॥

प्रेम्णा निबद्धश्च विदर्भदेशे क्रीडागृहं चित्तभुवः सुरम्यम् ।
स वत्सगुल्मं नगरं प्रपन्नो गान्धर्ववत्तां जगृहे कुमारः ॥ ७० ॥

साहित्यकन्यामनुरक्तचेताः काव्यः स्वयंग्राहनिषक्तबाहुम् ।
प्रीत्या समालिङ्ग्य विमिश्ररूपः स दक्षिणाशां चिरमध्युवास ॥ ७१ ॥

रेमे तया साकमसौ समन्तात्परिभ्रमन् सत्कविवाचि नित्यम् ।
वधूवरौ तावनुरागपूर्णावभिन्नरूपेण बुधैर्गृहीतौ ॥ ७२ ॥

देशेष्वनेकेष्वपि सञ्चरन्तौ चतुर्विधां रीतिमवापितौ तौ ।
यथा समग्रञ्च भुवः प्रदेशं चतुर्विभागं गणयन्ति सन्तः ॥ ७३ ॥

वधूवरं तद्विहृतिक्रमेण तुषारशैलं प्रतिपद्य रेमे ।
योह्युत्तरस्यां दिशि भारतस्य महत्तमं रूपमवाप्य भाति ॥ ७४ ॥

यस्योत्तमाङ्गं न हि दृष्टिगम्यं पवित्रगङ्गा यत आविरास ।
देवो महान् यत्र करोति वासं देवी च गौरी सह वाग्विधात्र्या ॥ ७५ ॥

मात्रोः पुरस्तात्प्रणतौ तनूजौ दत्ताशिषौ प्रीतिवशादुभाभ्याम् ।
कवीश्वराणां वचसि स्थितौ तौ सम्पृक्तरूपौ मुदितावभूताम् ॥ ७६ ॥

सारस्वतेयं समुपास्य सन्तः कवीश्वरा ये यशसा विभान्ति ।
काव्यत्मना ते त्विह मर्त्यलोके दिव्येन रूपेण च भान्त्यमुष्मिन् ॥ ७७ ॥

यशश्शरीरेण सदा वसन्ति स्वर्गे रमन्ते सुकृतेन तेन ।
रसं निषिञ्चन्ति कवीन्दवो ये स्ववाग्विलासेन सुधासमेन ॥ ७८ ॥

इत्थं नः काव्यपुरुषो गुरुः सृष्टः स्वयम्भुवा ।
साहित्यविद्यासहितः सरसं तनुते जगत् ॥ ७९ ॥

रामेण रचितः सोऽयं प्रभवो गीष्पतेर्गुरोः ।
सारस्वतेयस्य चिरं जयताज्जगतीतले ॥ ८० ॥

---

# लोकवार्ता ॥ 16

बहूनि बहुविधानि सम्मेलनानि प्रवर्तन्ते । गतानुगतिको लोकः । अहिंसा अस्तेयं अद्रोहः सत्यमित्यादयः सामान्यधर्माः धर्मान्तराणां प्रतिष्ठाभूताः सर्वलोकयोगक्षेमसम्पत्त्यौपयिकाः शान्तिसमृद्धिहेतवः । एते सर्वथा लुप्ताः । एतान् विना लोके सुखजीवनस्य नास्ति प्रसक्तिः । तत्र न कोऽपि दृष्टिं ददाति ।

---

अनुबन्धेन चतुर्थे वत्सरेऽस्मिन् देवो नावर्षत् । अन्नाभावः परितः हाहाकारं जनयति । कारणाभावे कार्याभावः । कार्यं कामयमानैः कारणे आदरः कर्तव्यः । प्रत्युत तस्य अल्पशः स्थितस्य विध्वंसने परमादरः क्रियते । कं प्रति किं वक्तव्यम ।

---

अचिरप्रकाशिते स्वदेशमित्रे (द्राविडवार्तापत्रे) वार्ताविशेषस्य 'हतयोगः' इति शीर्षं कृतम । हठयोगः आङ्गललिप्यां असंस्कृतज्ञैः पठितः 'हतयोगः' आसीत् । संस्कृतस्य पुनरिदानीं 'हतयोगः' उपक्रान्तः क्रमादुपचीयमानो वर्तते । कलहरुचयो द्राविडाः केचित् हिन्दीप्रचारवृद्धिः देशभाषाकुण्ठने पर्यवस्येदिति मिथ्याभीतिं प्राकाशयन् । वस्तुतः द्रविडप्रदेशे संस्कृतलोपाय सा कल्पेतेति भाति । कलाशालासु उपाध्यायपदकामना हि केषांचित् शिरोमणिबिरुदसम्पादने प्रवर्तिका बभूव । तानि पदानि क्रमेण अपोह्रियन्ते । संस्कृतकलाशालासु अध्येतृसङ्ख्या अतीव सम्प्रति जहास । पञ्चषैर्वर्षैः कक्ष्याः अत्यन्तं शून्याः स्युरिति बिभिमः । अस्यां स्थितौ वार्तापत्रिकाप्रकाशकैः स्वस्वकार्यालये प्रत्येकं एकस्य संस्कृतपण्डितस्य स्थापनं यदि क्रियेत तत् पत्रिकाणां भाषाशुद्ध्ये संस्कृताध्यायिनां प्रोत्साहनाय च कल्पेत । अस्मदीया दीना वाक् किं कस्यापि कर्णे पतेत् ?

---

# प्रकृतिभेदः ॥

— पश्य रे कदलीफलानि विक्रीयन्ते । क्रीणीयाम । गृहं गतान् शिशवः प्रक्ष्यन्ति किमानीतमिति ।

— याहि रे । मार्गव्ययायैव ऋणं कृतम् । फलमन्यत् क्रेतुं प्रवर्तसे । न किञ्चिदानीतमिति शिशून् वक्ष्यामः ।

# पुस्तकपरामर्शः ॥

**Bulletin of the Government Oriental Manuscripts Library, Madras: Vol. III No. 2.**

Edited by Sri. T. CHANDRASEKHARAN, M. A. L. T., Curator.

यथापूर्वं अस्यामपि सञ्चिकायां नानाभाषामयाः नानाखण्डग्रन्थाः प्रकाश्यन्ते । तत्र संस्कृतग्रन्थौ श्रीविद्यारण्यकृतः राजकालनिर्णयः उपमन्युकृतव्याख्यासहिता नन्दिकेशकाशिका चेति द्वौ ।

यद्येवं कश्चित् प्रकाशनोपायो नाश्रितो भवेत् एषां क्षुद्रग्रन्थानां बहिरागमनस्य नैव कदाचिदपि प्रसङ्गः । अतः उपयुक्तः अभ्यर्हणीयश्चायं कोशशालाध्यक्षस्य श्रीचन्द्रशेखरार्यस्य उद्यमः निर्विघातं सुचिरमनुवर्ततामित्याशास्महे । [सं]

---

**Exercises in Sanskrit Translation: Book I.**

For the Intermediate classes)

By V. GOPALA IYENGAR M. A., Lecturer in Sanskrit, St. Joseph's College, Teppakulam P. O., Tiruchirapalli.

Price Rs.

आङ्गलमहाकलाशालासु अधीयानानां भाषापरिवर्तनं प्रधानकार्येष्वन्यतमं भवति । तत्र संस्कृताध्यायिभिः संस्कृताद् भाषान्तरे भाषान्तरात् संस्कृते च परिवर्तने कर्तव्ये तदुचितगद्यपद्यदानाय अध्यापकानां महान् अन्वेषणश्रमोऽनुभाव्यो भवति । इमं परिहृत्य तानुपकर्तुमिच्छद्भिः कैश्चित् उचितानि सुभाषितपद्यानि कथागद्यानि भाषान्तरवाक्यगुम्भांश्च सङ्कलय्य कानिचित् पुस्तकानि सन्ति प्रकाशितानि । अद्य श्रीगोपालार्येण प्रकाशितमिदं उत्तमकक्ष्यामवगाहते । अत्र संस्कृतमये प्रथमभागे आद्याश्चत्वारिंशत् अभ्यासार्थाः पद्यखण्डाः सन्ति । उपरि षष्टिर्गद्यखण्डाः । द्वितीयभागे आङ्गलीमये अशीतिः खण्डाः । अन्ते योजिता श्लोकार्थसूचना पदटिप्पणी च नूनं विद्यार्थिनां महते उपकाराय कल्पेयाताम् । [सं]

---

Registered No. M 2300.

Book XXIV || श्रीः || Nos. 5 & 6

17

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

| | | | | |
|---|---|---|---|---|
| पु. २३] कलि | ५०५१ विकृति | मकर / कुम्भ | साधारण | सं ५ |
| | | | शास्त्रानुबन्ध | सं ६ |
| | | | आहत्य | सं ६ |

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

January & February 1951

For the rate of subscription please see inside

# UDYANA PATRIKA.


Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.


## विषयाः ॥


शास्त्रानुबन्धः— कुवलयानन्दः। ३४१—३४८

1 मेनका।
2 व्याजोक्तिरत्नावळी।
3 विद्वत्सु विज्ञापनम्।
4 संस्कृतग्रन्थजातम्।
5 गजेन्द्रमोक्षः।
6 शिरिय तिरुमडल् दिव्य- [प्रबन्धः
7 यथाभिमतम्।
8 प्रकृतिभेदः।
9 पुस्तकपरामर्शः।

कन्यायाः मेनकात्वेन परिणामः इन्द्रजालमिव बभूव। मेनकेत्यवगमसमनन्तरं सोदर्यौ तां व्यमुञ्चताम्। मेनका पुनः स्वप्रहारं मनागप्यगणयन्ती स्वभर्ता खट्वात उत्थितः किमधःपतितः स्यादिति महत्या चिन्तया भीत्या च उपखट्वं धावित्वा वराहस्वामिनमवस्थापयामास। अतर्कितं तं परिणामं दृष्टवत्यौ सोदर्यौ विभ्रान्ते निश्चैतन्ये निरुद्धश्वासे क्षणं स्तब्धे अतिष्ठताम्। मेनकामुपलब्धवती कनकाम्बा तु विभ्रष्टसमागतवत्सा धेनुरिव 'हा मेनके' इति क्रोशन्त्य बाणवन्निष्पत्य एकेन प्लुतेन मेनकामालम्ब्य गाढमाश्लिष्य उज्जग्राह। अद्यापि प्रशिथिलशरीरावस्था स्वर्णाम्बा आत्मानमत्यन्तं विस्मृत्य कनकाम्बामनुगता मेनकां कनकाम्बां उभे अपि सोत्सुकं समाश्लिष्य "अयि मे नेत्र, कः कः क्लेशोऽम्ब तवागतः" इत्युक्त्वा मुक्तकण्ठं विललाप। यत् तास्तिस्रः समाश्लिष्टाः रुदित्वा आनन्दाश्रुमुचः द्रवीभूताः तत् दृषदामपि द्रावकं परितापकरं प्रेक्षणकमभवत्। कनकाम्बां स्वर्णाम्बां च शिशुमिवानुक्रमेण मेनकामुद्गृह्य चुम्बन्त्यौ विलपन्त्यौ च पश्यन् वराहस्वामी उत्कम्प्योत्कम्प्य रुदन् स्वशय्यायां विसंस्थुलोऽवर्तत। तस्य मनसि स्वसहोदर्यौ प्रति क्रोध आवेगश्च उदजृम्भेताम्। तयोर्वञ्चकतां तेषां सर्वेषां पुरतः प्रकाश्य परिभाव्य यथोचितं दण्डना कार्येति मतिरुद्भूय व्यथयति स्म।

झटिति महान्तं विभ्रमं प्राप्ता पेरुन्देवी एकद्वैर्निमेषैः धैर्यमालम्बत। रहस्यं सर्वं वराहस्वामिनो विदितमभूदित्येतत् यद्यपि निश्चितमभात् तथापि धाष्ट्र्यमाश्रित्य वाचा तं विजित्य आत्मा रक्षितव्य इति कयाचन विधया अवधारणमकरोत्। यः कोऽपि विषयः स्वस्य न विदित इति वक्तव्यमिति, मेनका नाटककारेण अपसृतवत्येवेति दृढं वाच्यमिति च अध्यवसायं कृतवती, 'अये वराहस्वामिन्, किं कार्यमकार्षीः? तवापि बुद्धिः किमेवं गच्छेत्? अनया कृतं कार्यं दृष्ट्वा पुरं हि हसति। इमां नर्तकीं अस्मद्गृहे वासयितुं किमुचितम्? अस्मद्गृहे इतः परं श्वाऽपि हि जलपानं न कुर्यात्। प्रथमं तावत् सर्वानिमान् बहिर्गमय। मदीये प्रासादे एतैः एकक्षणमात्रमपि न स्थातव्यम्। गम्यतामिति ब्रूहि' इत्युच्चध्वनिना सावष्टम्भमभिधाय वराहस्वामिनं अधिचिक्षेप। ततः पूर्वं स यथा तयोर्वाचं वेदवचनीकृत्य तदनुसारेण आचचार तथैव तदानीमपि

विनीतः शान्तो भवेदिति मत्वैव पेरुन्देव्यम्बा तथाऽभापत। किन्तु तदौषधं तदा न फलति स्म । तस्या वाचः उज्ज्वलत्यग्नौ आज्यधारासेकवत् तस्य क्रोधमुद्दीपयामासुः। रोषितः सिंह इव स बभूव। तस्य वपुर्वचनानि च सम्भ्रमवन्ति ददृशिरे । दन्तान् नरनरेति दशन् 'अयि दुष्टे, पिधेहि वाचम् । इतः इमां प्रति अमर्यादं यदि भाषिष्यसे जिह्वां ते छेत्स्यामि। वृथा मम क्रोधमुद्दीप्य मा स्म परिभवं गमः। वृत्तं सर्वं मे विदितम्। नेतःपरं मयि वालं चलय । मम पुरतो न तिष्ठ । याहि बहिः। तव दर्शने दृष्टिर्मे सङ्कोचमेति, द्रोहिणि' इत्यक्रन्दत्।

तदाकर्ण्य पेरुन्देव्यम्बा सपदि गृहीतनृसिंहावतारा 'किमरे वधवृत्तं त्वं विदितवानसि ? नाटककारवटुना सह प्रधावनवृत्तान्तं नु विदितवानसि ? तालीवनसृगाली शलशलशब्दात् भेष्यतीति नु तर्जयसि ? नर्तकवटुना दुरत्य प्रत्यागतायाः वेषं दत्वा तां मम गृहे वासयन् तत उपरि अस्मान्नु अयथार्थं भाषमाणः अधिक्षिपसि। किमरे तव बुद्धिः एवं हताऽभूत् ? नूनमेषा त्वया सह वसन्ती औषधप्रयोगं कृतवती। अत एव त्वमेवं धृष्टं भाषसे । शिरःपादविवेकं विना नृत्यसि । सगौरवं यथेमे त्रयः प्रासादात् निर्गच्छेयुः तथा किं एतान् वदिष्यसि अथ वा स्वयमेवाहं पादरक्षया प्रहृत्य निष्कासयानि ! किमस्माकं कुलम्, किं गोत्रम्। नाटककारशूद्रवटुना बहूनि दिनानि संवासं कृत्वा, तदीयमन्नं भुक्त्वा संश्लिष्य लुठित्वा आगतवतीं किं मानी कश्चित् करेणापि स्पृशेत्? अस्थाने खलु जन्म कदर्थितवानसि गर्तं गच्छतु । सपदीमान् बहिर्गमय। त्वं प्रायश्चित्तं कुरुष्व। अन्यथा नव्याः सम्बन्धिनः कन्यां न दद्युः" इति चटचटेति तिन्त्रिणीफलपातनमिव भाषणं कृत्वा हस्तपादं प्रसार्य प्रसार्य नाटकमवर्तयत्।

तदाकर्णितवतो वराहस्वामिनो रौद्राकारः कोपोऽजनि । तस्य शरीरं पटपटेत्यस्फुरत् । चक्षुषोः वह्निस्फुलिङ्गाः पतन्ति स्म । अतीव वामिनिविष्टः सः सद्य उत्थाय अग्रजाया दन्तान् भञ्जयितव्यान्मेने स्वहस्ते स्थितान् लेखान् सर्वान् अनुवाच्य रहस्यान्यशेषतः प्रकटीकृत्य तस्या दर्पं प्रशमयितुमिच्छन् तान् व्यपावृणोत्। तदिङ्गितं लघु गृहीतवती मेनका प्रेम्णा उपखट्वमुपसृत्य अनन्यश्रुतं गूढं विनीतं च भाषितुमुप

क्रम्य 'क्रोधो मा भूत्। को विशेषः यद्यकाया अवमानो भवति, अस्माकं वा ? मा। क्षमां कुरुध्वम्। पश्यत मे मुखम्।' इति ससान्त्वमन्वनाथत्। महापातकिन्याः पेरुन्देव्या विषये यदेवं पक्षपातेन मेनका अभाषत तद्वराहस्वामिनो मनसे जुगुप्सामदात्। तामपश्यन् सः अप्रीतः पार्श्वान्तरमभिपरावर्तत। तदा मेनका स्वात्मानं प्रति वराहस्वामिनि किमप्युपजपतीति मनितवती पेरुन्देव्यम्बा अभ्यधिकेन क्रोधेन 'कुलघातिनि राक्षसि, किमयि तस्य कर्णे मन्त्रमधीषे ? श्वेतावेषं नु धृत्वा आगतासि ? किं नु एतद्वेषधारणं नाटककारवटोः शिक्षितवत्यसि ? सर्वं वेषं त्वं धारयेः। मानशालिनि सत्कुटुम्बे जाता किमेवं वेषं धारयेत्। तस्य कर्णे कमपि 'कुसुकुसु'मन्त्रं पठसि ? निर्माने शुनि, याहि बहिः। मत्प्रासादं कुतो त्वयि आगतासि ? दुर्जाते कुलटे, छिन्ननासे विकले' इति अत्यन्तनीचं तां विगर्ह्य दूरादेव पाणिं पादं चोद्धृत्य प्रसार्य प्रहरिष्यामीति पोथिष्यामीति चादर्शयत। कनकाम्बा स्वर्णाम्बा, अनयोरुभयोर्देहः लुल्यति स्म। परिवादेन सङ्कुचिते भूत्वा ते निश्चलमतिष्ठताम्। मेनकायां पेरुन्देवीपक्षपातेन तदनुकूलं भाषितवत्यां तत्प्रति तत्परिवादकारिणीं पेरुन्देवीं पश्यतो वराहस्वामिनो मन उत्तप्तमासीत्। तस्य क्रोधस्तया परमां काष्ठामभजत। कृत्स्नं वपुः प्राकम्पत। तस्यां स्थितौ सः अग्रजां अक्षिणी विष्फार्य विष्फार्य अपश्यत्। स्वहस्ते स्थितं लेखं व्यलोकयत्। तद्दर्शिनी मेनका पुनस्तमुपसृत्य पूर्वतोऽपि विद्रुततरचित्तं 'अक्का यद्यद्वदति तत्तद्वदतु। न भवद्भिरुत्तरं देयम्। अस्य श्यामार्यस्य नवीनसम्बन्धिप्रभृतीनां च इतः परमत्र किं कार्यमस्ति। गम्यतामिति ब्रूत। सर्वं ततः परं वयं पृच्छेम।' इत्यभिधाय सानुनयमभ्यार्थयत। तदा विभ्रान्तं प्रवेपितं एकस्मिन् पार्श्वे स्थितं श्यामार्यमभिवीक्ष्य वराहस्वामी 'अरे श्याम, अद्य यावत् त्वामहं योग्यमसंसि। त्वत्कर्म सर्वं प्रकटमभूत्। त्वन्मुखदर्शनेऽपि सङ्कुचामि। न मे पुरतस्तिष्ठ। गतो भव। इतःपरमस्मद्गृहे त्वया न पदं निधातव्यम्। तव स्निग्धान् सम्बन्धिनोऽपि सह नय। अलं मे युष्मत्संविहितेन विवाहेन। चल बहिः' इति खण्डितं सजुगुप्सं चावदत्। तदाकर्णितवान् वरदाचार्यः तद्बन्धवश्च लज्जिता नमितशिरसोऽभवन्। श्यामार्यः पुनः असह्यं परिभवं प्राप्तवानपि किमपि वक्तुकामः वाचं व्यादाय हेषितमकरोत्।

श्यामार्येण सम्बन्धिभिश्च बहिर्गन्तव्यमिति वराहस्वामिनोक्तमाकर्णितवत्याः पेरुन्देव्याः क्रोधो ववृधेतराम्। सा श्यामार्यं दृष्ट्वा सावष्टम्भं, 'अरे श्याम, न त्वया गन्तव्यम्। सम्बन्धिमिश्च न गन्तव्यम्। मदीये प्रासादे स्थितान् युष्मान् बहिर्गमयितुं कस्याधिकारोऽस्ति। वराहस्वामी किं वेद? अस्या गणिकाबालिकाया मोहनचूर्णे व्यामुग्धोऽयं एवं प्रलपति। अयं चेत् सम्बन्धिनं बहिर्गमयति, तस्य सकाशाद् गृहीतानि अयुतं रूप्याणि कस्य पितामहो दद्यात्? किं नामेयं गर्दभरण्डा नाटककारादादाय वराहस्वामिनि दत्तवती! अरे वराहस्वामिन्, को न्वरे तवोन्मादः? शूद्रेण प्रधावितामानीय मध्येगृहं हि स्थापितवानसि? कियत्येषा मानहानिः। निष्कासय बहिः। अन्यथा अहमेव कण्ठे गृहीत्वा इयं नोत्स्यामि' इति साधिक्षेपमभाणीत्।

तस्या वचांसि वराहस्वामिनः क्षमार्हां सीमानमतिक्रम्य अगच्छन्। कोपारुणं तस्य मुखं पठीरिति स्फुटिष्यदिव अभात्। मेनकायाः प्रार्थनमपि विस्मृतवान् सः "अयि अक्क,—छे! त्वामहं यदि अक्केत्यभिदध्यां, जिह्वा मे पूयेत — युष्माभिः कृतं कार्यं सर्वं कस्यापि न विदितमिति मत्वा किं त्वं नर्तनं करोषि? तव अवमानो न जनयितव्य इति मां प्रार्थयमानां मेनकां नु उच्चावचं दूषयसि? पश्यसि नु इदम्; कोमलया लिखितोऽयं लेखः मय्यागतोऽस्ति। अस्मिन् त्वं श्यामश्च हस्ताक्षरं न्यस्तवन्तौ स्थः। अयं पठामि, शृणु" इत्युक्त्वा लेखमादाय पठितुमारभत। तावत् मेनका तस्य पादग्रहणं कुर्वती 'मा स्म पठत, मा स्म पठत। अक्का यदिच्छति तद्वदतु। यदि मे अवमानो भवति न तेन मे व्यसनम्। अक्कायाः अवमानो न भवितुमर्हति' इति अनुनाथ्य निर्बबन्ध।

स्वयं नैनामहम्मदमरकायाय विलिख्य दत्तो लेखः वराहस्वामिनमागत इति वार्तावगमसमनन्तरं पेरुन्देवी अशनिशब्दश्रावी नाग इव प्रव्यथिता पृष्ठतोऽपासरत्। मूर्धा अवननाम। सा भित्तौ साचीबभूव। सा कोमला श्यामार्य इतीमे त्रयोऽपि विपादमुत्क्रान्तजीविताः अधोनमितशिरसः निश्चला व्यतिष्ठन्त। स्वकृतमितः परं छादयितुमशक्यमिति दर्शनानुपदं ते त्रयोऽपि अन्तः कम्पं महतीं चिन्तां च प्राप्य अग्नेरुपरि तिष्टन्त इव विसंस्थुला आसन्। स एकः क्षणः एकयुगव्यापिनीं नरक-

The bees hang upon the blowing lotus coveting its honey particles and as soon as the lotus fades, unprincipled as they are, they are found roaming about sucking sweet juice in every conceivable quarter. On the other hand, the swans with their unselfish and instinctive love of the good (stem fibres) stand attached to the lotus pond and even during the adverse season are not known to have ever transferred their esteem to another. 46

यत्तेजःप्रसरैर्विशुद्ध्यति लसत्युज्जृम्भते मेदिनी
स्वं स्वं सत्वमुपाददत्युदयिनो यस्मात्समे प्राणिनः ।
निर्याता यदुपज्ञमान्तरतमोहन्त्र्यः पवित्रा गिरः
कालात्मा दिनकृत्स दैवतमयश्चण्डो जनैरुच्यते ॥ ४७ ॥

His touch purifies the world, makes it shine with beauty and teem with growing life. Each day as he rises all beings reassume their life and vigour from him. Through his medium the sacred words which dispel the darkness within first became revealed. But men refer to the Lord of the day, the Maker of Time, and the embodiment of all Gods in Himself, as the 'hot one'. 47

शोभा लोचनहारिणी सुभगता सर्वप्रसूनोत्तरा
माध्वीसंपदविच्युता मधुलिहां नित्यं तृषोच्छेदिनी ।
आमोदः स च निर्भरो जनिमतामाह्लादनाडिन्धमः
का निन्दा गुणिनः कुशेशय जनिस्ते पङ्कमध्यादिति ॥ ४८ ॥

Your beauty is charming to the eye ; you are the most esteemed among the flowers. In you the treasured up particles of honey have an unfailing flow and daily serve to quench the thirst of the bees. Your abundant fragrance is a source of delight to all men. Oh, lotus ! the

circumstance that you are born of mire is nothing deroga-tory to you who are endowed with the many excellences (fibres). 48

सौजन्यं जलजन्मनामपि गुणादानावधि प्रौढिमा
सारासारविवेचने जलपयस्संभेदभेदावधिः ।
उच्चैर्भाजनता च मानससरःस्वैरावगाहावधि-
र्वैधोवाहनतावधिश्च पदवी स्याद्राजहंसो यदि ॥ ४९ ॥

Who else but the king of swans can be so good-natured as to pick up (the threads of) merit even of lotuses (fools), can be such an adept in distinguishing good from bad as to be able to separate milk which has been mixed up with water, can enjoy such a rare privilege as the liberty to resort at will to the celestial lake *'Manasa'* for a plunge and has deserved such a high honour as to be the chosen Vehicle of Brihma Himself ? 49

आपः सन्त्यमितोऽपि शीतमधुराः पृथ्वीतले भूरिश-
स्ताः केनाप्यपहाय चातककुलं त्वय्येव यात्यर्थिताम् ।
जानन्नित्थमपि त्वमम्बुद भवेरुत्तानवीक्षो यदि
प्रत्याशामसुमात्ररक्षणविधौ बध्नात्वथेदं कुतः ॥ ५० ॥

There are waters in plenty, cool and delicious, available on earth in every direction. The Chataka birds over-looking them all for some unknown reason have chosen to wait upon you for drops of water. Oh, cloud ! you are well aware of this and yet if you with pride, thus neglect to notice them how are they, then, to hope, at least to keep body and soul together any longer ? 50

पीनानीलमनोहरस्तरलितच्छायस्तडिल्लेखया
त्वं जीमूत नदन् यथास्थितविदां मध्ये महत्त्वं गतः ।

तस्मै जीवनदायिने जलधये किं त्वङ्ग सर्वात्मना
स्वं यद्धारयसीह सन्ति बहवस्तत्राप्यभिज्ञा जनाः ॥ ५१ ॥

With a comely rotund bluish form set off to advantage by the flashes of the lightning (playing over you), oh cloud ! you call out majestically and the unsophisticated folk admire your greatness But friend, there are several on the earth who well know that you owe your entire existence to the ocean who gives you sustenance (water).
51

लावण्यामृतवीचिभिः शिशिरितं रूपं मनोहारि त-
त्स्वर्लोकेऽप्सरसामकल्पयदजो नूनं यथार्थाभिधः।
येनानङ्गकलाविदग्धमनसां तस्मिन् दविष्ठे पदे
जायन्तेऽध्वरिणो रणे च निहतास्तस्योपभोगक्षमाः ॥ ५२ ॥

Aja (Brahman) indeed deserves his name (sheep) or else how could he be so foolish as to have made the heaven the abode of the water-nymphs upon whose fair forms play the cool waves of the ambrosia of beauty, for, in that place which is far away from the reach of the gallants skilled in the amatory arts, the sacrificing priests and the warriors falling in battles alone become qualified to enjoy their beauty.
52

शृङ्गी चेत्स शिवोपवाह्यवृषभस्सर्वैः पुरो नम्यते
पक्षी चेत्स मुरारिवाहविहगः प्राप्तस्तथा पूज्यताम्।
दंष्ट्री किं न भवस्यहीनविधया विघ्नेशितुर्वाहनं
कस्मान्मूषक, भोस्तवैव फलितं प्रत्यालयं मर्दनम् ॥ ५३ ॥

If Siva's vehicle the great Bull is worshipped by all first, because of his possessing two horns, if the bearer of Vishnu, the bird (Garuda) attained such universal esteem because of his possessing two wings, are you not in a

similar way, then, the carrier of God Vinayaka and distinguished also by two sharp teeth which you possess? Oh (unfortunate) rat! why is it that to your lot alone has fallen this state of being belaboured in every home? 53

मित्रं नः किल चन्दनश्चिरतरं तेनेह मोदामहे
गोष्ठीं कः सुहृदो निरन्तररसां नैकान्ततः कांक्षति ।
इत्येवं व्यपदेशतः स्थिरतया वासोऽहिभिः स्वीकृतः
शुद्धस्वादुमरुत्प्रसूतिनिलये धूर्तैरगस्त्याचले ॥ ५४ ॥

The sandal tree is our great friend We desire to enjoy his company for a long time; for who does not desire ardently to live in the sweet company of a dear friend? Thus alleging the roguish cobras adopted as their permanent dwelling the mountain of Agastya which is the primal source of the pure and delicious (southern) breeze. 54

यः पूर्वं मलयाचलादुपगतः सौरभ्यसारः किले-
त्यभ्युद्गम्य गवाक्षवर्त्मनि रसादङ्गैः समालिङ्गितः ।
सोऽयं संघटिताररासु वसतिष्वन्तर्गृहे शायिना-
मुद्वेगाय नृणां स्मृतोऽपि भवति प्रालेयकालेऽनिलः ॥ ५५ ॥

The wind blowing in was formerly welcomed through open windows with loving embraces as coming from the Malaya mountain and as being laden with rare fragrance. But the wind now in the foggy season is dreaded even in thought by men who lie close in the interior of their houses with every door fast shut up. 55

आयातो मधुरुल्लसद्द्रुमलतासौभाग्यनाडिन्धमः
कालेऽस्मिन् वस निष्कुटे फलवति स्वैरं रणत्कोकिले ।
कृच्छ्रादित्यनुनीय याचितसुखावासोऽपि काकः क्षणा-
द्विष्टापस्किरणोद्धुरः क्वचिदभूत्कुर्वन् शतं विक्रियाः ॥ ५६ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २४] कलि ५०५१ विकृति { मकर } साधारण सं ५
{ कुम्भ } शाखानुबन्ध सं ६
आहत्य सं ६

## विद्वत्सु विज्ञापनम् ॥

अस्मत्सम्प्रदायसिद्धो राज्यपरिपालनप्रकारो लुप्तः । शासितृत्वे स्थिता आङ्गलाः स्वलाभे दत्तदृष्टयोऽपि अस्मदीयानामाचाराणां धर्माणां च विषये अप्रविशन्तः नातीव उपद्रवकारिण आसन् । तेषु गतेषु लब्धं स्वातन्त्र्यं दुरुपयुञ्जानाः शासनाधिकारे स्थिताः अस्मदीया जनाः कृत्यानि सर्वथा न कुर्वन्ति, अकृत्यानि अत्यादरेण कुर्वन्ति । अश्रुतपूर्वं अदृष्टपूर्वं क्लेशं वयमिदानीमनुभवामः । न अशनम् । न आच्छादनम् । जनानां अर्थाशा, अहङ्कारः, अन्यहिंसारुचिश्च अभ्यधिकाः । प्रातरुत्थितस्य एकैकस्य जनस्य हृदये किं वस्तु कुत्र लभ्येत कथं सम्पाद्यमिति अवसादकारिणी चिन्तासन्ततिः । क्षुद्बाधापीडितानां पामरजनानां इतःपरं का नु प्रवृत्तिर्भवेदिति महता आतङ्केन विवेकिनो दुःस्थिता भवन्ति । देवो न वर्षति । नदीकूपतटाकाः शुष्काः । भूमिर्न फलति । बहुषु ग्रामेषु द्विपदां चतुष्पदां च पातुं जलमपि न लभ्यत इति, बहवो ग्रामेभ्यो निर्गत्य बहिर्याता इति च ज्ञायते । सर्वस्यास्यानर्थस्य सन्निहिते काले अवसानं भविष्यतीति मन्तुं नास्त्यवसरः । अज्ञानामसमर्थानामस्माकं हस्तगतमिदं राज्यं एवं केवलमनर्थैकफलं संवृत्तम् ।

अत्र प्रतिविधानं चेत् कर्तव्यं तत्र एक एवास्ति मार्गः, योऽस्मच्छास्त्रसम्प्रदायसिद्धः । इमं ज्ञात्वा अवधार्य तदनुगुणमाचरितुं दृढं सङ्क-

स्य संस्कृतज्ञैः तत्प्रियैः सुजनैः धैर्येण बहिरागस्य जनानां प्रतिबोधनं कर्तव्यम् । संस्कृतपण्डिताश्चेदुदासते हतो लोको हत एव । न उद्धार-प्रत्याशा कथमपि कर्तुं शक्या । न वयमेतन्न जानीमः यद्वयं संस्कृत-पण्डिताः अशक्ताः परमदरिद्राः परमुखप्रेक्षावृत्तयः अनादृताः अलक्ष्य-भूता इति । अथापि तु गत्यन्तरविरहात् ‘ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्’, ‘न हि कल्याण-कृत् कश्चित् दुर्गतिं तात गच्छति’ इति भगवत उपदेशं हृदि धारयद्भिः धैर्यमुत्साहं चात्मनः सम्पाद्य जनानां समीचीनमार्गस्थापने यतितव्यम् ।

ये संस्कृतस्य रक्षणे अभिवर्धने च श्रद्धालवः तैः सुतरामस्मिन् विषयेऽवधातव्यम् । लोकयात्रायां कथञ्चिदुपयोगविरहे न संस्कृतं रक्षितुं शक्यम् । कालक्रमेण नश्येदेव । उपयोगश्च जनानामुत्तमविवेकसम्पा-दकतया आत्मगुणाभिवृद्धिहेतुतया धर्मश्रद्धासम्पत्तिनिदानतया अनया रीत्या सुभिक्षसुखजीवनपरमकारणतया च । इदं तत्त्वं केचिदेव जानते । यथैतत्सर्वे जानीरन् तथा करणं संस्कृतविदुषां प्राप्तम । अयमेषां धर्मः

एतदर्थं आदौ पण्डितैः परस्परसमालोचनं कर्तव्यम । बहु परामृश्य इदं कार्यमित्यवधारणीयम् । यथावधारणं आर्जवेन श्रद्धया उत्साहेन च तन्निर्वर्तने यतितव्यम् । सर्वमिदमर्थायत्तम । कस्य सकाशे अस्य महतः कार्यस्य साधनायापेक्षितोऽर्थो विद्यते । को मनस्वी इयन्तमर्थं दास्यति । अनया चिन्तया सर्वे मनोरथा भज्यन्ते । अस्मदीया अर्थश-क्तिरत्यन्तमल्पा । लज्जया नातोऽधिकं विवृत्य वक्तुमिच्छामः । इमामत्यल्पां शक्तिमतिक्रम्यैव अस्मिन् पत्रिकाप्रकाशनसाहसे वयं प्रावर्तामहि । व्ययो महान् । आयोऽत्र अष्टमांशोऽपि न भवति । शोभनः कालो भविष्यतीति प्रत्याशाया अयं महिमा यद् दुर्भरेऽपि पीडाकारिण्यपि च व्यये इमां पत्रिकां इमानि त्रयोविंशतिं वर्षाणि अनुवर्तितवन्तः स्मः । यदा यदा मनसः कश्चिदवसादोऽभवत् पत्रिका च उपरमयितव्येत्यभात् तदा तदा स्वयमेव स्वात्मनः एवं प्रतिबोधनमकुर्म– सर्वविधेऽपि सङ्कटे आत्मा न किं ध्रियते बन्धवः किं नोपक्रियन्ते । शिशवः किं न पोष्यन्ते । अस्यां परं कथमन्यत्वबुद्धिः । इयं परं कथमधिको भरः । “यदधीतवन्तः स्मः, यदुपजीवामः

तस्य संस्कृतस्य कृते कोऽपि व्ययो न कार्यः । नीचयाऽपि वृत्त्या अन्यः सर्वो भरो बोढव्यः' इति कोऽयं न्यायः ? कोऽयं विवेकः । न । यावज्जीवं यया कयाऽपि विधया संस्कृतसेवा कार्या । तद्द्वारा लोकसेवा कार्या—इति । यदीदमुचितं यदीदं धर्म्यं तर्हि संस्कृतज्ञः, संस्कृतपक्षपाती, सर्वोऽपि जनः एवं विमृश्य एवं दृढं सङ्कल्प्य संस्कृतसेवां कर्तुमर्हति । एकैकोऽपि एतदर्थं सानुरोधं सनिर्भरं प्रार्थनीय इति मतिं कृत्वैव इदं विज्ञापनं विद्वत्सु कर्तुमद्य प्रवृत्ताः स्मः । येन केनापि हेतुना उपेक्षामकृत्वा लोकस्य दुरवस्थां संस्कृतस्य गौरवं च सम्यगवधाय शक्येन सर्वेण प्रकारेण अस्माकं साहाय्यं कर्तव्यमिति प्रार्थयामहे । पत्रिकाया अयं चतुर्विंशो वत्सरः । पञ्चविंशवत्सरसमाप्तेः पूर्वं सुहृदां साह्येन अर्थसौकर्यं तथा पुष्कलं विधातुमुद्दिशामः, यथा—

1) अस्खलितकालं विवृद्धरमणीयाकारा पत्रिका बहिरवतरेत् ।
2) कमनीयगद्यपद्यनिबन्धकरणस्पर्धामुपक्षिप्य विजयिभ्यः पारितोषिकं समग्रं प्रदाय संस्कृताध्ययनश्रद्धां वर्धयितुं अवकाशो भवेत् ।
3) सर्वजनापेक्षितविवेकप्रदोपदेशकरणनिपुणाः पण्डिताः तदुचितां शिक्षां यत्र लभेरन् तादृशधर्मविद्याशिक्षाशाला काचित् स्थाप्येत ।
4) संवत्सरस्य सकृदपि वा संस्कृतभाषिणां एकत्र समवायः परिकल्प्येत ।
5) तत्र तत्र स्थित्वा वा सञ्चर्य वा अनुष्ठानोपदेशाभ्यां जनानां ये विवेकमुत्पादयन्ति तेभ्यः पण्डितेभ्य उचितो बहुमानः क्रियेत च ।

अस्मिन् संस्कृतकैङ्कर्ये तद्द्वारा लोककैङ्कर्ये भगवत्कैङ्कर्ये च एकैकस्य संस्कृतप्रियस्य सम्बन्धं वयमभिवाञ्छामः । तदर्थं एकैकं सादरं प्रार्थयामहे ।

---

"अङ्गेन गात्रं नयनेन वक्त्रं
न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितं च
न राजते चन्द्रमसा निशा च ॥"

# संस्कृतग्रन्थजातम् ॥

—:o:—

3

## वैदिककाण्डः—ऋक्संहिता ।

एवं ऋक्संहितायाः स्वरूपं प्रति किञ्चिदभ्यधाम । अथेदा तत्प्रतिपाद्यविमर्शः कार्यः । तत्रेदं प्रथमं चिन्तनीयं भवति । तदर्थविज्ञा क उपाय इति । न्यायव्याकरणादिसर्वशास्त्रनिपुणा अपि साहितीसाग पारंगता अपि न सहायान्तरनिरपेक्षं स्वातन्त्र्येण वेदार्थं विज्ञातुमीश इति नैतद्विस्तरेण वक्तव्यम् ।

'य एव लौकिकाः शब्दाः त एव वैदिकाः त एव च एषामर्थाः इति लोकवेदाधिकरणे वैदिकानां शब्दार्थानां लौकिकेभ्योऽनन्यत मीमांसकाः प्रतिपादयन्ति । तथाऽपि लौकिकसंस्कृतमात्रव्युत्पत्तिमत वैदिकः शब्दराशिर्दुरवगाह इति प्रत्यक्षमनुभवामः । एकैव हि भाष चिरमनुवर्तमाना भाषास्वाभाव्यात् क्रमेण कञ्चन विपरिणामं भजते येन निपुणनिरूपणे सति ऐक्यावगमस्य शक्यत्वेऽपि पूर्वावस्थापेक्षय कश्चिद्भेदः अवर्जनीयो भवति । न्यायादिशास्त्रेष्वपि हि नवीनग्रन्थमात्रा ध्यायिनो न प्राचीनान् भाष्यवार्तिकादिग्रन्थानक्लेशेनावगाढुं प्रभवन्ति । तत्र किं वक्तव्यं वैदिकग्रन्थान् प्रति । वैदिकग्रन्थेष्वपि ऋक्पदानि सुप्राचीनानि अतिविलक्षणानि प्रौढानामपि दुरधिगमार्थानि ।

यथा शास्त्रसंबन्धिनः अन्ये च लौकिका ग्रन्थाः व्याख्यानसाहाय्येन गृहीतार्था भवन्ति तथा वैदिका अपि भवितुमर्हन्तीति सर्वेषामिह मतिर्जायेत । अस्ति च रावणभाष्यम्, कौशिकभाष्यम्, गूढार्थरत्नमाला, इत्येतेषु, भवस्वामि, राहदेव,श्रीनिवास, माधवदेव कृतेषु च प्राचीनेषु भाष्येषु दुर्लभेष्वपि सायणकृतमद्भुतं ऋक्संहिताभाष्यम् । अनेन सुग्रहो व्युत्पन्नमतीनां वेदार्थः । प्रथमं ऋक्संहितां आङ्गलयामनुवदितुं प्रवृत्तः विल्सन् (Wilson) नाम आङ्गलः संस्कृताभिज्ञः इदं सायणभाष्यमेव उपजीवति स्म । किन्तु ततः परं रात् Roth) प्रभृतयः केचित् वेदविमर्शका उदभूवन् ये सायणभाष्यं सर्वथा तिरस्कृत्य स्वातन्त्र्येण तदर्थोपलम्भे तीव्रमुद्यमं चक्रुः । एषामभिप्रायः अयम् । ऋग्वेदकालात् अतिव्यवहितः सायणादीनां व्याख्यातॄणां कालः । या स्थितिः ऋग्दर्शिनां प्राचां ऋषीणां,

या तेषां ऋङ्मन्त्राणां आविष्करणसमये चित्तवृत्तिः, यत् तैः प्रयुक्तानां पदानां वस्तुतः प्रतिपाद्यं, सर्वमेतत् यथाऽवगन्तुं एते अर्वाञ्चो भाष्यकारा न प्रगल्भन्ते । यज्ञकर्मवासनालिप्तबुद्धिः विमर्शमार्गपराङ्मुखश्च सन् सायणः तस्य तस्य पदस्य स्थलान्तरप्रयोगमविचिन्त्य तत्तत्स्थलमात्रे व्याकरणप्रक्रियया काञ्चित् व्युत्पत्तिं प्रदर्श्य व्याख्यानं करोति । तेन स्वाभिमतं कञ्चिदर्थं आसु ऋक्षु निदधाति, न तु ऋषीणां हृदयस्थमर्थं प्रतिपादयति । भाषाशास्त्रपरिचयसंपत्त्या चरितविमर्शपद्धतिपाटवेन च विशिष्यमाणा वयं सायणादिभ्यो भारतवर्षपण्डितेभ्यो वेदार्थविज्ञाने प्रभवामस्तरामिति । एवं मन्यमानो रात् (Roth) ऋक्संहितायां एकैकं पदमादाय एतावत्सु स्थलेष्वस्य प्रयोगः, तत्र सर्वत्र अनुगतोऽयमर्थः, इति प्रतिपादयन् कञ्चन संस्कृतकोशं प्रकटीचकार ।

कोटिद्वयमपि परित्यज्य माध्यस्थ्यमवलम्बमाना अन्ये अंशतः स्खालित्ये सत्यपि सायणसाहाय्यमन्तरा ऋक्संहिताप्रवेश एव दुर्लभ इति, सर्वथा तदुपेक्ष्य युक्तिमात्रावलम्बिनः रात्-अस्य बहूनि स्खलितानि दृश्यन्त इति, उभयत्र युक्तिविरुद्धं यदस्ति तत्परित्यज्य युक्तियुक्तं परिगृह्य ऋगर्थनिर्णये यत्नः कार्य इति च प्रतिपादयन्ति ।

न परं सायणः निरुक्तकारो यास्कोऽपि ऋचां सांप्रदायिकमर्थं न जानातीति सर्वेषामेषां विमर्शकानामभिप्रायः । एकस्यैव पदस्य व्युत्पत्तिं बहुधा निरुक्तकारो दर्शयति । यथा अश्विदेवताप्रदिपादकं 'नासत्यौ' इति पदमादाय "सत्यौ न पुनरसत्यौ इति केचित् । सत्यस्य नेतारौ इत्यन्ये" इति परेषां मतं प्रदर्श्य 'नासाजन्यौ' इति स्वसम्मतां व्युत्पत्तिं दर्शयति । एवं तत्र बहूनाचार्यान् निरुक्तकार उदाहरति ये विरुद्धाभिप्राया दृश्यन्ते । यदि सांप्रदायिक एकोऽर्थो निश्चितः अधिगतो भवेत् का प्रसक्तिः एवं बहुविधस्य व्याख्याविकल्पस्य ? निरुक्तकारादत्यन्तमर्वाचीनः सायणः क्वचित्क्वचित् निरुक्तोक्तमप्यर्थमुपेक्ष्य स्वातन्त्र्येण कञ्चिदर्थं वदति । सांप्रदायिकत्वं तस्यार्थस्य जानन् कथमेष तमुपेक्षेत । स्वतन्त्रं व्याचक्षाणश्च सायणः मिथो विरुद्धमनेकमर्थं प्रतिपादयति । यथा शारदपदस्य क्वचित् 'एकस्मै संवत्सराय परिकल्पितम्' इत्यर्थमाह । अन्यत्र 'नूतनं, एकस्मै संवत्सराय परिकल्पितं वा' इति । पुनरन्यत्र च 'शरन्नाम्नोऽसुरस्य संबन्धि' इति । तदेवं ऋक्संहितायां यानि कानिचित्कठिनानि पदानि सन्ति, तेषु एकस्यापि अर्थनिश्चयं सम्प्रदा-

यानुरोधेन वा निर्वचनबलेन वा यास्कसायणयोरेकस्मादपि न वयम- धिगच्छाम इति (Macdonel) माग्डानल् वदति । ब्राह्मणकारा अपि ऋषयः ऋक्संहितार्थं यथावन्न जानन्तीति एते अर्वाचीना विमर्शका मन्यन्ते। ब्राह्मणकालात्पूर्वमेव तदर्थसंप्रदायो विच्छिन्न इति वदन्ति। अत्रेदं निदर्शनमाहुः 'हिरण्यपाणिस्सविता' इति ऋङ्मन्त्रे सवितुः हिर- ण्यपाणित्वं विशेषणं श्रूयते। अत्र ब्राह्मणानि ऋषेरभिप्रायमविज्ञाय कथां कथयितुमारभन्त – 'सवितुर्हस्तः छिन्नो बभूव। ततःपरं हिरण्मयं हस्तं कृत्वा तत्र आसंजनमकार्षुः' इति।

सर्वमेतत् पाश्चात्यानां तत्प्रक्रियात्रलम्बिनामस्मदीयानां च विमर्शन- कौशलं वस्तुतः कियन्तमादरमर्हतीति वैदिकसंप्रदायज्ञैः अत्रत्यैः परीक्ष्य युक्तायुक्तविवेचनेन प्रतिबोधनं नूनं कर्तव्यम्। किन्तु चिरात् वैदिकमार्गे परिश्रमस्य लुप्तत्वान्नवीनैः कृतानां सर्वेषां विमर्शनानां भाषान्तरैकमय- त्वाच्च न अत्रत्या विद्वांसः तत्परिचये वा प्रतिवचने वा श्रद्दधति। इह तु किञ्चित् तत्र प्रयत्यते । वेदभाष्यं सर्वथा अनादरणीयमिति यत् रात् (Roth)उद्घोषयति स्म तत्र समुचितमुत्तरं गोल्ड्स्टक्र् (Gold stucker) नाम्ना पाश्चात्य एव ददौ। तदीया पदपदार्थोपलम्भनपद्धतिः अतिसमी- चीनेति यद्वदन्ति तत्रास्माकमपि न विप्रतिपत्तिः। किन्तु मीमांसायां व्यु- त्पत्तिमतां सुपरिचितैव सा पद्धतिः। तामेव च न परं सायणः किन्तु सर्वे प्रमाणवचनव्याख्यातारोऽनुसरन्ति।

अयं यौगिकोऽर्थः, अयं रूढः, अयं लाक्षणिकः, अयं गौणः इति प्रतिपदं विवेचनं कुर्वन्ति । यस्मिन्नर्थे भूयिष्ठः प्रयोगः तस्मिन् शक्तिः अन्यत्र लक्षणा । इमं विवेकं संपादयितुं कुत्रार्थे भूयान् प्रयोग इति परिशीलनं कर्तव्यम् । एवं विवेचयन्त एते अज्ञातार्थानां पदानामर्थ- ज्ञानाय यत्र तानि पदानि प्रयुज्यन्ते तानि स्थलान्तराणि किं न पर्या- लोचयेयुः। मीमांसायां स्मृतिपादे 'शास्त्रस्था वा तन्निमित्तत्वात्' इति सूत्रेण शब्दार्थसन्देहे वेदमेव पर्यालोच्य निर्धारणं कार्यमिति असति बाधके स एक एवार्थः यत्र यत्र स शब्दः प्रयुज्यते तत्र तत्र ग्राह्य इति च सुनिरूपित- मास्ते। यथा अन्येषु अङ्गोपाङ्गेषु तथा मीमांसायामपि अतिनिपुणो मेधावी सायणः किमेतं मीमांसान्यायं कदाचिदपि विस्मृतवान् स्यात्। यदि यत्र क्वचिदर्थान्तरं प्रतिपादयति तत्र मुख्यार्थस्यानुपपत्तिरस्तीति स मन्यत इति ग्रहीतव्यम्। यत्र तु अर्थद्वयं तुल्यवद् भाति तत्र विकल्पमन्तरा नान्य

गतिः। संप्रदायाविस्मरणेऽपि 'एवं संप्रदायिकोऽर्थः। अस्माकं तु एवं भाति' इति ग्रन्थकारा लिखन्ति। संप्रदायाधिगते अन्यस्मिन् वाऽर्थे निर्वचनादिकं यदि तुल्यन्यायं भवति तर्हि तत्रार्थान्तरपरिग्रहो न कथमपि वारयितुं शक्यते। तस्मात् व्याख्याविकल्पं दृष्ट्वा यत्सायणभाष्यमेते सावद्यं वदन्ति तदनुचितम्। 'नासत्यौ' इत्यत्र अश्विदेवताप्रतिपादकत्वं तावत् निगमव्यवहारादिवशात् स्थितम्। तत्र व्युत्पत्तिप्रदर्शने यदि निरुक्तकाराणां बुद्धिभेदो भवति का तत्र हानिः। अव्युत्पन्ना एव केचन शब्दा इति हि चिरकालादारभ्य केषाञ्चिन्मतमनुवर्तते। तत्र सर्वेषां शब्दानां धातुजत्वे अभिनिवेशं दर्शयन्तो निरुक्तकारा बहुधा व्युत्पत्तिं प्रदर्शयन्ति चेत् संप्रदायसिद्धशब्दार्थाधिगमस्य न काचिदनुपपत्तिः। वेदे यावन्ति रूढानि यौगिकानि वा पदानि प्रयुक्तानि तेषां सर्वेषामेव व्युत्पत्तिप्रदर्शनसंप्रदायोऽपि अविच्छिन्नः प्रवर्तत इति न कस्यचिदभिमतम्। प्रत्युत विच्छेदमेव संभाव्य पदार्थविज्ञानोपायं निगमनिरुक्तादिकं दर्शयन्ति। वेदे प्रयुक्तानां शब्दानामार्यैः अर्थस्यापरिज्ञाने म्लेच्छेषु तदर्थस्य प्रसिद्धिसत्त्वे स ग्राह्यः न तु निरुक्तादिसाहाय्येन स्वयं कल्पनीय इति 'चोदितं तु प्रतीयेत अविरोधात्प्रमाणेन' इति स्मृतिपादे जैमिनिस्सिद्धान्तयति। एवं अतिमहति वैदिकग्रन्थराशौ कतिपयानां पदानामर्थव्युत्पत्तिसंप्रदायविच्छेदस्य संभावितत्वेऽपि वाक्यार्थाधिगमो वा सूक्तार्थतात्पर्यपरिज्ञानं वा वैदिकसन्ततिप्रसूतानां विदुषां न दुस्संपादम्। अद्यतनी शास्त्रीया विमर्शसरणिः, भाषाशास्त्रपरिचयः, इत्यादिसामग्रीपौष्कल्यविरहात् केषाञ्चित्पदानामन्यथा अर्थप्रतिपादनं यद्यपि भवेत् तथाऽपि तावन्मात्रेण वैदिकसंप्रदायस्थैः कृतं भाष्यमनादरणीयमिति घोषणं नैव युक्तम्। विलसन् (Wilson) अनेन प्रतिपादितरीत्या निरूढवासनान्तरा देशान्तरीयाः सुपरिचयेऽपि यथावत् संस्कृतग्रन्थतात्पर्यं ग्रहीतुं नेशते। पदादिगणने अनुक्रमणीनिर्माणे पुरुषविशेषादिनामसङ्कलने एवंविधेषु कार्यान्तरेषु च आलस्यं विना परिश्राम्यन्तस्ते सफलयत्ना भवेयुः न पुनरस्मदीयानां ग्रन्थानां तात्पर्याधिगमे।

यदेते यास्कोक्तं कौत्समतमाश्रित्य किञ्चिद्वदन्ति तत् तत्र निरुक्तग्रन्थार्थाग्रहणात्। न तत्र सर्वेषां मन्त्राणां वाच्यार्थशून्यत्वं कौत्सोक्तमित्युच्यते। किन्तु मन्त्रेषु अर्थविवक्षा नास्तीति। यदपि ब्राह्मणकारा अपि ऋषयः ऋक्संहितार्थं न जानन्तीति तदप्ययुक्तम्। हिरण्यपाणित्वं सवितुः अद्यतनैः कीदृशमुच्येत। तस्य किरणाः सर्वलोकक्षेमङ्कराः

तत्प्रकाशेन लोके धनधान्यसमृद्धिर्भवति । तेन स एव हिरण्यं ददातीति दानाय सर्वथा हिरण्यं पाणौ बिभर्तीति स्तूयेत । यद्वा श्लाघ्यत्वात् हिरण्य-तुल्यपाणिरस्येति । किमेषोऽर्थः ब्राह्मणकाराणां ज्ञातुमशक्यः । किम-यमर्थः तथा दुर्ग्रहः ? अथ वा ते तावत् ? जडाः नोभयमपि । किन्तु अद्यतनलौकिककाव्यवत् अन्यापदेशातिशयोक्त्यादिवक्रोक्तिमालाजटि-प्राचां शब्दव्यवहारमार्गं यथावदवगन्तुमक्षमा इमे अद्यतना विमर्शका-तेष्वज्ञानमारोपयन्ति ।

ब्राह्मणकालिकानामृषीणामतिमहतोऽज्ञानस्य निदर्शनतया इदमाहुः दशममण्डले एकविंशतिशततमे हिरण्यगर्भसूक्ते अन्त्यां विना नवसु ऋक्षु चतुर्थः पादः 'कस्मै देवाय हविषा विधेम' इत्येकरूपो दृश्यते। अत्र 'कस्मै' इति चतुर्थ्यन्तः किमिति सर्वनामशब्दः । तथा सति 'कः स देवः यस्मै हविर्देयम्' इति देवताविशेषान्वेषणतत्परत्वे प्राचां ऋषी-णां स्फुटं प्रतीयमाने, शतपथे 'प्रजापतिर्वै कः । तस्मा इदं हविः' इति यदु-च्यते तत्सर्वथाऽन्यथाप्रतिपत्तिमूलकमिति । यजुर्वेदे 'काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा' इति स्वाहान्तेषु मन्त्रेषु प्रश्नार्थत्वं तावन्न युज्यते। 'काय' इत्यसर्वनाम्ना उपक्रमात् प्रश्नार्थत्वाभावाभिप्रायः अत्र दृढी-भवति । इमास्वपि ऋक्षु प्रथमे पादत्रये यच्छब्दोपबन्धात् अनुवादरू-पत्वावगतेः तेन च स्तुत्यस्य देवस्य पूर्वमेव सुज्ञातत्वप्रतीतेः चरमे पादे प्रश्नार्थकत्वं नोपपद्यत इत्यवधार्यते । तदेवमेतैरर्वाचीनैः कृतस्य ब्राह्मण-कारनिरुक्तकारभाष्यकारादिप्रदर्शितार्थदूषणस्यानुपपन्नतां प्रादर्शयाम। इतःपरं ऋक्संहितायाः किं प्राधान्येन प्रतिपाद्यमिति विमर्शः क्रियते।

---

# गजेन्द्रमोक्षः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

भक्ताजामिलोपाख्यानं पूर्वसञ्चिकायां प्राकाश्यत । प्रपन्नगजेन्द्रमोक्ष-कथाऽत्र कथ्यते। रौप्यायसहिरण्मयैः त्रिभिर्मुख्यैश्शृङ्गैः पयोनिधेः दिशां च दीपनात् त्रिकूट इति विश्रुतः क्षीराब्धिद्वीपस्थः श्रीमान् योज-नायुतेनोन्नतो विस्तृतः रत्नैर्गैरिकादिधातुभिश्च विचित्रितैरन्यैः शिखरैः नानाविधद्रुमैर्लताभिर्गुल्मैर्गिरिनदीजलानां घोषैश्च ककुबादिकं रोचयन्

कश्चिद्गिरिवर आस्त। स पयोनिधेरूर्मिभिः समन्तात् विशोध्यमानप्रत्यन्तपर्वतः पलाशवर्णैर्मरकतात्मकैरश्मभिः श्यामलां भूमिं बिभ्रत् क्रीडत्सिद्धादिजुष्टद्रोणीकः किन्नरादिसङ्गीतसन्नादसम्भूतगुहानादश्रवणेन सिंहान्तरागमनशङ्कयाऽसहनान् स्ववीर्यं श्लाघमानान् मृगेन्द्रानभिगर्जयन् आरण्यविविधमहिषादिव्रातसङ्कुलद्रोणीभिः कलकण्ठविहङ्गमशोभमानचित्रद्रुमसुरोद्यानैः स्वच्छोदैः सरित्सरोभिः मणिमयबालुकैः पुलिनैः देवस्त्रीमज्जनामोदशालिभिस्सलिलैरनिलैश्च भृशमभ्राजत। तस्य त्रिकूटस्य द्रोण्यां सुरयोषितां क्रीडास्थानं नित्यफलपुष्पैर्मन्दारपारिजातादिभिर्द्रुमैः परितोऽलङ्कृतं महात्मनो वरुणस्य ऋतुमन्नामोद्यानमविद्यत। तस्मिन्नुद्याने सुविपुलं काञ्चनपङ्कजादिप्रसूनैः कलनिस्वनैः पक्षिभिर्नित्यर्तुभिस्तीरजैः कदम्बकुन्दादिपादपैश्च भूषितं सरो व्यलसत्। एवं स्थिते यदीयमदसुरभिसमीरप्रसारमात्रात् केसरिप्रभृतयो मृगाः प्रतिपक्षिणो मतङ्गजाश्च भयात् पलायन्त, अन्ये क्षुद्रा हरिणादयो मृगा यस्यानुज्ञानेन निर्भया अचरन्, तद्गिरिकाननाश्रयो वारणयूथपस्स एकदा घर्मतप्तः तृषाऽर्दितैः करेणुकलभैरनुद्रुतः गरिम्णा गिरिं परितः प्रकम्पयन् मदाशनैरलिकुलैर्निषेव्यमाणः पङ्कजरेणुरूषितं तटाकमारुतं विदूरादेव जिघ्रन् मदविह्वलेक्षणः सकण्टकं वेणुवेत्रोपेतं विशालं गुल्मं वनस्पतींश्च प्ररुजन् तस्य कासारवरस्य निकटं द्रुतमाटीकत। तस्मिन् पद्माकरे विगाह्य अद्भिरात्मानं स्नपयन् गतक्लमो हेमारविन्दोत्पलरेणुवासितं स्वपुष्करोद्धृतं निर्मलं जलं कामं पिबन् दुर्मदान् करिशाबकान् करेणूश्च स्वशुण्डादण्डोद्धृतशीकराम्बुभिः गृहीव पाययन् संस्नापयन् बृंहितं कलयन् कृपणो भगवन्मायया समागतं दुःखं नालोचत। तत्र दैवचोदितो बलीयान् कश्चिद्ग्राहः तं चरणे रुषाऽग्रहीत्। दैवादेवं व्यसनमापन्नमतिबलं बलीयसा ग्राहेण बलेन विकृष्यमाणं यथाबलमात्मानं त्याजयितुं प्रयतमानं नागवरं प्रति दीनधियः करेणवो रुरुदुः। पृष्ठत उपोद्बलका अपरे दन्तिनो दुःखात्तारयितुं नाशक्नुवन्। एवं नियुध्यमानयोरिभपुङ्गवनक्रयोर्मिथोऽन्तर्बहिश्च विकर्षतोस्सतोः सहस्रं समा अत्यक्रामन्। अमराः समानबलयोस्तयोस्तद्विकर्षणं विचित्रममन्वत। सहस्रसंवत्सरानन्तरं भूयसा कालेनाम्भसि विकृष्यमाणस्यावसीदत उत्तमदन्तावलस्य उत्साहशक्तिशारीरबलेन्द्रियशक्तीनां महान् व्ययोऽजायत। जलौकसो ग्राहस्य तु

ता अधिकास्समपद्यन्त । स मुख्यः करी इत्थं यदा प्राणसंशयमियाय तदा विवशः आत्ममोक्षणेऽसमर्थस्सन् चिरं विचिन्त्य 'आतुरं माम् इमे ज्ञातयो हस्तिन एव मोचयितुं न क्षमन्ते, अहं तु न प्रभुरेव, कुतः करिण्यः पारयेयुः । अतो यस्य सङ्कल्पात् ममायं ग्राहग्रहः, यो बलिनः प्रचण्डवेगात् अभिधावतो मृत्युमहासर्पात् अत्यर्थं भीतं प्रपन्नं परिपाति, यद्भयात् मृत्युः प्रधावति, तं शरणं व्रजेम' इति निरधारयत् । स एवं निश्चित्य मनो विषयान्तरेभ्यः प्रत्याहृत्य इन्द्रद्युम्नाख्यपूर्वजन्मन्यभ्यस्तं परमं जप्यं स्तोत्रमित्थं जजाप । 'ब्रह्मणे भगवते नमः । ब्रह्मादीनामपीशं परमपुरुषमभिध्यायेम । इदं चिदचिदात्मकं जगत् यस्मिन्नवस्थितं प्रलीनं च, येन कर्त्रा इदं जगत् सृष्टं रक्षितं च, यस्मादुपादानभूताद्ब्रह्मणः उपादेयं जगत् अनन्यत्, यः स्वरूपस्वभावविकारराहित्यात् स्वरूपान्यथाभावमापद्यमानात् अचेतनात् स्वभावान्यथाभावमापद्यमानाच्चेतनाच्च विलक्षणः, तस्मिन् स्वायत्तसत्तादिमति मोक्षाय प्रार्थनाद्यन्वितरक्षाभरन्यासं तनोमि । यः स्वस्मिन्नेव कदाचिदात्मीयसङ्कल्पेन देवादिनामरूपविभागवत्त्वेन स्थूलतया प्रकाशमानं कदाचिन्नामरूपविभागत्यागेन सूक्ष्मरूपतया प्रलीनं कार्यावस्थं कारणावस्थं च चिदचिदात्मकं जगत् नित्यं सङ्कोचविकासादिरहितापरिच्छिन्नधर्मभूतज्ञानाश्रयस्सन् ईक्षते, अनन्यकारणस्स मे संसारबन्धमपनुदतु । द्विपरार्धावसानरूपेण समयेन पृथिव्यादितत्त्वेषु तत्कार्येषु लोकेषु तत्पालकेषु ब्रह्मादिषु च कृत्स्नशः पञ्चत्वमितेषु सत्सु निरतिशयसुक्ष्मदशापन्नं तमोरूपमचिद्द्रव्यमासीत् । तस्य तमसः कार्याक्षमत्वापादनरूपनियमनं कुर्वन् यो विभुर्विराजते, नटानभिज्ञानां तत्स्वरूपमिव यस्य स्वरूपमतीन्द्रियार्थदर्शनयोग्यानां देवानाम् ऋषीणां च दुरवबोधमन्यस्य यथावस्थितज्ञानव्यवहारयोरगोचरश्च, अत एव यस्य सङ्कल्पो दुरवगमः, तत्तद्देवमनुष्याद्यवस्थजीवसम्बन्धिनानाविधविचित्रकर्मानुगुणनियमनरूपो यस्य सङ्कल्प इत्थन्तया दुर्ज्ञानः, समाऽवतु । यस्य नित्यसुखरूपं स्वरूपं दिदृक्षवो मुनयो विषयेष्वसक्ताः साधुधर्मैर्युक्ताः उच्चावचेषु भूतेषु स्वात्मसमदर्शिनस्सन्तो योगापरिशुद्धमतिभिस्तस्यासाक्षात्कारेऽपि दुष्करनिरन्तरोपासनपरिशुद्धमनसा तत् साक्षात्कुर्वन्त्येव, यस्मिन् कर्मायत्तानि जन्मकर्मनामरूपाणि न प्रसजन्ति विकारस्य पदं न निदधाति, यः साधूनां परित्राणाय दुष्कृतां विनाशाय च धर्मस्य

न्यादिकाले अकर्मायत्तानि जन्मादीनि स्वेच्छयैवोपादत्ते, स मे रक्षणोपायः। स्वयंप्रकाशाय, युगपत्सर्वं स्वतः सदा पश्यते, लोकत्रयमाविश्य प्रशासनेन भर्त्रे, निर्दुःखज्ञानानन्दस्वरूपाय, अपवर्गप्रदाय, साधूनां प्रसन्नाय, खलानां घोराय, चेतनाचेतनशरीरकाय, सर्वेषां पाञ्चरात्राद्यागमानां वेदानां स्रोतसां महार्णवायेव पर्यवसानभूमये, परमप्राप्याय संसारिणां प्रच्छन्नाय, मुक्तानां शास्त्रावश्यानामकर्मवश्यानां प्रकाशमानाय, मादृक्प्रपन्नपशुकर्मबन्धपाशविमोचनाय, स्वयं प्रकृत्यपरवशाय, अपारकरुणाय, स्वप्रवणानां शब्दादिविषयेभ्यो वैमुख्यमापादयते, देहपुत्रमित्रगृहवित्तजनेषु सक्तैर्दुष्प्रापाय, भगवते नमो नमः। धर्मार्थविमुक्तिकामा यं भजन्त इष्टं धर्मादिफलमकामितमन्यत्फलञ्चाप्रुवन्ति स मे मोक्षं दिशतु। फलाभिसन्धिरहिता भगवत्प्रपन्ना अत्यद्भुतं सुमङ्गलञ्च यस्य चरितं गायन्तः तद्गुणानुभवानन्दसमुद्रमग्नाः यस्मात् मूर्खत्वान्मया प्रार्थितमपवर्गमपि न वाञ्छन्त्येव, तं नित्यमतीन्द्रियमणोरणीयांसं महतो महीयांसं कालदेशवस्तुपरिच्छेदरहितमाद्यमवाप्तसमस्तकामं परमपुरुषमीडे। स देवः, असुरः, मर्त्यः, तिर्यङ् वा न, स्त्री पुमान् षण्डो वा न, नापि प्राणी गुणकर्मवान् वा। कल्याणगुणानां चिदचितोश्च साक्षात् देवत्वादिजात्यादीनां चिदचिद्द्वारेण चाश्रयः स जयतात्। नाहमिह जिजीविषामि। अमुनाऽहङ्कारममकारास्पदभूतेनानेकपजन्मना न कोऽपि पुरुषार्थः। यस्य दिष्टेन न पुनरावृत्तिः तमात्मज्ञानावारकात्कर्मणो मोक्षं काङ्क्षामि। उपासनविधूतदर्शनविरोधिपुण्यपापरूपकर्माणो योगिनः उपासनविशोधितेन मनसा यं प्रत्यक्षयन्ति, तं योगेशं प्रणमामि। प्रणामातिरिक्तं तत्प्रसादनोपायं तु न जानामि। अप्रतिहताघटितघटनात्मकशक्तिजगत्सृष्ट्यादिव्यापाराय, प्रपन्नपालाय, अजितेन्द्रियदुरवगमयाथात्म्याय तुभ्यं नमो नमः। अयं जनो यन्मायामूलकदेहात्माभिमानेन हतप्रायमात्मानं न वेद, तमनतिक्रमणीयमाहात्म्यं भगवन्तमहं वन्दे।' इति। इत्थं गजाग्रेसरो ब्रह्मविष्णुशिवादिशब्दरहितं स्तोत्रमकलयत। अथापि तदुक्तविशेषणानि ब्रह्मादिषु निरवकाशानीति ते नोपससृपुः। वस्तुसामर्थ्यात् पुरुषोत्तम एव तानि विशेषणान्यन्वितानीति स्वान्यदेवताङ्कः स एव हरिः छन्दोमयेन गरुडेन समुह्यमानः चक्रायुधश्च सन् संस्तुवद्भिर्देवैस्सह यत्र द्विपतल्लजः तं देशमविलम्बितमभिजगाम। अन्तस्सरसि उरुबलेन

ग्राहेण गृहीत आर्तस्स गरुत्मन्तमध्यासीनमुपात्तसुदर्शनं मुकुन्दं विलोक्य 'रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्' इत्युक्तन्यायेन साम्बुजनिजकरमुत्क्षिप्य कृच्छ्रात् 'नारायणाखिलगुरो भगवन्नमस्ते' इति गिरमाह स। ततो माधवः पीडितं तं वीक्ष्य कृपया सुपर्णोऽपि मन्दगतिरिति ततोऽवरुह्य सग्राहं तमाशु सरस उद्धृत्य बहिर्निरकासयत्। ततः स्वचक्रेण विपाटितमुखात् ग्राहात् तममराणां पश्यतां सतां मोचयामास। तदा विधिशिवपुरोगमाः देवर्षिगन्धर्वाः केशवस्य तत्कर्म शंसन्तः कुसुमानि ववृषुः। दिव्या दुन्दुभयो नेदुः। गन्धर्वा ननृतुः जगुश्च। ऋषयश्चारणास्सिद्धा मधुसूदनं तुष्टुवुः। यो देवलशापेन ग्राहो जातः पूर्वस्मिन् जन्मनि हूहूर्नाम गन्धर्वसत्तमश्च, स तेन मुक्तः सद्यः प्राक्तनाद्भुततमगन्धर्वरूपधृत् कीर्तनीयगुणसत्कथमच्युतं शिरसा वन्दित्वा गायन् गानप्रीतेनेशेनानुकम्पितश्च सन् तं प्रदक्षिणीकृत्य, प्रणम्य च द्रुहिणादिजनस्य प्रेक्षमाणस्य सतः स्वकीयं लोकमलभत। स्तम्बेरमनायको हृषीकेशस्य स्पर्शात् उत्सृष्टकर्मबन्धः पीताम्बरत्वचतुर्भुजत्वादिरूपं तत्सारूप्यमासादयत्। स प्राचीने जनने पाण्ड्यदेशाधिपतिः द्रमिडेषु श्रेष्ठ इन्द्रद्युम्नाभिधानो राजा च सन् विष्णुभजनपरायणो बभूव। जटाधरस्तपोनिष्ठो मलयाद्र्याश्रमवासी स्नातस्स कदाचित् पुण्डरीकाक्षस्याराधनकाले समाहितमना गृहीतमौनव्रतश्च सन् तं समर्चयामास। तदा शिष्यगणैः परिवृतो महायशा मुनिरगस्त्यो यदृच्छया तमाश्रममायातस्तं तूष्णीमवस्थितमर्घ्यादिकमसमर्पितवन्तं रहस्युपासीनमालोक्य कुपितः 'असाधुरयमशिक्षितमतिरधुना विप्रानस्मानवमन्यते। अतः यथा गजस्स्तब्धमतिस्तथैवायमज्ञो भवतु। द्विरदभावमेव भजताम्' इति तस्मै शापं दत्त्वा सानुगो ययौ। स राजर्षिरिन्द्रद्युम्नः तं शापं प्रारब्धपापफलमेव निश्चिन्वन् परमात्मस्मृतिविनाशकं कुञ्जरत्वमविन्दत। प्राक्जन्मनि पद्मनाभाराधनप्रभावस्तस्य गजभावेऽपि तस्यानुस्मरणमावहत्। एवं वारणतां विनाश्य पारिषदतां गमितेन तेन स्वपार्षदैश्च युक्तो वासुदेवः गन्धर्वसिद्धविबुधैरनुगीयमानकर्मा शङ्खं प्राध्माय विबुधानीकं हर्षयन् वैनतेयवाहनश्च सन् अद्भुतं स्वभवनमजुषत। इयं गजेन्द्रमोक्षकथा शुचीनां प्रातरुत्थाय पठतां शृण्वतां च स्वर्गकीर्त्यादीष्टं साधयति। कलिकल्मषदुस्स्वप्नाद्यनिष्टं निवर्तयति च।

---

குடல்மாலை, சீரார் திருமார்பின் மேல்கட்டி, செங்குருதிச்
சோராக் கிடந்தானைக் குங்குமத் தோள்கொட்டி
ஆரா வெழுந்தா னரியுருவாய். 21

विदारितं हिरण्यस्य हृदयं विजयश्रीमतः स्वकीयदिव्यवक्षःस्थलस्योपरि मालाकारमबध्नात् । स्रवद्रक्तरुधिरं तमसुरं कुङ्कुमाङ्किते निजभुजे निष्पीडयामास । निष्पीड्य च सरभसाट्टहासोद्भटो बभूव नृसिंहरूपी भगवान् । ईदृशी संश्रितविरोधिषु निष्ठुरता भक्तवत्सलस्य ।

அன்றியும், பேர்வாமன னாகிய காலத்து, மூவடிமண் 22
தாரா யெனக்கென்று வேண்டிச் சலத்தினால்
நீரேற் றுலகெல்லாம் நின்றளந்தான் மாவலியை
ஆராத போரி லசுரர்களும் தானுமாய்
காரார் வரைநட்டு நாகம் கயிறாக
பேராமல் தாங்கிக் கடைந்தான். 23

अथ च कदाचित् महोदारं महाबलिमनुग्रहीतुं महावामन रूपेणावततार । रूपेणेव नाम्नापि वामनो बभूव । तदानीं "पदत्रयपरिमितां मृदं मह्यं देहि" इति महाबलिमेत्य ययाचे । छलेन च दानोदकं स्वीचकार । समनन्तरमेव रोदसी व्याप्य स्थित्वा पदद्वयेन भुवनत्रयं तृतीयेन च पदेन महाबलिं विचक्रमे । अन्यं च कूर्मावतारवृत्तान्तं शृणुत मातरः । पुरा देवानां असुराणां चाविश्रान्तं महदायोधनमभूत् । तदात्वे उभयेऽपि क्षीराब्धिं मथितुमारभन्त । एकतोऽसुराः, अन्यतः स्वयमेवावस्थाय देवकार्यमकरोत् । देवाः निमित्तमात्रमासन् । मेघमेदुरं मन्दराद्रिं मन्थानं कृत्वा, वासुकिं योक्त्रं कृत्वा, गिरिरयं यथा स्वस्थानात् न चलेत् तथा स्वयमेव धृत्वा क्षीराम्बुधिममथ्नात् ।

திருத்துழாய்த், தாரார்ந்த மார்பன் தடமால் வரைபோலும்
போரானை பொய்கைவாய் கோட்பட்டு நின்றலறி
நீரார் மலர்க்கமலம் கொண்டோர் நெடுங்கையால்
நாராயணா! ஓ! மணிவண்ணா! நாகணையாய்!
வாராயென் னாரிடரை நீக்காய்! 24

दिव्यतुळसीदामालङ्कृतवक्षाः परमपुरुषः क्षीराब्धिमथने स्वयं प्रावर्ततेति नन्वियं सौलभ्यकाष्ठा। इत्थं प्रयोजनान्तरसङ्गिनां कृते कृतेयमुपकृतिः। अनन्यप्रयोजनविषये कृतमनुग्रहविशेषं शृणुत— पीनोन्नतो गिरिरिव स्थितः कश्चित् गजेन्द्रः वप्रक्रीडापरिणतः सरसि ग्राहेण ग्रस्तो बभूव। "गज आकर्षते तीरे ग्राह आकर्षते जले"। कालक्रमेण चातिमात्रमवसन्नः स्वव्यापारात् निवृत्तो भूत्वोच्चैराचक्रन्द गजेन्द्रः। जलार्द्रं फुल्लं कमलं बिभ्राणः दीर्घमुद्धृतो भुज एक एवावशिष्ट आसीत्। शेषमशेषमप्यङ्गं नीरे निमग्नम्। तेनैकेन हस्तेनेत्थमुच्चैराक्रोशति स्म "नारायण! सर्वस्वामी ननु भवान्! भर्तुः भरः खलु भृत्यः। त्वदाश्रये नारे निराश्रयोऽहं म्रिये। हे मेचकमणिद्युते! दर्शनमात्रेण तापहरं किल तव दिव्यरूपम्। भोः नागशायिन्! शेषोऽहं हस्तशेषः। त्वं तु शेषे निश्शङ्कं शेषे। एको नागो भवताऽनुगृह्यते; अयं तु नागो ग्राहेण बलिना निगृह्यते। एहि! ममार्तिमिमां महतीं निवर्तय। तव दिव्यचरणयोः कमलमिदं समर्प्य वीतशोको म्रियेय।"

---

எனவெகுண்டு, தீராத சீற்றத்தால் சென்றிரண்டு கூறாக
ஈரா வதனை யிடர்கடிந்தா னெம்பெருமான்!
பேரா யிரமுடையான் பேய்ப்பெண்டீர் நும்மகளை
தீராநோய் செய்தா னெனவுரைத்தாள். 25

इत्थमाक्रोशति भक्ताग्रेसरे नागेन्द्रे श्रुत्वेदमाक्रन्दितं अतिमात्रं चुकोप रिपवे ग्राहाय। नाद्यापि शान्तस्स कोपावेगः। 'आर्तनादश्रवणात् प्रागेव हन्त नानुगृहीतो नागराज' इति निर्विण्ण एव बभूव। तेनैव कोपावेगेन सत्वरमाजगाम। न तु वाहनेन। 'तस्यै त्वरायै नमः' इति ह्याहुः। ग्राहं द्वेधाविभिद्य गजेन्द्रस्य शुचमशमयदस्मत्स्वामी।

अयि भोः भ्रान्ताः भीरवः! नामसहस्रवान् देव एव युष्मत्कन्यायाः परैरपरिहार्यमाधिमिममुत्पादयामास, इति वदति स्म सा दैवज्ञा। 'नामसहस्रवान्' इति उपचक्रमे। स एवेत्युपसञ्जहार च। प्रियवृत्तश्रवणमात्रमपि तादात्विकं तापनिवर्तकमिति मत्वा विस्तरेणावतारवृत्तान्तान् उपवर्णयामास। 'श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते निर्विश्य कर्णविवरैः हरतोऽङ्गतापम्' इति च रुक्मिणीसन्देशः।

---

சிக்கெனமற், றாரானு மல்லாமை கேட்டெங்களம்மனையும்
போரார்வேற் கண்ணீ ரவனாகில் பூந்துழாய்
தாரா தொழியுமே தன்னடிச்சி யல்லளே மற்
றாரானு மல்லனே யென்றொழிந்தாள். 26

नान्यो यः कोऽपि ममाऽऽधिहेतुः इति सुदृढं श्रुत्वाऽस्मन्माताऽपि ससंभ्रममवलोकयन्तीः प्रियसखीरेवमवोचत् । अयि सख्यः युद्धोन्मुखैरिव ससंभ्रमैः धनुरायतैः अक्षिभिः किमेवमीक्षध्वे । माभूदितःपरं भयं भवतीनाम्। यमाह दैवज्ञा स एव चेदाधिनिदानं दिव्यतुलसीदलं व्यथामुपशमयितुं न दद्यात् किम् ? स्वस्य दासी खल्वियम । 'भयकृत् भयनाशनः' इति 'औषधम्' इति 'वैद्यः' इति च विदितः किल स पुरुषोत्तमः। दिष्ट्या नान्यो यः कोऽपि व्याधिहेतुरस्याः। इत्युक्त्वा निर्भया विरराम मम माता।

---

நானவனைக், காரார் திருமேனி கண்டதுவே காரணமா
பேராப் பிதற்றுத் திரிதருவன். 27

अहं तु कन्दुकक्रीडासक्ता यदा तदीयं मेघश्यामं दिव्यरूपमपश्यम्– तदा प्रभृति रूपान्तरं गता भूताविष्टेवावशालापान् कुर्वती स्वैरं सञ्चरामि।

---

பின்னையும், ஈராப் புகுதலு மிவ்வுடலைத் தண்வாடை
சோரா மறுக்கும் வகையறியேன். 28

अपि च सुशीतोऽपि वातः विषदिग्ध इव शरः शरारुर्मम शरीरमिदं विशति, मोहयति, सन्तापयति। बाधनप्रकारमित्थमिति विशिष्य न जाने वक्तुम। वाचामभूमिरपकारः।

---

சூழ்குழலார், ஆரானுமேசுவ ரென்னு மதன் பழியை
வாராமல் காப்பதற்கு வாளா விருந்தொழிந்தேன்
வாராய் மடநெஞ்சே வந்து. 29

अयि कुटिलकेशपाशाः वयस्याः, दिष्ट्या प्रियेषु सौभाग्यफला भवति भवतीनां चारुता चिकुरस्य। ये केचित् मां परिवदेयुरिति परनिन्दानागमेनाऽऽत्मानं गोपायितुं तदानीं जोषमासम्। अन्यथा इदानी-

मिव तदैव साहसेऽस्मिन् प्रवृत्ता भवेयम्। अयि सख्यः मम दशावि
पश्यत। मोहं गतं मम हृदयं संबोध्य एवमवोचम्—'अयि सु
मानस! एहि, मम प्रियस्य सकाशं गच्छेः।'

மணிவண்ணன், சீரார் திருத்துழாய் மாலை நமக்கருளி
தாரான் தருமென் றிரண்டத்தி லொன்றதனை
ஆரானு மொன்றாதார் கேளாமே சொன்னக்கால்
ஆராயு மேலும் பணிகேட்டதன்றெனிலும்
போரா தொழியாதே போந்திடுநீ யென்றேற்கு
காரார் கடல்வண்ணன் பின்போன நெஞ்சமும்
வாராதே யென்னை மறந்ததுதான். 3

गत्वा, मणिवर्णो दिव्यरूपोऽसौ श्रीमत् तुळसीदामास्माकं सा
ग्रहं दास्यति? न दास्यति वा? इत्यन्यतरं विषयं तदीयकल्याणगु
विद्वेषिणो यथा न शृणुयुः तथा कान्तमेकान्ते ब्रूहि। त्वदुक्तिसि
श्रुत्वा 'मधुरा मधुराऽऽलापा किमाह मम भामिनी' इत्येवं आदरातिश
प्रकाश्य पुनस्सङ्गमोपायं विमृशतु वा; दुष्यन्त इव "किं वैषा परिणीत
पूर्वा? इत्येवं प्रत्याख्यातु वा। यथा तथा वा भवतु। त्वं तु न न गच्छे
अवश्यं गच्छेः। इत्यवोचम्। तथैव नीलार्णवसवर्णं तमनुगतं मम हृ
यम्। अद्यापि न निवर्तते। विसस्मारैव माम्। 'नपुंसकमिति ज्ञात्वा
प्रति प्रेषितं मनः। तत्तु तत्रैव रमते हताः पाणिनिना वयम्"। 'ब्रह्मलोक
मभिसंपद्यते न च पुनरावर्तते' 'नोपजनं स्मरन्निदं शरीरम्' इति श्रुति
रर्थवती कृता।

வல்வினையேன், ஊரா ருகப்பதே யாயினேன், மற்றெனக்கி
காராய்வா ரில்லை அழல்வாய் மெழுகுபோல்
நீரா யுருகுமென் னாவி. 3

मदीयं हृदयमपि मयि निर्दयम्। ईदृशं सुमहत्तरं मम दुरितम्
तदेकदेवता तेन परिभूता जानपदानां परिहासास्पदमासम्। अन्तर
ङ्गेण स्वान्तेनापि सन्त्यक्तायाः मम न केप्यन्ये सहायाः सन्ति। बहि
परिसरस्थजतुवत् जलीभूय द्रवति ममात्मा। 'अक्लेद्योऽशोष्य एव च'
इत्युक्त स्वभावमत्येति।

# यथाभिमतम्॥ III. 2

सिलिआ–जानासि क इदं कृतवान् ?

रोसलिन्द्–स किं मनुष्यः ?

सिलिआ–हारश्च यं त्वं कदाचित् तस्य कण्ठे आमुञ्चः। मुखे रागो जायते ?

रोसिलिन्द्–दयस्व, कः ?

सिलिआ–अहो देवदेव! प्रायेणेदमसम्भवि, यत् सुहृदोः सम्प्रतिपत्तिर्भवतीति। पर्वतास्तु भूकम्पेन चलिता मिथः सङ्गता भवेयुः।

रोसलिन्द्– न। कस्तु सः ?

सिलिआ–किमिदं सम्भावितम् ?

रोसलिन्द्– न। अत्यन्तं दीनं अत्यन्तमादृतं च त्वामहं अद्य याचे। ब्रूहि मे कः स इति।

सिलिआ–चित्रं चित्रं बतबत महच्चित्रमेतद्विचित्रम्। वाचमतीतं चित्रम्।

रोसलिन्द्–साधु तावन्मामुपहससि। वेषधारणेऽपि किमहं प्रकृत्या पुरुष इति मन्यसे ? इतः परं विलम्बे सति तस्य एकमङ्गलं उपलब्धव्यस्य दक्षिणसमुद्रस्य तुल्यं स्यात्। अभियाचामि ब्रूहि मे त्वरितं कः स इति। स्खलन्त्याऽपि वाचा ब्रूहि यथाऽयं छन्नो मनुष्यो मुखात् ते निष्क्रामति, मद्यमिव कृशकण्ठात् भाजनात् अभ्यधिकं वा एकधा, नैव वा किञ्चित्। अभियाचामि मुखात् ते पिधानमपनय, येन तव वार्ता पिबेयम्। स किं देवसृष्टः* ? कीदृशो मनुष्यः ? तस्य शिरः किं उष्णीषस्यार्हम् चिबुकं वा श्मश्रुणः।

सिलिआ– न। तस्यास्ति अल्पं श्मश्रु।

रोसलिन्द्–नूनं देवो महत्तरं करिष्यति यदि स कृतं स्मरिष्यति। यथाकालं भवतु तस्य श्मश्रुवृद्धिः, तच्चिबुकज्ञानं प्रति मे यदि विलम्बं न करोषि।

---

* उत त्वयैव मदुपहासाय सृष्टः ? कल्पित इति यावत्।

सिलिआ—स स युवा आर्लण्डो यो मल्लस्य पादं तव हृदयं च उभयं एक-स्मिन् क्षणे आक्षिपत्।

रोसलिन्द्—मैवम्। पिशाचः परिहासग्राही। तत्त्वाभिनिविष्टा स्त्रीवद् भाषस्व।

सिलिआ—सत्यं ब्रवीमि स्वसः स एव।

रोसलिन्द्—आर्लण्डो ?

सिलिआ—आर्लण्डो।

रोसलिन्द्-हा इदं दिनम् (हा हताऽस्मि)। अनेन पुरुषवेषेण किमहं कुर्याम् ? त्वयि पश्यन्त्यां स किमकरोत् ? किमभाषत ? कथमदृश्यत ? किंवसनः ? सोऽत्र किं करोति ? किं मां प्रति प्रश्नमकरोत् ? कुत्र वसति ? कथं त्वया व्ययुज्यत ? पुनरपि कदा तं द्रक्ष्यसि ? एकेन पदेन उत्तरं मे देहि।

सिलिआ—प्रथमं त्वया गर्गन्तुअ*अस्य मुखं मदर्थे ऋणीकृत्य आनेतव्यम्। तत् अतिमहत् पदं अस्मिन् युगे यस्य कस्यापि मुखे न मास्यति। एषां विशेषप्रश्नानां 'एवम्' इति 'न' इति चोत्तरदानं न समुचितम्।

रोसलिन्द्—अथ किं नु स जानाति अहमस्मिन् वने वसामीति, पुरुषवेषेति च ? मल्लयुद्धदिने यथा तथैव किं नु सः अभिनवयौवनो दृश्यते ?

सिलिआ—कामुकप्रश्नानामुत्तरदानापेक्षया त्रसरेणूनां गणनं सुकरम्। यथाऽहं तमद्राक्षं तदहमुदाहरामि, तत् त्वं मत्वा आस्वादय। कस्यचिद् वृक्षस्याधस्तात् तमद्राक्षं, फलमिव पतितम्।

रोसलिन्द्— दैवो वृक्ष इत्यभिधानमर्हति, यदा स एवंविधं फलं पातयति।

सिलिआ—भाषितुं मे अवसरं देहि, आर्ये।

रोसलिन्द्—उपरि ब्रूहि।

सिलिआ—तत्र स दीर्घं शयान आसीत् व्रणितो वीर इव।

रोसलिन्द्—यद्यपीदृशं दर्शनं शोच्यं तथाऽपि अस्य स्थानस्य तदुचितमेव।

सिलिआ—स्तम्भय ते जिह्वाम्। असमये सा परिधावति। मृगयुरिव स सन्नद्ध आसीत्।

---

* एवंनामा कश्चन आकारतोऽतिमहान् राक्षसः।

रोसलिन्द्—अहो अमङ्गलम्, स मे हृदयमृगं हन्तुमागच्छति।
सिलिआ—तवोपगानं विना अहं गातुमिच्छामि। श्रुतिभ्रंशं मे करोषि।
रोसलिन्द्—अहं स्त्रीति किं त्वं न जानासि। यदाऽहं किमपि चिन्तये तदा तद् भाषितव्यम्। मधुरे, उपरि ब्रूहि।
सिलिआ—विक्षेपं मे करोषि। मन्थरं तावत्। अभ्येति किलात्र सः?
रोसलिन्द्- स एव। अपसर्प, तं निर्वर्णय। (उभे अपक्रामतः)

# प्रकृतिभेदः॥

(1)

—तण्डुला न सन्ति। रात्र्यर्थं किं क्रियताम्।
—किं क्रियताम्। यावदस्ति तावत् पच। त्वं शिशुश्च भुञ्जाथाम्। अहं तूष्णीं शयिष्ये। तक्रं वा यदि किञ्चिदस्ति पास्यामि। पश्य यदि भूमिचणकाः सन्ति। तान् वा कतिपयान् खादिष्यामि।
—तथा भवतु। किं कर्तव्यम्। काल ईदृशः।

(2)

—भोजनकालो ह्यतिक्रामति। कुतः तूष्णीमुपविष्टाः स्थ।
—अपर्याप्तास्तण्डुला इति मे विदितम्।
—अल्पमेवान्नं पक्ववती स्याः। तत् त्वं शिशुश्च भुञ्जाथाम्। मम यत्किञ्चिद् भविष्यति।
—साधु तावत्। मम किं यत्किञ्चिन्न भवेत्। स्थितं यथार्हं विभज्य भुज्यते। भवतः क्षुधितान् स्थापयित्वा मया उदरं पूरयन्त्या किं लोके कर्तव्यम्।

# पुस्तकपरामर्शः ॥

**Bullatin of the Government Oriental Manuscripts Library, Madras. Vol. IV No. 1**

Edited by Sri. T. CHANDRASEKHARAN M. A. L. T., Curator,

अस्यां सञ्चिकायां प्रकाश्यमानाः ग्रन्थाः —

१ वैद्यहृदयानन्दः— (संस्कृतम्)
२ तिरुक्कलुक्कुण्ड्रमालै (तमिळ्)
३ पद्मनायकचरित्रमु (तेलुगु)
४ हारदनीति (कन्नड)
५ कृषिगीता (मलयालम्)
६ पानिपतबखर (महाराष्ट्री)
७ काम्-इ- नवायत् (पेर्सियन्)

एषु संस्कृतमयः आद्यः ज्वरप्रतीकारः, अतिसारप्रतीकारः, काशप्रतीकार अरोचकप्रतीकारः, रसादिज्ञानम् इति पञ्चप्रकाशात्मना विभक्तः। महि आयुर्वेदे तत्तद्रोगप्रशमनाय उपयोक्तव्यानां भेषजानां साधनं बहु प्रयत्न सापेक्षं भवति। तत् अवदधानाः बहवः निपुणा वैद्याः अल्पप्रयत्नसाध्यानि औषधानि स्वस्वपरिचितया भाषया तत्तत्साधनोपायप्रतिपादनपुरस्स उपदिशन्ति। तादृशेषु ग्रन्थेषु अन्यतमोऽयम् अत्यन्तं जनानामुपयुक्त एव किं तु इह उपयुक्तानां तत्तत्पदार्थनाम्नां देशभाषाभिः विवरणं यदि स प्रकाश्येत तर्हि उक्तरीत्या अस्य ग्रन्थस्य उपयोगः सर्वसुग्रहः स्यात्।

---

प्रातः सुप्रसृतैर्दिवाकरकरैः फुल्लां मधुस्यन्दिनीं
मोहादन्तरनुप्रविश्य सुचिरं माभूर्मधुव्याकुलः।
भास्वानस्तमियात्कृती यदचिरात्सा पद्मिनी च स्वयं
सङ्कोचं नियतं तदा मधुप हा ! बन्दी वृथा नङ्क्ष्यसि ॥

ले. शे. श्रीनिवासशर्मा (चिदम्बरम

Registered No. M 2300.

Book XXIV ॥ श्रीः ॥ Nos. 7 & 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २४] कलि ५०५१ { विकृति मीन, कर मेष } साधारण सं ७
शास्त्रानुबन्ध सं ८
आहत्य सं ८

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

March & April 1951

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूर्षद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । ३४९—३५६

1 मेनका ।
2 व्याजोक्तिरत्नावली ।
3 सौराज्यम् ।
4 संस्कृतग्रन्थजातम् ।
5 श्रीरामपादुके ।
6 यथाभिमतम् ।
7 प्रकृतिभेदः ।
8 पुस्तकपरामर्शः ।
9 शिरिय तिरुमडल् दिव्यप्रबन्धः
10 प्रतिबोधनम् ।

वेदनां तेषां मनस्युदपादयत्। महतो जनसङ्घस्याग्रे विवस्त्रं स्थापिताः यथा लज्जया पीडिताः स्युः तथा ते त्रयोऽपि महतीं वेदनामन्वभूवन्। तेषां शरीराणि अरत्निमात्राणि सङ्कुचितान्यासन्। किङ्कर्तव्यतामूढाः प्रशान्ता अभवन्। तदा तत्र अल्पस्यापि ध्वनेरभावात् सर्वं निश्शब्दमासीत्।

तस्यां स्थितौ तैराश्रितस्य गृहस्य बहिः यस्य कस्याप्यागच्छतो मनुष्यस्य पादन्यासशब्दो महानुदभवत्। अनन्तरक्षणे पालकप्रत्यवेक्षकः समयसञ्जीव्यार्यः पालकभटाश्चत्वारश्च स्वाधिकारोचितवेषाः प्रादुरभवन्। समयसञ्जीव्यार्यः अकिञ्चिज्ज्ञः परमसाधुरिव वराहस्वामिनोऽग्रे उद्धतं स्थित्वा सलामकरोत्। तथा लोहितशिरः कीटान् झटिति तत्र आविर्भूतान् दृष्टवन्तः स्त्रीपुंसाः सर्वे सम्भ्रान्ताः त्रासं विभ्रमं च प्रापुः। मेनका कनकाम्बा स्वर्णाम्बा च एकतः अपसृता अभवन्। काकतालीयन्यायेन स्वापराधप्रकटीभवनतत्क्षणे नाटकप्रेक्षणकवत् पालकागमनदर्शिनां पेरुन्देवी कोमलाश्यामार्याणां त्रयाणामपि अधोजठरे अग्निरपतत्। स्वग्रहणायैव पालका आगता इति ते मेनिरे। महता भयेन तेषां गात्राणि सर्वशः स्विन्नानि प्रचकम्पिरे। जङ्गमशवा इव निश्चला निष्क्रिया आसन्। किमर्थं ते तदा आगता इति नितान्तं विस्मितो व्यामुग्धश्च वराहस्वामी शय्यात उन्नम्य उपविश्य "सञ्जीव्यार्य, आगन्तव्यमागन्तव्यम्। अस्यां चतुष्पद्यामुपवेष्टव्यम्" इत्यभ्यधिकेन प्रेम्णा प्रतिगृह्य किञ्चिद् दूरे स्थितां चतुष्पदीं निर्दिश्य उपचचार। स्वविषये दैवमिव प्रादुर्भूय बहु परिश्रम्य स्वचारित्रं रक्षितवान् महानुभावः स एवेति क्षणेन ज्ञातवती ललनामणिर्मेनका सद्यस्त्वरितं गत्वा कियति दूरे स्थितां चतुष्पदीमादाय वराहस्वामिनः समीपे निक्षिप्य अपासरत्। तदीया भावाः तस्या हृदये उज्जृम्भितायाः कृतज्ञताया अतिशयं जिह्वासहस्रेण प्रकाश्य तद्वन्दनकारिण इव स्फुटमभासन्त। सैव मेनकेति लघु गृहीतवान् सञ्जीव्यार्यः परमसाध्व्याः निरवद्यायाः तस्याः पतिव्रताशिरोमणेः तदा उद्भूतो यः परमानन्दः स एव तद्विषये स्वेनानुभूतस्य कियतोऽपि परिश्रमस्य पर्याप्तं प्रतिफलमिति मन्यमानः मनस्यमान्तमानन्दमविन्दत। तथापि अत्यन्तं गुप्ताकारः वराहस्वामिनं प्रति 'न मे उपवेष्टु-

मवसरोऽस्ति। आगमनकार्यं सद्यो निर्वर्त्य गन्तव्यम्' इत्यवोचत्।

सपदि वराहस्वामी आन्तरेण प्रेम्णा, "भ्रातः, भवता प्रेषितो लेखः अद्यैव आगतः। श्व उत्तरं लेखनीयमित्यमंसि। भवता मम कृतस्य महोपकारस्य कं प्रत्युपकारमहं करिष्यामि। अयं लेखश्चेन्नागमिष्यत् अहं च मत्पत्नी च अन्ये च त्यक्तप्राणा एवाभविष्याम। अस्मत्कुटुम्ब एव नष्टश्रीर्विनिहतो भवेत्। भवानेव सर्वेश्वरवदागत्य अस्मान् सर्वानरक्षत्। भवन्नामधेयानुरूपं भवानस्मद्विषये अमृतसञ्जीवनीवदागत्य उपकारमकार्षीत्" इति वदन् अश्रूण्यमुञ्चत्।

सञ्जीव्यार्यः तत्प्रति यां कामपि विक्रियां जातामप्रदर्शयन् अनादरेण "पुण्याय नु वयं कुर्मः? किं वेतनं न गृह्णीमः? कृतस्य कार्यस्य कृते सम्मानो ग्राह्य इति नाहं प्रतीक्षां कृतवानस्मि। तत्प्रति किमिति भवान् चिन्तां करोति? मम कालो भवति" इत्यवदत्।

वराहस्वामी "तथा चेत् किं कार्यमद्य भवतः साध्यम्। एतल्लेखसम्बद्धमेव हि भवदागमनम्" इत्यब्रवीत्।

सञ्जीव्यार्यो स्मितं कृत्वा "न न। अस्मच्छयामार्यसकाशं विना अन्यस्य कस्य सकाशमागमिष्यामि। युष्मासु सर्वेषु किं मे कार्यमस्ति। वागाजीवाः पालकाश्च सर्वदा प्रतिपक्षिणो हि भवन्ति। वयं अपराधिनं कञ्चित् न्यायस्थलं नीत्वा अयं दण्ड्य इति ब्रमश्चेत् यूयं किल स मोक्तव्य इति प्रतिवादकारिणः। युष्मासु किं मे कार्यम्" इति सविनोदमाभाष्य, श्यामार्यमभिपरावृत्य: "आर्या अत्र भवन्तः, वयं भवत्सेवार्थमागताः स्मः। भवत्कृतेन कर्मणा भवन्तमतीव श्लाघमानाः शासितारः भवत्करस्य कटकमेकं प्रहितवन्तः। दयया करं प्रसारयत" इत्युक्त्वा भटेभ्यः सूचनं कुर्वति, ते चत्वारः श्यामार्यं पर्यवारयन्। आर्यः पुनः सलोप्त्रं गृहीत इव चोरः चोरदृष्टिं कुर्वन् 'किमर्थं मे शृङ्खलां दत्थ?' इति मन्दमपृच्छत्। समयसञ्जीव्यार्यः "नन्वत्रभवन्त आर्याः, भवतामविदितं किमस्ति? कति नाम निपुणकर्माणि कृतवन्तो भवन्तः किमेतत्कारणं ज्ञातुं न प्रभवन्ति? भवत्सुहृदः वराहस्वाम्यय्यङ्गार्—अस्य कृते किमल्पं कर्म भवद्भिः कृतम्? अपि तु न तदर्थमयं सम्मानो भवतां

लब्धः। तदर्थं वराहस्वाम्यय्यङ्गार् श्रद्दधत् सम्मानं कर्तुमर्हति।' इत्यभिधाय वराहस्वामिनमभिवीक्ष्य 'भवतः प्रति यदयं चकार तन्मात्रं हि भवन्तो जानन्ति। तद्विना कति नाम अद्भुतानि कर्माणि अयं महान् कृतवान्। अस्य शक्तिः सृगालं तुरगं कृतवत ईश्वरस्यापि दुर्लभा। अयं अन्यगृहमनुष्यविक्रयणे परं प्रवीण इति किं मन्यध्वे? न न। अन्यदीयप्रासादप्रभृतीनामपि तत्स्वामिनामविदितं विक्रयणे महासमर्थः। भिक्षुकं तुरुष्कं अयं क्षणेन नाविकं तुरुष्कं कुर्यात्। पितरं पुत्रं पुत्रं पितरं च विपर्यस्येत्। अपाराऽस्य शक्तिः कस्यान्यस्य भवेत्? अनेन कृतं किं जानीथ? इमं प्रासादं क्रीत्वा दास्यामीति भवदग्रजासकाशात् कियद् धनमेष जग्राह, न ज्ञायते। तद् धनमयमेव स्वीचकार। 'तीत्तारप्पमुदलि' वीथीवासिनं माहम्मदमुपेत्य शतं रूप्याणि ददौ। तं नाविकतुरुष्कतया विपरिणमयामास। विक्रयपत्रं सज्जमकरोत्। 'महालिङ्गार्यस्य पुत्रः श्यामार्यः' इत्यस्य स्थाने 'श्यामार्यस्य पुत्रो महालिङ्गार्यः' इत्यात्मानं विपर्यस्य उपपुस्तकयितृकार्यालये साक्षितया सन्निदधौ। प्रासादः क्रीत इति मिथ्यापत्रं निष्पाद्य पुस्तकयित्वा भवत्सहोदर्यै अर्पयामास। प्रासादस्य यः परमार्थतः स्वामी स नागपट्टणे वसति। तस्मै एकमासभाटकवित्तं प्रेष्य प्रासादं स्वाधीनं कृत्वा तस्मिन् युष्मान् वासयामास। इयतीर्दिव्यलीलाः कृतवान् अयं एकं विषयं परं स्वयं नावहितवान् वा, अथ वा अन्ये इमं नावधास्यन्तीति मेने, न ज्ञायते। पुस्तकयितृकार्यालये स्वहस्तरेखाविन्यासो वर्तिष्यत एव हीत्येतत्, तेनेदं रहस्यं अन्ये ज्ञास्यन्तीत्येतच्च विसस्मार। अथापि अस्य अपारं कौशलं वयं सहृदयमभिनन्दामः। तदर्थमेव वयं इदं सभाजनं कर्तुमागमाम। अरे भट, आर्यमिश्राणां हस्ते कटकमामुञ्चत। पुरप्रदक्षिणं कुर्वन्तः वाद्यघोषेण आर्यमिश्राः जाम् जामिति यावोत्सवमनुभवन्तु" इत्यब्रवीत्। एतदाकर्णनसमनन्तरं अशनिपातवदिव गृहं श्यामार्यस्य मनश्चित्तं च अप्रतीकारं विशीर्णमभवत्। उन्मत्त इव शून्यशून्यां दृष्टिं कुर्वन् निष्प्राणस्तिष्ठन् पर्यतप्यत। कच्चिद् वराहस्वामी आत्मानं रक्षेदिति तमभ्यैक्षत। स्वकृतं सर्वं दुष्कृतमिति ससान्त्वं सानुरोधं विनिवेदयत इव तस्य दीनं मुखमदृश्यत। प्रासादविषये अत्यन्तवञ्चितमात्मानं, बहु परिश्रम्य, न्याय्येनान्याय्येन च

मार्गेण समार्ज्य सञ्चितानि अयुताधिकानि रूप्याणि अत्यन्तनष्टानि च ज्ञातवत्यौ पेरुन्देवीकोमले शुष्कवृक्षवत् निरुच्छ्वासनिश्वासे निर्वचने निश्चलमतिष्ठताम् ।

समयसञ्जीव्यार्यः सस्मितं वराहस्वामिनमभिवीक्ष्य 'गमनानुमतिं मे दत्त । भवन्निर्णयं मे शीघ्रं ज्ञापयत' इत्यवादीत् ।

तदाकर्णितवान् वराहस्वामी "कं निर्णयमहं ज्ञापयिष्यामि । अन्ततः मम पत्नी आत्महत्यां न कृतवती । वैद्यहूण्याः साह्येन मामागतवती । व्यवहारस्थलगमने भवल्लिखितरीत्या मम महान् अवमानो भवेत् । तस्मात् व्यवहाराप्रवर्तनमेव साधीयो भाति" इत्युवाच ।

समयसञ्जीव्यार्यः "तथा नु ? अभ्यधिकः सन्तोषः । फलं च्युतं पयसि पतितम् । चिरवियुक्तायां गृहिण्यां एकान्ते बहून् रहस्यविषयान् भाषितुं भवन्तः कुतूहलिनः स्युः । अतः भवदानन्दानुभवस्य विघातकारितया इतोऽपि अत्र मे अवस्थानं पापाय । गच्छामि पुनरागमनाय । सद्गुणशालिनः ईश्वरो रक्षेत्" इत्युक्त्वा बहिरगमत् । भटेषु बहिर्गमनाय श्यामार्यं चोदयत्सु स निश्चलः सीसगोलवत् तथैव तस्थौ । तद्दर्शिनो भटाः स्वंस्वं इक्षलगुडमादाय तस्य पार्श्वयोः अस्थि भञ्जयन्त इव तीव्रं घट्टयामासुः । तदसहमान आर्यः 'अय्यो, अप्पा' इत्याक्रोशन् हरिणपोतवत् प्लुत्वा बहिर्गृहं शरवत् निष्पपात ।

तस्मिन्नेव क्षणे अनन्तरे धनगृहे 'कू कू ! चोरश्चोरः ! पेरुन्देव्यम्ब, कोमलाम्ब, चोरश्चोरः ! आगच्छत ! धावति धावति' इत्युच्चो हाहाकार उद्भूत । तदानीं 'दिडुर्दिर्डिति' केषाञ्चिद्धावनशब्द उदभवत् । तदाकर्णनसमनन्तरं तत्रत्याः सर्वे महान्तं त्रासं विभ्रमं च प्रापुः । वराहस्वामिनो गृहादपसर्तुं स एव समय इति मनितवत्यौ पेरुन्देवी कोमला च अपाधावताम् । कनकाम्बा, स्वर्णाम्बा, मेनका इति इमास्तिस्रः दृष्टव्याधा इव मृग्यः प्रकम्पिता दृष्टिं विक्षिपन्त्यः तस्थुः । भटाश्चत्वारोऽपि श्यामार्यं समयसञ्जीव्यार्ये विन्यस्य आक्रोशोद्भवस्थानं प्रति अधावन् । प्रासादात् बहिर्गमनधिया पदमुद्धृतवन्तः वरदाचार्यप्रभृतयः विभ्रान्ताः चोरोपलम्भपर्यन्तं न बहिर्गन्तव्यमिति मत्वा अवमानेन सङ्कुचिता अतिष्ठन् । साक्षान्मध्यन्दिने किं नाम चोर आगच्छेदिति विस्मयः सन्देहश्च एकैकस्य मनसि

Now it is spring-time which enhances the beauty of trees and creepers imparting to them a freshening bloom. In this delightful season, the crow was earnestly and with great effort persuaded to live in luxury in the orchard teeming with fruits and resounding with the happy notes of the Kokil. But he in less than a minute was found to be busily occupied in raking up excretions exhibiting a hundred hideous gestures. 56

राजत्तारकमण्डलेन नभसा यातं नभोवासरै-
रद्याप्येकदिनं प्रवर्षति मरुन्नाथो यदि प्राणिमः।
इत्यालोक्य मनाक् प्रसृत्वरमहो कालान्तरे वारिदं
लोकस्याश्वसतः कुतोऽयमुदितः कादम्बिनीभञ्जनः॥५७॥

"The winter season passed away with a clear sky bespangled with glittering stars. Even now if the lord of the Devas sends forth showers for a single day, we may hope to live" When thus the men on earth began to cherish a ray of hope upon seeing a fragment of a cloud spreading slowly over the sky, alas! wherefrom has this scatterer of clouds burst forth suddenly? 57

अस्तं याति दिवाकरोऽद्य रजनी भीमा प्रवर्तिष्यते
पन्थानो विषमाः सगुल्मगहना यत्र श्रुता दस्यवः।
इत्थं शाद्वललोलसैन्धवगतिस्वैरानुरोधो यदि
भ्रातः पान्थ कथं हृदि व्यवसितं दूरः किलाध्वा तव॥५८॥

The sun is setting and presently the frightful night will be coming on. The roads are rough and interrupted by jungles and woods infested with robbers according to the reports. Brother, traveller! if you thus listlessly follow the

slow pace of your wayward horse which halts to nibble at every blade of grass, I wonder if you have any idea in your mind as to what really might befall you ! Is it not a long, long way that you have to go ? 58

पुच्छस्ते परमेण मानविधिना प्रादेशमात्रः परं
स्वेनासौ कुटिलः स्फिगन्तविरतश्चक्रीभवन् दृश्यते ।
श्वन्नेतेन निमातुमिच्छसि हठान्मन्थाद्रिमैनाकयो-
रप्राप्यामुदधेरहो परिणतिः कालस्य गम्भीरताम् ॥ ५९ ॥

Your tail at best is but a span in length; and again it is crooked by nature approximating to a full curve and reaching barely the limits of your hips. Oh dog ! with the help of this tail you audaciously propose to measure the depths of the ocean which were never before fathomed even by the Manthara and the Mainaka mountains. Alas! what to say of the perversion of the times ! 59

आदौ वर्णमनुत्तमं तदनु ते लीलावलोकक्रमं
पश्चाच्च स्वरमाधुरीमभिरुचिं सारज्ञतां वा ततः ।
स्मारं स्मारमहो गुणान् हि भवता काक ! प्रमोदामहे
त्वत्तोऽन्यः क इवाल्पकस्य विचितोऽप्यन्यापदेशोचितः ॥ ६०

First of all your splendid complexion, not to speak of the graces of your sportive glances ! and then the melody of your voice, not to mention your excellent tastes or your talent for critical appreciation ! Ha ! how admirable are they ! The combination of such rare excellences in you oh, crow ! when properly regarded, indeed transport us to an ecstacy- for, where else than in you can we hope to discover even after a long search such a happy proto - type of the mean wretch ? 60

पादन्यासविचूर्णितास्तटभुवः फीट्कारवित्रासिताः
सत्वाः शीत्कृतिदूषिता वनलताः कर्णाहताः षट्पदाः।
हस्तोत्क्षेपविपाटिता विटपिनः शैला रदाघट्टिता
दर्पादुद्भ्रमता गजेन विपिने कस्तं प्रभुः शासितुम्॥ ६१॥

By the tramplings of his feet the banks collapse; the beasts of the forest flee terrified at his shrill cry; he spoils the blooming forest creepers by the splutterings from his nostrils; he tears asunder the trees with the gambols of his trunk; the boulders upon the mountains become splintered by the hard knocks of his tusks. The haughty elephant thus roams in the woods. Who has the might to keep him under control? 61

भोगिंश्चन्दनकाननेषु कुरुषे गन्धप्रियाणां भयं
यूनः केतकवाञ्छया विचरतः कालोपमस्त्वं पथि।
दैवेन प्रतिपादितस्य च निधेर्द्वारोपरोधी भवान्
स्वार्थः कस्तव तत्र तत्र परनिर्व्याजोपतापादृते॥ ६२॥

Oh serpent! you scare away the lovers of fragrance in the sandal woods; you beset the path of the youth who go in search of the Kataki buds, like the god of Death; you cover as an obstacle the mouth of the chasm containing buried treasures revealed to man by Providence. In these various watches which you keep, what benefit to yourself do you seek except the pleasure in wantonly causing heart-burning to others? 62

रत्नानां प्रभवः सरित्पतिरसावास्तेऽखिलं तेन तु
प्राक्तन्थे श्रियमच्युतस्य ददता शम्भोश्च हालाहलम्।

एकत्राश्रितपक्षपातगरिमाऽन्यत्रापि दुष्प्राभवो-
द्रेकात्साधुविमानननेति च न किं दौर्जन्यमाविष्कृतम् ॥६३॥

The ocean is the birth place of many precious gems. He is the lord of the streams. All that we do not deny. But when he was churned by the Devas, did he not, in his act of giving Lakshmi to Achyuta and the Halahala poison to Sambhu, betray wickedness by showing great partiality to his dependent (the former) on the one hand, and by grossly insulting a great one (the latter) on the other hand, puffed up with the pride of power and wealth? 63

विक्रीतो नरमात्रकस्य भवता स्वात्मा महीयानपी-
त्यादौ मानहरं सगन्धसदसस्तच्चापि विश्राम्यतु।
अस्मान् बन्धुमपि द्विपापसद यन्मर्त्यस्य साचिव्यकृ-
द्द्रोहेण प्रदरे निपातयसि भोस्तदारुणं दारुणम् ॥ ६४ ॥

That you have sold away your highly esteemable self to man, the despicable, is already a matter of shame to our community; but leave alone even that. Oh wretched elephant! it is distressing in the extreme that you betray us into the hands of man by treacherously entrapping us in pits meanly ministering to the purposes of your man-master. 64

आखूनेष निहन्तु तण्डुलहरानित्याशया पोषितो
गेहिन्या वृषदंशकोऽन्नकवलैर्दध्युक्षितैरन्वहम्।
कालेनाथ सुखोषितो दधिपयश्चासौ मुषित्वा गिरन्
नाखून् हन्ति न च प्रयाति सदनात् संमार्जनीतर्जितः॥ ६५

# उद्यानपत्रिका ॥ 37

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २४] कलि ५०५१ { विकृति मीन } साधारण सं ७
{ कर मेष } शास्त्रानुबन्ध सं ८
आहृत्य सं ८


# सौराज्यम् ॥

—— o❀o ——

राजराज्यमेव अनादिकालसिद्धम् । धर्मशास्त्राणि अर्थशास्त्राणि अन्यानि च सर्वाणि प्रमाणवचनानि तदेव प्रतिपादयन्ति । स्वतन्त्रा उच्छृङ्खलप्रवृत्ताः केचन राजानः पश्चिमदेशेषु प्रजानां तथा विरागमुदपादयन् यथा राजानं निष्कास्य निरधिकारं वा कृत्वा प्रजा एव राज्यभारं सर्वं वोढुमारभन्त । एवं पश्चिमदेशेषु प्रजाराज्ये चिरात्प्रवृत्ते स एव उत्तमो राज्यप्रवर्तनप्रकार इति निरूढवासनानां इह अर्धाधिकवर्षशतं शासनाधिकारे स्थितानां आङ्गलानां समागमेन इहत्या अपि जनाः प्रजाराज्ये आदरवन्तोऽभवन् । आङ्गलाः अपुनर्निवृत्तये याताः । वयं स्वतन्त्राः प्रजाः । अस्मद्राज्यमस्मदिच्छानुसारेण प्रवर्तयितुं शक्नुमः । परन्तु स्वातन्त्र्यलाभात् प्रभृति बहूनि सङ्कटान्यनुभूयन्ते । उत्पन्नानि सङ्कटानि न झटिति निवर्तन्ते । उत्तरोत्तरं तु अन्यान्यन्यानि जायन्ते । अस्यां स्थितौ प्राचीनोऽस्मद्देशराज्यपरिपालनप्रकारः कः ? एषां सङ्कटानां परिहारे क उपायस्तदा आदृतः ? स किमिदानीमनुसर्तुं न शक्यः ? इत्यादिप्रश्नपरम्परा अस्माकमन्तरङ्गे उदेति । अत्र उतरप्रतिलम्भेच्छया प्राचीनग्रन्थावलोकने मतिर्जायते । तानवलोकमानाः तत्र कृतेन सौराज्यवर्णनेन अत्यन्तमाकृष्टचेतसो भवामः । अस्सज्जनाः सर्व एव इदं ज्ञातुं बुद्धौ धारयितुं चार्हन्तीति धीर्भवति । इदं कारणं यद् वयमद्य रामायणारम्भे स्थितं दशरथराज्यवर्णनं विदुषां सुपरिचितमपि अत्र उदाहर्तुं प्रवर्तामहे ।

तस्यां पुर्यामयोध्यायां वेदवित् सर्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥

इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः॥

बलवान् निहतामित्रो मित्रवान् विजितेन्द्रियः।
धनैश्च सङ्ग्रहैश्चान्यैः शक्रवैश्रवणोपमः॥

यथा मनुर्महातेजा लोकस्य परिरक्षिता।
तथा दशरथो राजा वसन् जगदपालयत्॥

तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती॥

तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः।
नरास्तुष्टा धनैः स्वैस्स्वैरलुब्धाः सत्यवादिनः॥

नाल्पसन्निचयः कश्चिदासीत् तस्मिन् पुरोत्तमे।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान्॥

कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित्।
द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः॥

सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः।
उदिताः शीलवृत्ताभ्यां महर्षय इवामलाः॥

नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान्।
नामृष्टो नानुलिप्ताङ्गो नासुगन्धश्च विद्यते॥

नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृत।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान्॥

नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः।
कश्चिदासीदयोध्यायां न च निर्वृत्तसङ्करः॥

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे॥

न नास्तिको नानृतको न कश्चिदबहुश्रुतः।
नासूयको न चाशक्तो नाविद्वान् विद्यते तदा॥

नाषडङ्गविदत्रासीन्नाव्रतो नासहस्रदः।
न दीनः क्षिप्तचित्तो वा व्याधितो वापि कश्चन॥

कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान्।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान्॥

वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥
दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥
क्षत्रं ब्रह्ममुखं चासीत् वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वधर्मनिरतास्त्रीन् वर्णानुपचारिणः ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥

3. 1-20

# संस्कृतग्रन्थजातम् ॥

३

## वैदिककाण्डः—ऋक्संहिता ।

अस्मत्संप्रदायानुरोधेन नास्ति कश्चिदत्र संदेहः। सर्वा ऋचो मन्त्राः। मन्त्राणां च सर्वेषां क्रतुषु उपयोगः अनेकधा । तस्मिन् तस्मिन् क्रतौ आराध्यानां देवतानां प्रतिपादनेन केचन मन्त्रा उपयुज्यन्ते। आराध्यानामनाराध्यानां वा देवताविशेषाणां गुणकीर्तनरूपे स्तोत्रे शस्त्रे च सर्वेषां मन्त्राणामुपयोगः ब्राह्मणवाक्यैर्विधीयते । एतेनेदं स्पष्टं यत्सर्वस्या ऋक्संहितायाः क्रतुनिर्वाहकत्वं परमं कार्यमिति । अत एव बहुभिः प्रकारैः प्रथमव्याख्येयत्वेऽपि तस्या अङ्गिभूतक्रतुविधानपरयजुर्व्याख्यानानन्तरमेव व्याख्येयतां सायणः प्रतिपादयतीति प्रागुक्तम् । एवं क्रतुसंबन्धं सिद्धं कृत्वा सायणः तत्र तत्र सूक्तानां ऋचां च विनियोजकानि श्रौतसूत्राणि उदाहरन्नेव व्याचष्टे । एवं सर्वात्मना क्रतुसंबन्धे बुद्धिस्थे यत्रापि कासांचित् ऋचां स सम्बन्धो न स्फुटः तासामपि विनियोगानुसारेण क्रतुपरतया व्याख्यानं कर्तव्यं भवति। तथैव च सायणः कृतवान् ।

इममेव महान्तं दोषमर्वाचीना मन्यन्ते । सर्वथा ब्राह्मणश्रौतसूत्रादिभिः प्रतिपाद्यमानं क्रतुसम्बन्धं परित्यज्य सूक्तानि ऋचश्च परिशीलनीयानि। सत्यं सन्ति अनेकानि सूक्तानि येषां यागपरता दुरपह्नवा। तावता सर्वत्र तत्कल्पनमयुक्तम्। एवं स्वातन्त्र्येण परिशीलने क्रियमाणे प्राचामार्याणां चरितं जीवितं देवताविषयमतभेदाः इत्येवमादि स्फुटमवगन्तुं

शक्यम । सम्प्रति क्रियमाणस्य ऋक्संहितापरिचयस्य किं प्रयोजनमिति विमर्शे यद्यप्येवं प्राचामार्याणां जीवितचरितादिविज्ञानं ततो लभ्यत इति अस्त्येतत् । तथाऽपि तेषां ऋषीणां किमुद्दिश्यैषां सूक्तानां करणे प्रवृत्तिरिति प्रश्नस्य नैतावता समाधानमुक्तं भवति । इदंप्रथमं ऋक्संहितापरिचयं कुर्वन्तः किञ्चित्प्राचीनाः पाश्चात्यविमर्शकाः एवमभिप्रयन्ति स्म । यथा इदानीं विदुषमविदिताः बह्व्यो गाथाः पामरजनैरेव गीयमानाः कुलपरम्परया अनुवर्तन्ते तथा इमानि सूक्तानि प्राचीनतरपामरजनगीतानि । तेषां पश्चात् कैश्चित्सङ्कलनं कृतमासीदिति । एतमभिप्रायमन्ये अयुक्तं मेनिरे । ऋक्संहितासूक्तानां परिशीलने सुस्पष्टमेतत्प्रतीयते यत् तेषां कर्तृभिः अतिसमर्थैः कविभिः भाव्यमिति । महाकवीनां सरणौ संचरितुं सर्वथा अशक्तेषु पामरजनेषु प्रौढिगाम्भीर्यादिगुणगणभरितानां ऋचां प्रादुर्भावः नैव शक्यशङ्कः इत्येते प्रतिपादयन्ति ।

आसन् पुनरन्ये विमर्शकाः, येषां एवं मतिः । विविधवैचित्र्यशालिनः अस्य जगतः यस्स्रष्टा यदधीनं स्वजीवनं तमत्यद्भुतमहिमशालिनं देवताविशेषं प्रति प्राचामार्याणां हृदये जातस्य विस्मयभयभक्त्यादिप्रचुरस्य अत्युद्रिक्तस्य चित्तवृत्तिविशेषस्य अवशाद्बहिर्यः परिवाहो बभूव, स एव सूक्तपरम्परात्मना परिणतिमभजत, इति । गोल्ड्स्मित (Gold-Smith) नाम कश्चिदाङ्गलकविः काव्यस्य प्रथमोत्पत्तिमेवंरीत्या उत्प्रेक्षते । सा वासना ऋक्संहिताविषये एवमेषां मतिमजनयदिति भाति ।

एतद्विपरीता तु केषाञ्चिन्मतिः । पौरोहित्यभाजां याज्ञिकानामनागरिकाणामालयरहिते देवपूजास्थाने दर्भैः परिस्तीर्णानामग्नीनां समीपे पामरजनसंबन्धिदेवताविशेषाह्वानाय उपयुक्तानि इमानि सूक्तानीति ।

एवमितरेऽपि विमर्शकानां मध्ये बहुविधाः मतिभेदाः । अद्यत्वेऽपि भूयिष्ठस्य ऋक्संहिताभागस्य यज्ञैकपरत्वेऽपि अतात्पराण्यपि बहूनि सूक्तानि सन्तीति माध्यस्थ्यं प्रायेण सर्वे अवलम्बन्ते । सर्वेषां मन्त्राणां क्रतुषु उपयोगमाचक्षाणानामस्मद्देशीयानां श्रौतविदामप्यानुषङ्गिकतया तत्तन्मन्त्रलिङ्गानुरोधेन आचारादिव्यवस्थाप्रमितिरभिमतैव । अत एवोच्यते वेदोऽखिलो धर्ममूलमिति । तेन केषाञ्चित्सूक्तानां प्रथमप्रवृत्तौ यज्ञोद्देश्यकत्वाभावेऽपि यज्ञतुल्यं जनानां हिततमं कमप्यर्थमभिसन्धायैव प्रवृत्तिरिति अस्मत्सम्प्रदायविदां सर्वेषामत्रैकमत्यम । परमोद्देश्ये एवं स्थिते साक्षात्प्रतिपाद्यमर्थमालोचयेम । सोऽर्थः देवतारूपः । देवतास्तुतिर्हि प्रायः ऋक्संहिता । देव एव देवता । देवशब्दस्य एवं निर्वचनमाह यास्कः,

'देवः दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा । अत्र दुर्गाचार्यविवरणम् — 'देवो दानाद्वा, ददाति ह्यसौ ऐश्वर्याणि । दीपनाद्वा, दीपयति ह्यसौ ; तेजोमयत्वात् । द्योतनाद्वा, धात्वन्यत्वमर्थैकत्वमिति' ।

पृथिवी अन्तरिक्षं द्यौः इति स्थानभेदात् देवताः त्रेधा विभज्यन्ते । तत्र अग्निः पृथिवीस्थानः । वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः । सूर्यो द्युस्थानः' इति देवतानां त्रित्वमाह । ऋङ्मन्त्रेष्वेव 'त्रिंशतं त्रींश्च देवान्' 'देवास्त्रिरेकादशाः' इति त्रयस्त्रिंशत्त्वं प्रतिपाद्यते । इतोऽधिकसङ्ख्या च तत्र तत्र । तथा सति कथं तिस्र एव देवता इति सङ्गच्छते, इतीमां शङ्कामेवं परिहरन्ति ।

एक एव पृथिवीस्थानः अग्निः सर्वपार्थिवदेवतारूपेण परिणमति । एवं वायुः इन्द्रो वा एक एव सर्वान्तरिक्षदेवतारूपेण, सूर्यं एक एव सर्वद्युदेवतारूपेण परिणमति । तस्मात् प्रकृतिदेवताः तिस्र एवेति । यद्वा अपरिणतस्यैव एकस्याग्नेः वायोस्सूर्यस्य च कर्मभेदनिमित्तानि बहूनि नामधेयानि । नार्थभेदः । यथा अग्रनयनादग्निः । स एव वेदजननात् जातवेदाः । एवमन्यदपि । एवं नैरुक्तमतं द्वेधा समाधाय 'अपि वा पृथगेव स्यु'रिति यावत्यो निर्दिष्टाः तावत्यः भिन्नभिन्ना एव देवताः इति याज्ञिकमतमपि दर्शयति ।

अथ देवतानामाकारचिन्तनम् । तत्र केषाञ्चिन्मतम् । इन्द्रादिविषये बाहुप्रभृतीनामङ्गानामश्वरथादीनां साधनानां अशनपानादीनां कर्मणां च वर्णनेन पुरुषाकाराः देवताः इति । अन्येषां तु अग्निवाय्वादित्यपृथिवीचन्द्रप्रभृतीनां पुरुषाकारत्वादर्शनात् तद्वदेव इन्द्रादीनामपि अपुरुषाकारत्वम् । यत्तु अङ्गसाधनकर्माद्युपनिबन्धनं तदचेतनेषु अपुरुषविधेषु च अक्षग्रावनदीस्तुतिष्वपि दृश्यत इति न तावन्मात्रेण पुरुषाकारत्वकल्पनमावश्यकमिति । मतान्तरमप्यस्ति 'अपि वा उभयविधाः स्युः' । एकैकापि देवता पुरुषाकारापि भवति अपुरुषाकारापि । प्रत्यक्षदृश्या अग्न्यादयः कर्मनिर्वर्तकरूपा अपुरुषविधाः । ये तु तदधिष्ठायिनः अन्तरात्मानः चेतनाः ते पुरुषविधाः इति ।

अग्निः वायुः सूर्य इति एते प्रत्यक्षाः । अत्र कथं देवत्वबुद्धिः प्राचामजनि । दृश्यमानपदार्थेभ्यः अतिरिक्ताः पुरुषविधाः देवास्सन्तीति कथं तेषां प्रत्ययः ? इति प्रश्नं कुर्वन्तः पाश्चात्या वेदविमर्शकाः तदनुसारिणः अत्रत्याश्च एवं समादधति । प्रदीप्तकिरणस्सूर्यः, प्रचण्डो वातः, अभ्रंलिहशृङ्गा हिमालयपर्वतमाला, अतिमात्रप्रवृद्धानि ओषधिवनस्पतिमण्डलानि, इत्ये-

तानि सर्वाणि पुनःपुनरालोकितानि नूनं प्राचां तथा मतिमुत्पादयन्ति स्म, यथा मनुष्यशक्तिमतिक्रम्य स्थितानामेषां प्रादुर्भावप्रवृत्त्यादिकारणभूताः केचन चेतनविशेषास्सन्तीति निश्चितव्यमासीत्। त एव चेतनविशेषाः देवाः। स्वसाम्येन तेषु पुरुषाकारत्वबुद्धिः सहजतो बभूव। तथाऽपि तदस्तित्वकल्पनानिदानभूतानां ज्वलनवातसूर्यमण्डलादीनामपुरुषाकाराणामहरहः प्रत्यक्षं दृश्यमानत्वात् एतद्विस्मरणमशक्यमासीत् । तेन पुरुषाकारत्वं देवानां न सुप्रतिष्ठितम् । दृश्यमानस्वरूपातिरोधानेनैव ते सर्वे स्तूयन्ते।

एवं अस्मदीयानां प्राचां अद्यतनानां विमर्शकानां च दृष्टिभेदादभिप्रायभेदः अवश्यंभावीत्यवधेयम् । 'अग्निसूर्यादयः पदार्थविशेषाः ये प्रत्यक्षं दृश्यन्ते तन्मात्रज्ञानं प्रागासीत् । ततःपरमेव तत्र देवत्वादिपरिकल्पनम्। यथादृष्टग्राहिता पूर्वम्। पश्चात्तत्र विविधा परिकल्पना। प्रथमे हि जनाः अनतिविवेकिनो भवन्ति । क्रमेण विवेचनप्रसरः । तस्मात् आदौ स कालः कश्चिदासीत् यत्र देवतामतिरेव यस्य कस्यापि नावर्तत।' इत्येवंविधां आदिमां स्थितिं दृढमभिप्रेत्य तदनुरोधेन वैदिकग्रन्थार्थविचारे नवीनाः प्रवर्तन्ते। तेन एषां दृष्ट्या अस्मादृशा एव प्राञ्चो जनाः स्वबुद्ध्या केवलया देवतोत्पादकाः इति निश्चिते तदनुसारेणैव कथं देवानां पुरुषाकारता इत्यादीनां प्रश्नानां समाधानं वक्तव्यं भवति । अस्मत्सम्प्रदाये तु अन्यथा दृष्टिः । मन्त्रद्रष्टार ऋषयः तपोबलेन मन्त्रान् पश्यन्ति केवलं, न स्वतन्त्वं किञ्चित्कुर्वन्ति। तेन तत्र पुरुषबुद्धेः न कश्चित्सम्बन्धः। सोऽयं वेदापौरुषेयत्ववादिनामभिप्रायः । न पुनरिदानीं कश्चिदत्र विश्वासं करिष्यति। तेन ऋषयः मन्त्राणां कर्तार इत्यभ्युपगमेऽपि प्रथममविवेकता पश्चात् विज्ञानविशुद्धिरिति नैवं क्रमः अस्मत्सम्प्रदायस्थितेः यैः कैश्चिदपीष्यते। आदौ सर्वज्ञा आसन्। क्रमेण ज्ञानस्य ह्रासः। तेन जनानां मोहे सति तत्परिहरणाय प्राज्ञाः ग्रन्थान् कृत्वा प्रकाशयन्ति। तदिदमाह यास्कः 'साक्षात्कृतधर्माणः ऋषयो बभूवुः। ते अवरेभ्यः असाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान् संप्रादुः । उपदेशाय ग्लायन्तः अवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः। वेदं च वेदाङ्गानि च' इति।

अनया दृशा पश्यद्भिः प्राचीनदेवतातत्त्वं निर्धारितवन्तः ऋषयः स्वनिर्धारणानुरोधेन देवताः स्तुवन्तीति वक्तव्यम् । यथा उपनिषत्काले तथैव ऋक्संहिताकालेऽपि एको जगदन्तरात्मेति ऋषिभिस्सुनिश्चितमासी-

दिति प्रतीयते। एवं अस्मिन् विषये विवेचिते प्रत्यक्षदृष्टाग्न्याद्यतिरेकेण देवताविशेषसद्भावप्रत्ययः कथमिति प्रश्नस्य नैवावकाशः । अश्वादयः प्राणिनः अक्षादयः अप्राणिनश्च यद्देवतात्वेन स्तूयन्ते तत्रापि अनुपपत्तिशङ्का एतेन परिहृता भवति । तत्र हि उद्देश्यत्वं न अश्वादीनामेव अपि तु यस्तेषामन्तरात्मतया अवस्थितः तस्यैवेति । अथ तां तां देवतां विशिष्योपादाय तद्गतान् विशेषान् पर्यालोचयेम ।

---

# श्रीरामपादुके ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे ।
आनृशंस्यं ययोरासीदाश्रितेष्वनवग्रहम् ॥ [पा-स-१२१

श्रीरामपादुकाभक्तिभाजां प्रथमोदाहरणभूतो भरतः चित्रकूटमवाप्य, तस्मादयोध्यामासाद्य रत्नमये पीठे अयोध्याराज्याभिषेकमनुभवितुं राघवं शरणंजगाम । श्रीरामः तदानीं पूर्वकृतदेवसङ्घशरणागतिफलप्रदानप्रवृत्त्यनुकूलपितृवचनपालनेनावरुद्धावसरः सुरकार्यं निर्वर्त्य साकेतमागत्य भरतकृतामोघप्रपदनस्य फलं प्रदित्सुः तावद्विलम्बसहनाय मध्यस्थेनोभयोर्हितपरेण वसिष्ठेन नियुक्तेन भरतेन प्रार्थिते सर्वलोकयोगक्षेमं विधास्यन्त्यौ हेमभूषिते स्वप्रतिनिधिभूते पादुके शक्तिविशेषस्थापनाय पादाभ्यामधिरुह्यावरुह्य च तद्द्वारा राज्यरक्षार्थं महात्मने भरताय प्रायच्छत् । भरतः पादुके सम्प्रणम्य शत्रुञ्जयनागमूर्ध्नि प्रथमं निक्षिप्य ततस्सादरमादाय स्वशिरसि निधाय शत्रुघ्नेन मन्त्रिपुरोहितैः सैन्यैश्च साकं चित्रकूटात्साकेतमागम्य ततो नन्दिग्रामं प्रविश्य 'भ्रात्रा न्यासवद्दत्तस्य राज्यस्य रक्षणे तत्तद्व्यवहारे मम धर्मव्यवहारांशज्ञानं न्यासतुल्यप्रतिनिधिभूतपादुकासन्निधानाधीनमेव । निवृत्तेन रघुनन्दनेन सङ्गतः तस्य चरणाभ्यां पादुके संयोज्य तस्मै राज्यं दत्त्वा धूतपापो भविष्यामि । काकुत्स्थेऽभिषिक्ते जनः प्रहृष्टो भवेत् । मम राज्यावनापेक्षया चतुर्गुणा कीर्तिः प्रीतिश्च स्याताम्' इत्यादि गुरून् प्रकृतिमण्डलञ्चाब्रवीत् । स वल्कलजटाधारी मुनिवेषधरः नन्दिग्रामे शत्रुघ्नादिभिः सह वसन् इक्ष्वाकुकुलसिंहासने पादुके अभिषिच्य तत्परतन्त्र-

रसन् तत्पुरस्कारेण राज्यपरिपालनसमये राज्यविषयं यत्कार्यं प्राप्तं यच्च महार्हमुपायनमुपहृतं तत्सर्वं तत्सन्निधौ निवेद्य यथावच्चकारेत्यादि वाल्मीकिरामायणे अयोध्याकाण्डे प्रतिपाद्यते । युद्धकाण्डे त्रिंशदुत्तरशततमे सर्गे धर्मविद्भरतः स्वयं नरेन्द्रस्य रामस्य ते पादुके गृहीत्वा तस्य चरणाभ्यां योजयामासेत्याख्यायते ।

अयोध्याकाण्डे द्वादशोत्तरशततमसर्गे 'अधिरोहार्य पादाभ्यां पादुके हेमभूषिते । एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥' इति पद्यस्य तिलकव्याख्यायां 'एते उटजसन्निहिते' इति विवरणं विलोक्यते । तत्रैव त्रयोदशोत्तरशततमसर्गे 'एते प्रयच्छ संहृष्टः पादुके हेमभूषिते । अयोध्यायां महाप्राज्ञ योगक्षेमकरे तव ॥' इति श्लोकस्य गोविन्दराजीयटीकायां 'हेमभूषिते इत्यनेन रामाय प्रीत्या समर्पयितुमभिनवतया निर्माय नगराद्भरतेनानीते इति गम्यते' इति वाक्यं विद्यते । आभ्यां व्याख्यानाभ्यां किं चित्रकूटे रामः साकेततः आचित्रकूटं गमनसमये स्वचरणाभ्यां योजिते तदात्वे उटजस्थे स्वकीये पादुके भरताय व्यतरत् आहोस्वित्तदानीं नगराद्भरतेनानीते ते तस्मै विश्राणयति स्म इति संशयः प्रादुर्भवति । अत्र प्रथम-कोटिरेव रामायणाद्यनुगुणा । तथाहि–बालकाण्डे प्रथमसर्गे 'पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः । निवर्तयामास ततो भरतं भरताग्रजः ॥' इति, अयोध्याकाण्डे पञ्चदशोत्तरशततमसर्गे 'एतद्राज्यं मम भ्रात्रा दत्तं संन्यासवत्स्वयम् । योगक्षेमवहे चेमे पादुके हेमभूषिते ॥ भरतः शिरसा कृत्वा संन्यासं पादुके ततः । भ्रात्रा हि मयि संन्यासो निक्षिप्तः सौहृदादयम् । राघवाय च संन्यासं दत्त्वेमे वरपादुके । राज्यं चेदमयोध्यां च धूतपापो भवामि च ।' इति च सूक्तयः सन्ति । अत्र भरताय राज्यस्य पादुकयोश्च न्यासतुल्यतया न्यासतया च दानमभिधीयते । 'कालान्तरे ग्रहणाय विश्वस्तपुरुषे रक्षणार्थं वस्तुस्थापनं न्यासो निक्षेप इति च' इति पञ्चदशोत्तरशततमसर्गे तिलकव्याख्यानम् । अनेन कारणेन रामः अयोध्यातः आचित्रकूटं सञ्चारसमये स्वपादाम्बु धृतवत्यौ निजे एव पदरक्षे, ते पुरस्कृत्य राज्यं संरक्ष्य चतुर्दशे वर्षे पू साकेतमागमिष्यते स्वस्मै प्रत्यर्पयितुं भरताय विततारेति प्रतीयते । यदि ते रामस्य स्वभूते न स्यातां, किन्तु भरतेनानीते भवेतां तदा युद्ध काण्डे निगद्यमानं चतुर्दशवत्सरसमाप्त्यनन्तरं नन्दिग्राममागतस्य रामस्य चरणाभ्यां भरतेन तयोर्योजनं असकृन्न्यासशब्दोपादानं तत्रतत्र पादुके रामस्यपादुके इत्यादिवचनं च स्वरसतो न सङ्गच्छेरन्

किं च 'हे पादुके, शेषभूतो लक्ष्मणः भरतशिरसि लग्नां त्वां स्वतनुं (शेषावतारभूताम्) सतीमपि दूरतो ववन्दे । इह किमिदं विचित्रम् । यस्माद्रङ्गनाथो दशरथतनयो नित्ययुक्तश्च सन् त्वमेव सिषेवे ।' इति शेषपद्धत्युक्तरीत्या आराध्यस्यार्चामूर्तेः रङ्गनाथस्य आराधकस्य विभवस्य रामस्य च मिथोऽभेदात् रामपादुकाकार्यं रङ्गनाथपादुकयोः प्रायेण वर्णयति कवितार्किककेसरिणा श्रीमद्वेङ्कटनाथेन विरचिते अष्टोत्तरसहस्रानवद्यहृद्यपद्यात्मके श्रीरङ्गनाथपादुकासहस्रे बहुभिः श्लोकैः, रामः साकेततश्चित्रकूटपर्यन्तं स्वपादौ रक्षितवत्यौ स्वकीये एव पादुके भरताय राज्यरक्षार्थं न्यासतया दिदेशेत्येतत्प्रत्याय्यते । तथाहि–समर्पणपद्धतौ 'भजामः पादुके याभ्यां भरतस्याग्रजस्तदा । प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत्' इति प्रथमः श्लोकः । अस्य संस्कृतव्याख्याने 'लोके प्रस्थातारः प्रस्थानविलम्बे खड्गादिकमन्यत्र निर्गमयन्ति. तद्वद्रामोऽपि पुनरागमिष्यन् भरते स्वपादुकामभिक्षिप्तवानित्यर्थः' इति भावोऽवर्ण्यत । तत्रैव पद्धतौ 'राज्यं विहाय रघुवंशमहीपतीनां पौरांश्च पादरसिकान् पृथिवीं च रक्ताम् । त्वामेव हन्त चरणावनि सम्प्रयास्यन् आलम्बत प्रथममुत्तरकोसलेन्द्रः ॥' इति द्वितीयः श्लोकः । अस्य द्रामिडव्याख्याने 'श्रीरामे वनस्थे सति भरतः श्रीरामात् ये पादुके गृहीत्वा साकेतमगच्छत् ते किं श्रीरामे आस्तां, उत भरतः साकेतात्ते आदाय चित्रकूटं जगामेति चोद्ये प्राप्ते तन्निरासायात्र समर्पणपद्धतौ द्वितीयश्लोके श्रीदेशिकः, श्रीरामः सपादुक एव वनं व्रजति स्मेति बभाषे । भरतो रामात्तयोरादानकाले 'अधिरोहार्य पादाभ्याम्' इति पादाभ्यां पादुके आरोढुं सम्प्रार्थ्य आरोहणानन्तरं ताभ्यां ते स्वमूर्ध्न्यग्रहीत्' इति अभण्यत ।

'प्राप्ते प्रयाणसमये मणिपादरक्षे पौरानवेक्ष्य भवती करुणप्रलापान् । मञ्जुप्रणादमुखरा विनिवर्तनार्थं रामं पदग्रहणपूर्वमयाचतेव ॥' इतितत्रैव तृतीयः श्लोकः । अत्र संस्कृतव्याख्याने 'विनिवर्तनार्थं भरताय दत्त्वा मां निवर्तयेत्येवमर्थं ... ... अत एव रामस्तां भरताय प्रादादिति भावः । सशिञ्जितं रामपादेन पादुकापरिग्रहस्य पादुकाकर्तृकनिवर्तनार्थपादावलम्बनत्वेनोत्प्रेक्षणात् स्वरूपोत्प्रेक्षा' इति व्याक्रियत । 'रामात्मनः प्रतिपदं मणिपादरक्षे विश्वम्भरस्य वहनेन परीक्षितां त्वाम् । विश्वस्य देवि वहने विनिवेशयिष्यन् विस्रब्ध एव भरतो भवतीं ययाचे । पादावनि प्रभवतो जगतां त्रयाणां रामादपि त्वमधिका नियतं प्रभावात् । नोचेत्कथन्नु भरतस्य तमेव लिप्सोः प्रत्यायनं परिपणं भवती भविती ॥

नियतमधिरुरोह त्वामनाधेयशक्तिं निजचरणसरोजे शक्तिमाधातुकामः । स कथमितरथा त्वां न्यस्य रामो विजह्रे दृषदुपचितभूमौ दण्डकारण्यभागे ॥' इमे समर्पणपद्धतौ पञ्चमाष्टमषोडशश्लोकाः । एभिर्यथाक्रमं रामस्य पदेपदे वहनेन पादुकयोः परीक्षितात्वं, तयोः रामागमनविश्वासहेतुयत्किञ्चिदादानोपयोगिन्यस्तमूलधनवस्तुत्वम, पादुकयोर्न्यासमये निजचरणसरोजयोः तच्छक्त्याधानं विना ताभ्यां दण्डकारण्यभागे शिलासु सञ्चारस्य दुष्करत्वं च कथ्यन्ते । 'अव्याहतां रघुपतेर्वहतः प्रतिज्ञामंसाधिरोहणरसे विहते धरण्याः । प्रादान्निवृत्य भवती मणिपादरक्षे स्पर्शं पदेन विगतव्यवधानखेदम् ॥ रक्षार्थमस्य जगतो मणिपादरक्षे रामस्य पादकमलं समये त्यजन्त्योः । किं दुष्करं तव विभूतिपरिग्रहो वा किं वा विदेहदुहितुः कृपणा दशा सा ॥' इमौ प्रतिप्रस्थानपद्धतौ पञ्चमसप्तमश्लोकौ । आभ्यां क्रमेण 'भवती निवृत्य विगतव्यवधानखेदं पदेन स्पर्शं धरण्याः प्रादात्' इत्युक्त्या निवृत्तेः पूर्वं भूमौ पदत्रव्यवहिततच्चरणस्पर्शः, दण्डकारण्यगमनसमये जगद्रक्षार्थं पादुकाभ्यां रामपादकमलयोस्त्यागश्चोदीर्येते । 'वीरव्रतप्रणयिनि प्रथमे रघूणां प्राप्ते चिराय भरते व्रतमासिधारम् । त्यक्त्वा पदावनि तदा विविधान्विहारानेकासिकाव्रतमपूर्वमवर्तयस्त्वम् ॥ परिहृतदण्डकाध्वगमनं पदरक्षणि तत्परिणतविश्वसंपदुदयं युवयोर्द्वितयम् । रघुपतिरत्नपीठमधिरुह्य तदा विदधे व्यपगतवैरिभूपनिलयं वसुधावलयम् ॥' इमौ अधिकारपरिग्रहपद्धतौ षोडशैकोनचत्वारिंशौ श्लोकौ । 'भ्रातुर्नियोगेष्यनिवर्तमानं राज्याभिषेकञ्च परित्यजन्तम् । रामानुजौ तौ ननु पारतन्त्र्यादुभावुभाभ्यां भवती जिगाय ॥ कतिचन पदपद्मस्पर्शसौख्यं त्यजन्ती व्रतमतुलमधास्त्वं वत्सरान् सावधाना । रघुपतिपदरक्षे राक्षसैस्त्रासितानां रणरणकविमुक्तं येन राज्यं सुराणाम् ॥' इमौ अभिषेकपद्धतौ तुरीयाष्टाविंशौ श्लोकौ । 'अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान् । इति सीतापि यद्वृत्तिमियेष प्रणमामि ताम् ॥' इदं सञ्चारपद्धतौ आद्यं पद्यम् । एभिः क्रमेण, पादुकयोरनेकप्रकारलीलासञ्चारान् विसृज्य पूर्वैरननुष्ठितस्याचाञ्चल्येनावस्थाने एवं तिष्ठामीति नियमपरिग्रहरूपव्रतस्याचरणम्, भरतेन तयोः प्रत्यानयनेन दण्डकाध्वगमनत्यागः, ताभ्यां लक्ष्मणभरतयोर्निवर्तनाभिषेकाङ्गीकाराभ्यां जयः, ताभ्यां रघुपतिपदपद्मस्पर्शसौख्यं हित्वा चतुर्दशसु वर्षेषु राज्यस्य भरणम्, कण्टकमर्दनस्य तद्व्यापारत्वञ्च निगद्यन्ते । प्रथमकोटिसाधका इतरे पादुकासहस्रश्लोकास्तु विस्तरभियाऽत्र न प्रदर्श्यन्ते ।

अतः, पादुके नगराद्भरतेन चित्रकूटमानीयेताम्। भरतस्य प्रार्थनया रामेणाधिरुह्य वितीर्णयोस्तयोस्तेन नन्दिग्रामे पट्टाभिषेको निरवर्त्यतेति वादस्समालोचनमर्हति। अभयप्रदानसारे भरतशरणागतिफलनिरूपणावसरे निगमान्तदेशिकोपात्ता 'மரவடியைத் தம்பிக்கு வான்பணையம் வைத்துப் போய் வானோர் வாழ' इति विष्णुचित्तसूक्तिरपि पादुकान्यासविषये प्रमाणतयाऽनुसन्धेया।

---

पेक्स्पिअर्-कृतं

# यथाभिमतम्॥ III. 2

—— ❀ ——

प्रविशतः आर्लण्डो जाक्विस् च।

जाक्विस्—प्रीतोऽस्मि ते सहावस्थानेन। परमार्थतस्तु अनन्यसहितस्य अवस्थानमपि मे प्रियम्।

आर्लण्डो—ममापि तथा। तथाऽपि आचार इति कृत्वा ब्रवीमि—'अहमपि तव सान्निध्येन प्रीतोऽस्मि'।

जाक्विस्—देवस्ते सहायो भवतु। यथाशक्ति आवां मिथः समागमं परिहरेव।

आर्लण्डो—अस्ति मे कामः अपरिचितौ (वैदेशिकौ) आवां भवेवेति।

जाक्विस्—इदं त्वामभ्यर्थये, नेतः परं वृक्षान् दूषय तेषां त्वक्षु कामगाथालेखनैः।

आर्लण्डो—इदं त्वामभ्यर्थये, नेतः परं मम पद्यानि दूषय तानि दुष्पठन्।

जाक्विस्—रोसलिन्द् इति तव प्रियाया नाम?

आर्लण्डो—आम, साक्षात्।

जाक्विस्—न तस्या नाम मे रोचते।

आर्लण्डो—तस्या नामकरणकाले तव तृप्तिं प्रति नैव उद्देश आसीत्।

जाक्विस्—कियान् तस्या उच्छ्रायः?

आर्लण्डो—यावन्मे हृदयं तावत् सा उच्छ्रिता।

जाक्विस्—उत्तराभासैः परिपूर्णोऽसि त्वम्। अस्ति ते परिचयः धनिकानां गृहिणीभिः, इमांश्च अङ्गुलीयकेभ्योऽधीतवानसि?*

---

* कामयमानावस्थाः स्त्रियः स्वाभिप्रायव्यञ्जकान्यक्षराणि अङ्गुलीयकेषु विलिख्य कान्तेभ्यः प्रेषयन्तीति कश्चित् क्रमः पूर्वमासीत्। स इह सूच्यत इत्याहुः।

आर्लेण्डो-न तथा। यस्मात् वर्णपटात् त्वं त्वदीयान् प्रश्नान् शिक्षितवानसि, तत एवाहं साक्षादुत्तरं ते ददामि।*

जाक्विस्-क्षिप्रा ते बुद्धिः। मन्ये अतलन्तायाः पार्ष्णिभ्यां सा कृता।‡ मया समुपविशतु भवान्। आवामुभौ अस्मद्देवीमिमां जगतीं सर्वमसद्दुःखं च परिवदेव।

आर्लेण्डो-नाहं कमपि लोके निन्दिष्यामि विना आत्मानं यस्य भूयिष्ठा दोषा मे विदिताः।

जाक्विस्-अयं ते गुरुतमो दोषः, यत् कामुकोऽसि।

आर्लेण्डो-तथाविधोऽयं दोषः, यस्य स्थाने उत्तमं त्वद्गुणं विनिमयेन न ग्रहीष्यामि। उद्विग्नोऽस्मि त्वया।

जाक्विस्-सत्यं जडं कञ्चिदहं अन्विष्यन् अभूवं, यदा त्वामविदम्§।

आर्लेण्डो-स कुल्यायां मग्नः। तत्र पश्य। तं द्रक्ष्यसि।

जाक्विस्-तत्र ममैव बिम्बमहं द्रक्ष्यामि।

आर्लेण्डो-स जडः शून्यो वेति मम मतिः।

जाक्विस्-नेतःपरमहं त्वया सह अवस्थास्ये। कुशली भूयाः, सौम्य कामिन्।

आर्लेण्डो-हर्षो मे तवापगमेन। वर्धस्व भद्र निर्वेदिन्।

(निष्क्रान्तो जाक्विस्। सिलिआ रोसलिन्द् च प्रविशतः)

रोसलिन्द्-(अपवार्य) (सिलिआं प्रति) तं प्रति उद्धतदासवदहं भाषिष्ये। तथा कुर्वती तस्मिन् खलवृत्तिमहं वर्तयिष्यामि। (आर्लेण्डो-इमं प्रति) शृणोषि, आरण्यक।

आर्लेण्डो-सुस्पष्टम्। किं ते अपेक्षितम्?

रोसलिन्द्-दयस्व। का घण्टा घटिकाहरे?

आर्लेण्डो-दिनस्य का वेलेति पृच्छ। अरण्ये घटिकाहरो न वर्तते।

---

* पटेषु वर्णैः नीतिवाक्यानि विलिख्य जनानां उपदेशसम्पत्तये तान् तत्र तत्र लम्बयितुं शीलमासीत। तदिह अभिसंहितम्। कामुकत्वमुपहसन् जाक्विस् तदनुगुणं किमपि परामृशत्। तदीयात् तत्त्वज्ञमानित्वात् जुगुप्समानः आर्लेण्डो तदनुगुणं किमपि परामृशतीति प्रतीयते।

‡ अतलन्ताया गतिशैघ्र्यमतिप्रसिद्धम्। पार्ष्णिः पादमूलम्।

§ ममापि त्वत्समागमो न प्रार्थितः। निकषोपलमन्विष्यतो मे यदृच्छया त्वत्समागमोऽभूदिति वाच्यार्थः। जडस्त्वमिति व्यङ्ग्यार्थोऽप्यस्ति।

रोसलिन्द्—तर्हि अरण्येऽस्मिन् न परमार्थतः कामी कश्चिदस्ति। अन्यथा हि निमेषे निमेषे श्वसन् घण्टायां घण्टायां हुङ्कुर्वन् कालस्य मन्थरं चरणं घटिकाहरवदुपलभेत।

आर्लण्डो—अथ कुतो न 'कालस्य क्षिप्रं चरणम्'? तथा खलु वचनमुचितम्।

रोसलिन्द्—सर्वथा न, आर्य। कालस्य भिन्नभिन्ने पुरुषे भिन्नभिन्ना गतिः। अहं ते वक्ष्यामि यं प्रति कालश्चलति, यं प्रति कालो गच्छति, यं प्रति कालो धावति, यं प्रति च कालो निश्चलस्तिष्ठति।

---

# प्रकृतिभेदः ॥

(आगतं कर्मकरं दृष्ट्वा)

—कुत्र रे गतो नष्टोऽभूः। शने! मुखं पश्य ब्रह्महत्याया इव। समये कदाऽपि न सन्निधत्ते। धाव रे आपणम्। नागवल्लीदलानि क्रमुकं धूमपत्रं सर्वं क्रीत्वा क्षणेन प्रत्यागन्तव्यम्। अनन्तरवीथ्यां देवस्वाम्यार्यस्य गृहं गत्वा समाचारपत्रिका अस्ति चेत् तामप्यादाय आगच्छ। विलम्बे मूर्धानं ते भेत्स्यामि। तत्र अगमं अत्र अगममिति न किञ्चिद् वक्तव्यम्। जागृहि। धाव। किं तिष्ठसि....

—तिष्ठ रे। किमिति सर्वं ते प्रभुत्वमद्य तस्मिन् तपस्विनि दर्शयसि। सोऽपि हि मनुष्यः। न तु शिलाशरीरः। मध्याह्न आसीत्। प्रातः प्रभृति नाभुक्त। प्रत्यूषे गत्वा प्रत्यापणं श्रेण्यां चिरं स्थित्वा नानावस्तूनि क्रीत्वा क्लिष्ट वहन् तीव्रे आतपे स्विद्यद्गात्रः गृहं प्रविष्टः भूतान् ग्रन्थींश्च अधो न निक्षिप्तवानपि। तावत् आदेशपरम्परां विसृजसि परुषाणि तर्जनानि करोषि। किं ते चक्षुर्नास्ति। पश्य तं कियद्दीनो दृश्यते। भवन्तं विना अन्यो

यः कोऽपि ईदृशावस्थमिमं वीक्ष्य 'सौम्य, सर्वमन्यत् पश्चाद् भवतु । प्रथमं भुङ्क्ष्व । किञ्चिद् विश्राम्य' इति नूनं ब्रूयात्। निर्दयं निस्स्नेहं ते मनः । एवं विस्पष्टं ब्रुवाणाय मे यदि कुप्यसि कुप्य । अवश्यवक्तव्यं उक्तवानास्मि ।

---

# पुस्तकपरामर्शः ॥

वेदान्तकारिकावली। सुरपुरं बुच्चि वेङ्कटाचार्यकृता । श्री वे. कृष्णमाचार्येण स्वकृतव्याख्यानेन आङ्गलभाषापरिवर्तनेन च सह सम्पादिता। The Adyar Library Series No. 75.

सम्पादकमहाशयस्य वैदुष्यं विमर्शनकौशलं च प्रसिद्धम्। तदुचितं स्थानमास्थितोऽयं उत्तरोत्तरं नवीनरीत्या सर्वैः परिष्कारैः परिष्कृत्य ग्रन्थान् प्रकाशयतीति पश्यन्तः प्रमोदामहे। प्रस्तुता वेदान्तकारिकावली न्यायमतस्य विश्वनाथपञ्चाननकृता कारिकावलीव विशिष्टाद्वैतसिद्धान्तस्य सर्वार्थसङ्ग्राहिका इदम्प्रथमं मुद्रयित्वा प्रकाशिता। कर्ता विशिष्टविद्वत्परम्पराप्रसवप्रसिद्धे महाकुले जातः । अस्या विद्वत्परम्परायाः तत्सम्बन्धिनां ग्रन्थानां च विषये ज्ञातव्यान् अंशान् विशदं बोधयत उपोद्घातस्य लेखनेन अयं व्याख्यातृसम्पादको विपश्चित् ग्रन्थकारचरितपरिचयकुतूहलिनां विदुषां अतिमात्रमुपकृतवान् भवति । विशिष्टाद्वैतवेदान्तविद्यार्थिनां प्रथमाध्येयो ललितः प्रकरणग्रन्थोऽयम् ।

---

भ्रातर्भृङ्ग ! कलं रणन्नविरतं मातङ्गगण्डस्थलं
दानादानधियाऽनुभूतसुमनोगन्धोऽपि किं सेवसे ?
स्तम्भाकारकरावधूतजनतादुर्दान्तदन्तावलः
शूर्पाकारकरालकर्णवलनात्त्वां पेषयिष्यत्यहो !॥

ले. शे. श्रीनिवासशर्मा (चिदम्बरम्)

நெடுங்கண்கள்
ஊரா ருறங்கிலும் நாமுறங்கா—உத்தமன்றன்
பேரா யினவே பிதற்றுவன். 32

विशाले मम लोचने ग्रामीणेषु सुप्तेष्वपि स्वयं न स्वपितः ।
...ऽपि मम मत्सरी'। स्वाप्नसुखानुभवोऽपि दुरवापोऽभूत्। पुरुषोत्तमस्य
तस्य नाम्नां सहस्रमेवावशात् जल्पामि ।

பின்னையும்
காரார் கடல்போலும் காமத்த ராயினார்
ஆரேயொல் லாமை யறிவா ரதுநிற்க
ஆரா மாதானு மல்ல ளவள்காணீர்
வாரார் வனமுலை வாசவ தத்தையென்று—
ஆரானும் சொல்லப் படுவாள். 33

अपि चागाधोदधितुल्यकामाः का नाम त्वामाः परापवादं परिक-
ल्पयेयुः । कामं परिवदतु लोकः । 'यथा स्त्रीणां तथा वाचां साधुत्वे
दुर्जनो जनः' इति हि जगति विश्रुतम् । किञ्च गुरुजनमवधीर्य स्वयं
वरणे शिष्टाचारोऽपि दृष्टः । वासवदत्ता नाम राजकन्यका काचित्।
नियमज्ञा मितप्रज्ञा वा। किन्तु पूर्णप्रज्ञतया शिष्टैर्व्यपदिष्टा । सेयं युवद्-
शानुरूपमहरहरुपचीयमानेन कुचयुगळेन कञ्चुकाऽबद्धेन लक्षिताऽभूत् ।
द्वयी हि वृत्तिः युवतीनां कुचकुम्भयोः। स्वयं धर्तुमक्षमौ तौ कान्तेन धार्येते
तदसन्निधौ कञ्चुकेन वा इति।

அவளும்தன்
பேராய மெல்லா மொழியப் பெருந்தெருவே
தாரார் தடந்தோள் தளைக்காலன் பின்போனாள்
ஊரா ரிகழ்ந்திடப் பட்டாளே ? 34

सापि सतीनामुपमानभूता निजं सखीजनमखिलं परित्यज्य
राजवीथीमध्ये कुसुममालालङ्कृतविशालस्कन्धं स्वपित्रा निगळितं वत्स-
राजमनुजगाम। पुष्पदामद्विगुणितदिव्यदेहसौन्दर्यं पतिं तं स्वयं वृतवती ।
तथा तमनुगतां तां लौकिकाः किं निनिन्दुः ? भूयो ननन्दुः किल ।

மற்றெனக்கிங்
காரானும் கற்பிப்பார் நாயகரே. 35

ममेह धृष्टतां विनिन्द्य बहिर्भूतं यत्किमपि यद्याश्वासवाक्यं ये केचिदुपदिशेयुः किन्नु ते मम नियन्तारः ? स्थाने धार्ष्ट्यमिदमिति येऽभिनन्दन्ति त एव मयाऽनुवर्तनीया महान्तः ।

நானவனைக்

காரார் திருமனி காணு மளவும்போய்
(1) சீரார் திருவேங் கடமே (2) திருக்கோவ
லூரே (3) மதிள்கச்சி யூரகமே (4) பேரகமே
(5) பேரா மருதிறுத்தான் வெள்ளறையே (6) வெஃகாவே
(7) பேரலி (8) தண்கால் (9) நறையூர் (10) திருப்புலியூர்
(11) ஆராமம் சூழ்ந்த வரங்கம். 36

तदीयं मेघमेचकं दिव्यरूपं यदा साक्षादकरवम । तदाप्रभृति धृष्टतामीदृशीं गताऽहं भूयोऽपि मेघश्यामलतदीयदिव्यरूपसाक्षात्कारं यावत् तमनुगमिष्यामि । मया जिगमिषितान् तदीयान् दिव्यदेशान् शृणुत- (1) श्रीमद्वेङ्कटाद्रिः (2) देहलीशदिव्याधिष्ठानं श्रीगोपपुरम् (3) प्राकाराञ्चितायां काञ्च्यां प्रतीतग्रामालयाख्यं त्रिविक्रमक्षेत्रम् (4) अपूपकुम्भालङ्कृतदक्षिणबाहोः भगवतः श्रीनामपुराभिधानं दिव्यं धाम (5) योऽसौ असुराविष्टं स्थिरप्रतिष्ठं अर्जुनवृक्षं बभञ्ज ; तस्य भगवतः विशदाद्रिनाथस्य क्षेत्रम् (6) यथोक्तकारिस्थलम् (7) परिरम्भपुरमिति प्रतीतं विशालं केदारमोदवरस्थलम् (8) हिमोपवनाभिधानं दीपप्रकाशस्य दिव्यक्षेत्रम् (9) गन्धपुरम् (10) श्रीमद्व्याघ्रपुरम् (11) आरामावृतं श्रीरङ्गक्षेत्रम्

கணமங்கைக்

(13) காரார் மணிநிறக் கண்ணனூர் விண்ணகரம்
(14) சீரார் கணபுரம் (15) சேறை (16) திருவழுந்தூர்
(17) காரார் குடந்தை (18) கடிகை (19) கடன் மல்லை
(20) ஏரார் பொழில்சூ ழிடவெந்தை (21) நீர்மலை
(22) சீராரும் மாலிருஞ் சோலை (23) திருமோகூர். 3

(12) कृष्णमहिषीपुरम् (13) मरतकमणिसवर्णस्य श्रीकृष्णस्य श्रीनि-
सस्य क्षेत्रं दिव्यान्तरिक्षनगरम् (14) शौरिराजस्य भगवतः श्रीमत् कृ-
पुरम् (15) सारक्षेत्रम् (16) रथमग्नपुरम् (17) जलपूर्ण कुम्भघो

(18) घटिकाचलक्षेत्रम् (19) सागरमल्लस्थलम् (20) स्वानुरूपसमृद्धोद्यानपरिवृतं स्थलेशक्षेत्रम (21) तोयमहीधरदिव्यदेशः (22) श्रीमत्सुन्दरबाहुक्षेत्रं वनाद्रिः 23 श्रीमोहनपुरम

(24) பாரோர் புகழும் வதரி (25) வடமதுரை
ஊராய வெல்லா மொழியாமே நானவனை
ஓரானை கொம்பொசித் தோரானை கோள்விடுத்த
சீரானை — செங்கணெடியானைத் தேன்துழாய்த்
தாரானை தாமரைபோல் கண்ணனை. 38

(24) भूलोकमान्यं बदरिकाश्रमस्थलम् (25) उत्तरमधुरा इत्येवमादि तदीयं दिव्यक्षेत्रमखिलं शश्वत् प्रविशेयम् । तत्रतत्र तदीयां पक्षपातितां प्रकथयेयम् । कुवलयापीडाख्यं गजमेकं दन्तभङ्गेन मारयामास ; गजेन्द्रमपरं पालयामास । ईदृशी गुणवत्ता पक्षपातवत इति घुष्येयम् । आन्तरवात्सल्यप्रकाशकरक्तान्तलोचनोऽपि मधुस्यन्दितुलसीदामभूषणोऽपि पुण्डरीकाक्षोऽपि मम दूरस्थः । सर्वमिदमकिञ्चित्करं मयि तदीयं गुणजातम् ।

எண்ணருஞ்சீர்
பேராயிரமும் பிதற்றி 39

तदीयं सङ्ख्यातीतगुणप्रतिपादकं नाम्नां सहस्रमवशात् जल्पिष्यामि । 'देवो नामसहस्रवान्' इति हि दैवज्ञा पूर्वमुपचक्रमे पश्चादुपसञ्जहार च । द्वात्रिंशगाथायां मयापि तदेव नामसहस्रं नित्यमनुसन्धीयते इत्युक्तम् । तदेव च भूयो जल्पिष्यामि । नामसहस्रमिदं तदीयपक्षपातादिहीनगुणप्रतिपादकमपूर्वमिति तु श्रीकृष्णपादाः ।

பெருந்தெருவே
ஊராரிகழிலு மூரா தொழியேன் நான்
வாரார்பூம் பெண்ணை மடல். 40

சிறிய திருமடல் ஸம்பூர்ணம்.

திருமங்கையாழ்வார் திருவடிகளே சரணம்.

शितधारापूर्णं ताळदळमधिरुह्य विशालायां राजवीथ्यां सञ्चरिष्यामि। वासवदत्तामिव मामपि स्तोष्यन्त्येव प्रेक्षकाः । यदि तु निन्दिष्यन्ति तथापि ताळदळोपरि सञ्चारमहं न परित्यक्ष्यामि । कामं निन्दन्तु नन्दन्तु वा जनाः। ततः का नाम हानिः इतरा वा। प्रियलाभस्तु परमं फलं मम भविष्यति।

ஊரா தொழியே னுலகறிய வொண்ணுதலீர்
சீரார்முலைத்தடங்கள் சேரளவும்—பாரெல்லா
மன்றேங்கி நின்றளந்தான் நின்ற திருநறையூர்
மன்றேங்கவூர்வன் மடல்.

वैष्णवशिखामणिना द्राविडरामायणप्रणेत्रा 'कम्बन्' इति प्रसिद्धेन महाकविना प्रणीतेयं गाथा, तत्प्रार्थनया ह्रस्वदळश्रीसूक्त्यनुसन्धानान्ते वैष्णवालयेष्वनुसन्धीयते । अत इयमपि विव्रियते — अयि भोः ललिताळिकवत्य आळयः ! यावता कालेन अनन्यार्हताश्रीमन्तौ विपुलौ मम कुचौ कान्ताश्लेषं लप्स्येते तावन्तं कालं लोकसाक्षिकं ताळदळमारुह्य सञ्चरणसाहसात् नोपरता भविष्यामि। त्रिविक्रमावतारदशायां रोदसी व्याप्य स्थित्वा भुवमखिलं एकेनैव क्रमेण यो विचक्रमे सोयं मम प्रियः साम्प्रतं श्रीमति गन्धपुरे नित्यं सन्निधत्ते। तत्र चत्वरे साहसमिदं सुप्रसिद्धमनुष्ठास्यामि ।

इत्थं वासिष्ठवंश्यो व्यवृणुत तनुजो वेदवित्कृष्णसूरेः
दौहित्रो यज्ञदीक्षाभिधविबुधमणेः वाङ्मवंशोज्ज्वलस्य ।
आचार्यात् श्रीनिवासात् यतिकुलतिलकात् लब्धवेदान्तयुग्मः
ह्रस्वश्रीमद्दळोक्तिं कलिरिपुकलितां वीररघ्वीशसूरिः ॥

इति श्रीमच्छ्रीनिवासमहादेशिकदिव्यकटाक्षलब्धोभयवेदान्तार्थजातेन तर्करत्नेन न्यायवेदान्तशिरोमणिना श्रीमधुरान्तक

ति. ई. वीरराघवसूरिणा प्रणीतं

'शिरियतिरुमडल् विवरणं'

सम्पूर्णम् ।

Registered No. M 2300.

Book XXIV ॥ श्रीः ॥ Nos. 9 & 10

46

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २४] कलि ५०५१ खर { वृषभ साधारण सं ९
मिथुन शास्त्रानुबन्ध सं १०
आहत्य सं १०

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

May & June 1951

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.
निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः। ३५७—३६०

1 मेनका।
2 व्याजोक्तिरत्नावली।
3 अमात्यसम्पत्।
4 संस्कृतग्रन्थजातम्।
5 विश्वरूपवृत्रवधः।
6 यथाभिमतम्।
7 प्रकृतिभेदः।
8 प्रतिबोधनम्। in the wrapper

स्थितौ अन्वेषयताम् । एकद्वनिमेषकालेन पालकभटाश्चत्वारोऽपि चोरवद् दृश्यमानं कञ्चन रूक्षं मनुष्यमाकर्षन्त आगच्छन् । अन्वागता प्रासाद-सम्मार्जयित्री 'किं नाम अद्भुतम् । भासुरे दिवाकाले नु चोरः प्रासादाभ्यन्तरमागच्छेत् ? तालवृक्षवत् कियन्नाम उच्छ्रितः । साधु भञ्जयत कटिम्' इति विस्मिता उच्चैराचक्रन्द । तया सह आगत उद्यानपालः 'धनं भूषणानि वस्त्राणि सर्वं यत्र निहितं तत् खलु गृहं प्रसमीक्ष्य प्रविष्टवान् । अस्मदाक्रोशानुपदं पुष्पवृक्षकभाजनच्छायायां निलीयते स्म । अहं नु मोक्ता । लगुडेन सम्यक् प्राहार्षम्' इत्यभिधाय स्वहस्ते स्थितं वेणुदण्डमुन्नमय्य पुनरपि प्रहरिष्यन्निवादर्शयत् । तथा तयोरुभयोः स्वस्ववैभवं प्रकाशितवतोः स 'चोरः' सञ्जीव्यार्यस्य पुरत आनीय स्थाप्यते स्म । सर्वैरपि बलवत् प्रहृतत्वात् तस्य देहे बहुभ्यः प्रदेशेभ्यः रक्तं स्रवदासीत् । मूर्छया अवसादेन च विसंस्थूलीभवन् सः ततोऽपि परं को दण्ड आत्मनो भविष्यतीति बिभ्यत् सन्त्रासचटुलां दृष्टिमकरोत् । सञ्जीव्यार्यदर्शन-समनन्तरं सः अतिमात्रदीनध्वनिः 'प्रभो' प्रथमं मे किञ्चिज्जलं दत्त । नाहं चोरः । मां प्रहृत्य मारयन्ति स्म" इति प्रस्खलितमुक्त्वा अनुनाथन् अधः पपात ।

परितापकरं तत् प्रेक्षणकं दृष्टवान् सञ्जीव्यार्यः अनुकम्पया तीर्थमानाय्य सपदि तस्मै अर्पयित्वा पाययति स्म । पञ्चभिर्निमेषैस्तस्य मूर्छा न्यवर्तत । स सद्य उत्थाय सञ्जीव्यार्यं प्रति अञ्जलिं बध्वा 'स्वामिन्, भवत्पुत्रपौत्रादयः सुखं जीवन्तु । मम प्राणानरक्षिष्ट । महाराज, नाहं चोरः । मम स्थानं चेङ्गल्पट्टु' इत्याह स्म ।

सञ्जीव्यार्यः 'अरे, मा स्म अनृतं वदः । अनृतवदने एते वटवः त्वदुपरि श्ववत् निपत्य दशेयुः । चेङ्गल्पट्टु—अस्मात् केन कार्येण इमं प्रासादमागमः ? प्रासादमागतश्च स्थलान्तराणि विहाय धनगृहं यदगमः तत्र किं कारणम् ? इत्यपृच्छत् । अनुपदं स पुरुषः 'अहं कस्यैचिदम्बायै लेखमानीतवानस्मि । अत्र सा वर्तत इत्यवादिषुः । मार्गमजानन् अन्तर्गतवानभूवम् । मामवेक्ष्य चोरश्चोर इति केचिदाक्रुक्षन् । मम भीतिरभूत् ; अधाविषम्' इत्यब्रवीत् । तदाकर्णितवन्तः सर्वे विस्मयं अनुकम्पां च भेजिरे ।

अनन्तरं सञ्जीव्यार्यः 'कस्या अम्बायै लेखमानैषीः ? उद्धर तम्' इत्यवोचत।

तदाकर्णितवान् स मनुष्यः स्ववस्त्रस्थं कञ्चन ग्रन्थिं विस्रंसयन् "प्रभातात्प्रभृति कुत्रकुत्र नाम अटनमकार्षम्। तां अम्बामुपलब्धुं न शक्यमभूत्। अयःपथस्थानके यदस्ति 'रामस्वामिमुदलिसत्रं' तत्र वर्तेन, लेखमर्पयेति स आर्योऽवदत। तत्र अगमम्। नावर्तिष्ट। तत्र स्थितः रक्षापुरुषः 'यदि यः कोऽपि अन्विष्यन्नागच्छेत, तोलशिङ्गप्पेरुमाल्-कोविल्-वीथ्यां श्यामार्य इति कश्चिदस्ति तस्य गृहं प्रति प्रेषयेति अवोचत' इत्यवोचत। तत्र गत्वा अद्राक्षम्। तस्मिन् गृहे स्थिता अम्बा अस्मिन् प्रासादे विचारयेत्यवादीत्। इमं प्रासादमजानन् कति नाम प्रासादान् अगमम्, किं जानीथ ? इमं लेखं पश्यत। सर्वेषु प्रासादेषु हूणास्तुरुष्काश्च वसन्ति। अस्मिन् एकस्मिन् प्रासादे आर्या वसन्तीत्यश्रौषम्। इदं पश्यत" इति वस्त्रग्रन्थेरन्तः 'तेमनीभूतं' किञ्चन काकदमादाय प्रासारयत्। सञ्जीव्यार्यः तदादाय अवैक्षत। तस्य मुखविलासः इत्थं लिखित आसीत् – मद्रपुरे पार्क्-स्थानकस्य सन्निहिते रामस्वामि-मुदलियार्-सत्रे वसन्त्यै तञ्जापुर उपमाण्डलिकप्रभोर्जनन्यै तत्रभवत्यै कनकाम्बायै। चेङ्गल्पट्टु-अत्र वसता रङ्गराजुना प्रेषितम् – इति। एवं लिखितं पठितवान् सञ्जीव्यार्यः वराहस्वामिना आस्थितं गृहं सस्मितः प्रविश्य 'चेङ्गल्पट्टु अतः कश्चित् लेखमानीतवान्। मार्गमजानन् सः प्रासादस्यान्तःप्रविष्टोऽभूत्। तावति सर्वे चोरश्चोर इत्याक्रुश्य तं प्रहृत्य मूढकार्यमकार्षुः। उपमाण्डलिकस्य जनन्यै कनकाम्बायै चेङ्गल्पट्टु-अतः रङ्गराजुर्नाम कोऽपि प्रेपितवान्। तस्या अम्बायाः सकाशमिमं प्रापयत' इति वदन् लेखं वराहस्वामिनि अर्पयति स्म। "सा अम्बा इदमास्ते। अहमर्पयामि 'आस्स्व' इति तं पुरुषं ब्रूत" इति ब्रुवति वराहस्वामिनि तं गृहीतवति सञ्जीव्यार्यो बहिर्जगाम। वराहस्वामिना आस्थिते गृहे तदानीं कनकाम्बा स्वर्णाम्बा मेनका इतीमास्तिस्र एव एकस्मिन् पार्श्वे अपसृत्य अवर्तन्त अतः सञ्जीव्यार्यापगमानुपदं मेनका त्वरितमुपधाव्य वराहस्वामिनः सकाशात् लेखमगृह्णात्। चेङ्गल्पट्टु-अतः रङ्गराजुना लिखितो लेख इति श्रवणक्षणात् प्रभृति तच्छ्रवणकुतूहलेन अतिव्यग्रा स्थिता कनकाम्बा

स्वर्णाम्बा, उभे अपि तं वाचयेति मेनकामभ्यर्थयामासतुः। सा वीणानादमधुरेण ध्वनिना एवं लिखितं तमवाचयत्—

वृद्धाम्बायाः पादयोः अनेककोटिदण्डप्रणामान् समर्प्य रङ्गराजुना लिख्यमाना वार्ताः – इतः पूर्वं मया चेङ्गल्पट्टु-धूमशकटस्थानकात् लिखितो लेखः युष्मत्सकाशं प्राप्तः स्यात्। मम 'दिवाचौर्यपाक'-गमनं, श्रेष्ठितः सकाशात् विषयान् विज्ञाय पुनः चेङ्गल्पट्टु-गमनं, स्वामिनोऽङ्गवस्त्रलाभं, समुचितप्रयत्नकरणेन पालकैः क्रियमाणस्वाम्यन्वेषणविषयांश्च तस्मात् लेखात् भवत्यो ज्ञातवत्यः स्युः। स्वामिना ऋणतया गृहीतं धनं कृत्स्नं नष्टमित्येव निरणैषम्। स्वाम्यन्वेषणस्य पालकैरेव क्रियमाणतया मम तत्रावस्थाने नास्ति फलमित्यचिन्तयम्। धनाभावेन शस्त्रचिकित्सायाः अकरणे स्वामिन्या अम्बायाः किं जीवितापायः स्यादिति अतीव त्रस्तः चिन्ताकुलश्चाहं सपदि तञ्जापुरं गत्वा धनाय संविधातुं मतिमकार्षम्। स्वामिनमन्विष्य उपलभ्य मद्रपट्टणे भवदध्युषितं 'सत्रं' नीत्वा समर्पयितुं पालकान् प्रार्थितवानासम्। स्वामिनः उद्योगं अङ्गलक्षणानि च विस्तरेण तेषां ज्ञापितवान्। ते अनल्पामनुकम्पां अनुशोचनं चाकुर्वन्। स्वामिनमतिश्रद्धयाऽन्विष्य उपलभ्य समर्पयिष्याम इति दृढां वाचं ते ददति स्म। सद्योऽहं शकटमारुह्य तञ्जापुरमगच्छम्। यथाकथञ्चित् धनं सम्पाद्य प्रेषणीयमिति यावच्छक्ति प्रयत्नमकार्षम्। अहं परमदरिद्र इति भवत्यो जानन्ति। मदावासगृहं च भाटकक्रीतम्। गृहे स्थितानि च पात्राणि मृण्मयानि। मद्गृहिण्या नासाश्रोत्रे छिद्राणि परं आभरणनि भवन्ति। तथा महतः प्रभोर्मम च द्विशतीरूप्याणां च कियद् दूरम्। ममास्मिन् लोके विंशतिताम्रिकाऽर्हन्त्यपि नास्ति। ऋणादानबुद्ध्या बहून् उपसृत्य यतितवान्। ते निरुपयोगं स्वर्णं रजतं मृदं दृषदं च बहुमन्यन्ते, न तु बहूपयोगार्हं मनुष्यं मां मनागपि गणयन्ति। 'स्वामिनः कृते धनमपेक्षितम्। एकस्य द्विगुणं गृहीत्वा प्रत्यर्पयिष्यामि' इत्युपपाद्य अवदम्। मदीया वाक् बधिरकर्णशङ्खध्मानकल्पा बभूव। ततःपरं किमहं कुर्याम्। न किमपि कर्तव्यं मे प्रत्यभात्। यथाकथमपि धनं लब्ध्वा प्रेषणीयमिति मत्तोऽपि मद्गृहिणी उत्सुकतरा आसीत्। तूष्णीमवस्थानम-

साकमशक्यमभूत् । शिर आधीकृत्य वा धनं गृहीत्वा अस्यामापदि उपकर्तव्यमिति मम गृहिणी रात्रिन्दिवं मामतुदत् । तदुपरि मम च मनः अन्तस्तुदद्भवत् । आवामुभौ सम्भाष्य सम्भाष्य अन्ते एकं निर्णयमकुर्व । जानन्ति भवत्यः यदावयोरेकपुत्र्याः पद्मावत्याः ऋतुं प्राप्तायाः द्वौ वत्सरौ भवत इति, सा अतिसुन्दरीति, अधीतविद्येति, आवाभ्यामतिप्रेम्णाऽभिवर्धितेति च । बहवो महामनुष्याः स्वपुत्रविवाहाय दातव्यां तामपैक्षन्त । अपि च अस्मत्प्रतिवेशवासी हीरास्वामिराव् इति कश्चिदस्ति वणिक् । तस्य तिस्रो भार्या मृता अभवन् । पुत्राः पुत्र्यश्चाहत्य सप्तदश व्यक्तयः सन्ति । इदानीं तस्य वयांसि षष्टिः । सः चतुर्थभार्यात्वेन अस्मत्पुत्रीदाने सहस्रं रूप्याणि दास्यामीति कतिपयेभ्यो मासेभ्यः पूर्वं वाचं प्रैषयत् । ततःपरं च मुहुर्मुहुः पुरुषद्वारा चोदयन्नवर्तत । शुकवदभिवर्धिताया जातायाः तस्मै बलीकरणात् वरं जीवन्त्या एव कूपे पातनमिति मत्वा आवां न तत् सम्मंस्यावह इति प्रतिवाचं प्रैषयाव । अद्य आवयोः तस्य मनुष्यस्य स्मृतिरागमत् । तस्मा एव कन्यां दातुं निरणैष्व । अस्मदपत्यं पद्मावतीमाकार्य तस्यै स्वामिन्याः स्वामिनश्च जाता विपदः विस्तरेण आवेदयाव । द्वयोः शतयोः रूप्याणामलाभेन स्वामिन्याः जीवितसंशयदशायां स्थितिं, तत्कृते आवाभ्यां कृतं विवाहसंविधानं च प्राकाशयाव । विस्तरं श्रुतवती पद्मावती स्वामिन्या दशां प्रति अतिमात्रं विषण्णा तज्जीवितरक्षणार्थं वृद्धं हीरास्वामिनमहं परिणेष्यामीति पूर्णेन मनसाऽभ्युपगममकरोत् । सद्योऽहं तमुपेत्य आदौ अस्मदध्यवसायमप्रकाश्य द्वे शते रूप्याणि ऋणं देयानीति अभ्यर्थनामकरवम् । सः 'न ऋणं दास्यामी'ति 'विवाहाय युष्मत्पुत्रीदाने द्वयोः शतयोःस्थाने चत्वारि शतानि दास्यामि' इति 'विवाहकाले पुनस्सहस्रं दास्यामि' इति चावोचत् । उपरि वाचमवर्धयन् सपदि सम्मतिमददाम् । चत्वारि शतानि रूप्याणि गृहीत्वा विंशतीं भवत्यै प्रेष्य अवशिष्टं स्वाम्यन्वेषणकार्यार्थव्ययाय हस्ते कृतवानभवम्" ।

इत्यनुवाचितवती मेनका उपरि अनुवाचयितुमक्षमा तावति विरराम । रङ्गराजोः तात्त्विकं प्रेमाणं, अनुकम्पां, दयागुणं, स्वार्थे तेन तत्पुत्र्या

The cat was lovingly nourished by the housewife with morsels of food mixed with curds every day on the hope that he would kill the rats which were doing havoc in the rice bin. But in course of time he being accustomed to luxury, begins to help himself stealthily to milk and curds and thinks not of harming the rats. And he could not be driven out of the house even on his being belaboured with the broomstick. 65

चूताः पल्लवमुद्गिरन्ति सुमनस्सौरभ्यसान्द्रा दिशो
वाता वान्ति सुखावहा नवनवोन्मेषैर्मही हृष्यति।
रङ्गस्ते सुपरिष्कृतः पिक, कुतो नाद्यापि सन्दृश्यसे
कष्टं भोः करटः पुरा दहति नस्त्वत्स्थानरूढः श्रुतीः ॥ ६६ ॥

The mango trees are putting forth their buds; all the air is thick with the fragrance of flowers; the comforting southwinds flow about; the earth rejoices with an ever freshening bloom. The stage is ready for you oh! Kokil! Why are you not seen yet? Let not the crow in the meanwhile take your place and burn our ears out with his harsh crowings. 66

नास्माकं कुसुमाकरः किमु मुदे किं नो वयं पक्षिणः
कोऽनर्हार्हनियामकश्चिरतरं धूर्तैर्वयं वञ्चिताः।
इत्याक्रोशकरालितैर्विलुलिते काकैर्निजे पञ्चमे
कालज्ञः पिक, जोषमास्व कुधियामर्घानुरोधः कुतः ॥ ६७॥

'Can we not enjoy the beauties of the Spring? Are we not birds? None shall presume to dictate to us upon the standards of competency or incompetency. For a long time, alas! the rogues have cheated us.' Thus contending in a spirit of perverse hostility the crows disturb the melody

of your sweet PANCHAMA note Oh Kokil, having regard to the indication of the times, you had better take refuge in silence. Will ever the perverted ones have regard to real worth ? 67

ग्रीष्म, स्वागतमुत्प्रमोदय दिशो व्याकोचमल्लीसुमो-
दञ्चत्सौरभभारतुन्दिलवलन्मन्दानिलैः स्वस्ति ते।
त्वद्धाम्ना जगदद्य दुःश्रवरुवद्दुर्दान्तभेकावली-
पङ्कान्तःपरिशोषणेन विकसद्भृङ्गीरवं खेलतु॥ ६८॥

Hail ! oh Summer ! gladden the universe bringing with you the sweet breeze which comes whirling along heavy-laden with the fragrance of the freshly blossoming Mallika flowers. God bless you with long life. Let the world be now filled with the joyful hum of bees while by your heat the harsh-croaking, indomitable muster of frogs shall be dried up with the furrowed mire. 68

किं नाम प्रभुता किमङ्ग, हसितुं किं वाऽथ पुष्पाकर-
श्रीचूडालकुतूहलेन मनसा प्राप्तः सवर्णे भ्रमः।
येनौत्कण्ठ्यविनोदनाय सुदृशः सम्पादिते कौतुके
साकं कोकिलसारिकादिभिरहो काकोऽर्पितः पञ्जरे॥ ६९॥

Is it a caprice of power ? Is it for fun ? Oh friend ! or is it indeed due to your mistaking one of a similar complexion for the crowning ornament of vernal glory ? For, while providing a spectacular diversion for the lady who is love sick, you have most strangely encaged a crow also along with the Kokil, parrot and such other birds. 69

सन्त्वेते वनिताकरार्पितफलक्रीता मुधावन्दिनः
शारीकीरमुखा द्विजेषु कतिचिन्नन्दन्ति वन्धेऽपि ये।

फुल्लारामचरेण भाव्यमनिशं गेयं वसन्तागमे
चर्व्यश्चूतनवाङ्कुरस्त्विति पिक, प्रौढं त्वदीयं यशः ॥ ७० ॥

We care not for such of the birds as the parrot and the Sarika who barter their liberty for the mean privilege of being fed by the hands of fair ladies and who empty-heartedly flattering them to their faces, have reconciled themselves to their encagement. Oh Kokil ! glorious indeed is your fame that you roam only in groves teeming with fresh blossoms, that you sing only on Spring arriving, and that you nibble at nothing except the tender sprouts of the mango tree. 70

नूनं मूलविलूनपादपचिते यूथाग्रणीः काननेऽ-
खेलिष्यत्कलभस्तु यः कुटिलतां चेन्नाश्रयिष्यद्विधिः ।
कष्टं भूरुहकाण्डभारिकतया व्यापारितोऽसौ नरैः
शैलोदग्रतटीगतागतपरिक्लिष्टः श्वसित्यायतम् ॥ ७१ ॥

If destiny had taken a different turn, the young elephant would have reigned supreme as the leader of his kind in the forests strewn all over with trees uprooted by him for mere sport But now, owing to his ill-luck, he is being employed by men as a bearer of logs of wood and toils panting up and down the steep ridges of the mountain 71

घातश्रोत्किरणोद्यतः प्रकटयन् कर्णाञ्चले चापलं
बिभ्रद्दृष्टिविघातिनीमपि दशामुन्मस्तकां राजसीम् ।
फूत्कारान् विदधत् पुरः सुमनसां स्थूलैर्भुजाक्षेपणै-
र्लक्ष्मीलक्ष्म भवानितीभ, नितरामौचित्यमारोहति ॥ ७२ ॥

You are ever busy with acts of devastation and throwing away. You display a ceaseless waving at the ends of your ears (you encourage tale-bearing activities). You are discovered in a state of being blinded by the dust swung over your head (your courser passions break out riotously and blind your right perspective miserably) You puff contemptuously swinging your trunk (arms) rudely hither and thither in front of the blossoms (the learned and respectable persons) All this indeed, oh elephant! accords well with your being the emblem of the Goddess of Wealth.

72

वेल्लद्‍ध्यायतपर्णशीतलमरुत्सेव्या दिनान्तास्त्वया
त्वत्काण्डैरभितोऽपि मङ्गलभुवो माङ्गल्यमाबिभ्रति ।
रम्भापोत, फलैर्दलैश्च मुकुलैस्त्वं चोपभोगाय न-
स्तन्मोदस्व चिराय कन्दलदविच्छिन्नप्ररोहान्वयः ॥ ७३ ॥

Waving aloft your long leaves you cause the flow of a cool breeze which renders evenings very enjoyable for us. The festive enclosures owe their auspicious mien to your trunks being set up allround. Oh young plantain ! your fruits, your buds, your leaves are all useful to us. Therefore we pray that you may rejoice for ever throwing up a prosperous and undying succession of shoots. 73

नीचं नीचमुपेयुषो भ्रमशतैरप्यन्तरा व्याकुला-
नुत्कूलान्नवसंपदागमवशाद्याश्चाभिया धावतः ।
भौमान् कण्ठगतासुरप्यकलयन् पाथःप्रवाहांस्तृषः
शान्त्यै मानधनेषु चातक, भवानुच्चैः पदं गाहसे ॥ ७४ ॥

# उद्यानपत्रिका ॥

54

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

| | | | | | |
|---|---|---|---|---|---|
| पु. २४] कलि ५०५१ | खर | वृषभ | साधारण | सं ९ |
| | | मिथुन | शास्त्रानुबन्ध | सं १० |
| | | | आहत्य | सं १० |

# अमात्यसम्पत् ॥

—— ०❀० ——

श्रीमति रामायणे आदितश्चत्वारः सर्गाः अस्य आदिकाव्यस्य यथाऽवतारः यो विषयः यद् वैलक्षण्यं तत् सर्वं प्रतिपादयितुं प्रवृत्ताः उपोद्घातरूपा भवन्तीति सर्वविदितमेतत् । अथ

सर्वापूर्वमियं येषामासीत् कृत्स्ना वसुन्धरा ।
प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥

इत्युपक्रम्यमाणात् पञ्चमसर्गात् प्रभृति साक्षात् काव्यप्रवृत्तिः । अयं पञ्चमः सर्गः अयोध्यानगरवर्णनपरः । चतुरन्तायां पृथिव्यां स्थितेषु बहुषु देशेषु अन्यतमः कोसलदेशः । दशरथस्य चक्रवर्तिनः शासने स्थितं कृत्स्नं राष्ट्रं वर्णयितुमप्रवर्तमानो वाल्मीकिः

कोसलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥

इत्येकेनैव श्लोकेन कोसलवर्णनं समाप्य समनन्तरं 'अयोध्या नाम नगरी तत्रासील्लोकविश्रुता' इत्युपक्रम्य आसर्गान्तमयोध्यां वर्णयति । अत्र

तां तु राजा दशरथो महाराष्ट्रविवर्धनः ।
पुरीमावासयामास दिवं देवपतिर्यथा ॥ ९ ॥

तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥ २२ ॥

ति द्विः दशरथवासकथनेऽपि तादृशदशरथावासस्थानतया नगरवर्णन एव व्याख्यानोक्तरीत्या पर्यवसानं द्रष्टव्यम् । एवमेव स्वाभिप्राय इति

तामग्निमद्भिर्गुणवद्भिरावृतां
द्विजोत्तमैर्वेदषडङ्गपारगैः।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैर्ऋषिभिश्च केवलैः॥

इति महत्तरेण वृत्तेन अयोध्यां प्रशस्य सर्गमवसाययन् कविरावेदयति। अथ षष्ठे सर्गे दशरथो वर्ण्यते। अस्यैव सर्गस्य आद्या विंशतिः श्लोकाः पूर्वस्यां सञ्चिकायामुद्धृताः। यथा पौराः सर्वे दुःखलेशरहिताः सर्वसुखसम्पन्नाः विद्याविनयभूषणाः सर्वदोषविनिर्मुक्ताः समृद्धसर्वशोभनगुणाः परमधार्मिकाश्चाभवन्, तथा स राजा तां नगरीं पर्यपालयदिति राजवर्णन एव विश्रान्तिर्द्रष्टव्या। एवं राजवर्णनपरेऽस्मिन् सर्गे राज्ञो दशरथस्यायोध्यानगरपरिपालकत्वमेव केवलमुक्तमिति सूक्ष्मेक्षिका कर्तव्या। जगत्परिपालकत्वं तु तस्य वक्तव्यम्। तदमात्यसम्पत्तिरहितस्य न युज्यत इति पश्यन् भगवान् वाल्मीकिः अनन्तरे सप्तमे सर्गे अमात्यगुणानुपवर्ण्य अन्ते

ईदृशैस्तैरमात्यैस्तु राजा दशरथोऽनघः।
उपपन्नो गुणोपेतैरन्वशासद्वसुन्धराम्॥ १८॥

इत्यादि वदति। तदयममात्यसर्गः। अत्र महर्षिणा प्रतिपादिता अमात्यगुणाः अद्य सर्वेषामेव जनानामवश्यं ज्ञातव्या इति तत्पराः श्लोकाः केचिदुदाह्रियन्ते—

तस्यामात्या गुणैरासन्निक्ष्वाकोस्तु महात्मनः।
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः॥ १॥
विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः॥ ५॥
तेजःक्षमायशः प्राप्ताः स्मितपूर्वाभिभाषिणः॥ ६॥
क्रोधात कामार्थहेतोर्वा न ब्रूयुरनृतं वचः।
तेषामविदितं किञ्चित् स्वेषु नास्ति परेषु वा॥ ७॥
प्राप्तकालं तु ते दण्डं धारयेयुःसुतेष्वपि॥ ९॥
शुचीनां रक्षितारश्च नित्यं विषयवासिनाम्।
ब्रह्म क्षत्रमहिंसन्तस्ते कोशं समपूरयन्॥ ११॥
नासीत् पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित्।
कश्चिन्न दुष्टस्तत्रासीत् परदाररतो नरः॥ १३॥
प्रशान्तं सर्वमेवासीत् राष्ट्रं पुरवरं च तत्॥

# संस्कृतग्रन्थजातम् ॥

:o:

4

## वैदिककाण्डः—ऋक्संहिता ।

सर्वे देवाः साधारणान् कांश्चिद्गुणविशेषान् बिभ्रति। सर्वे ते तेजस्विनः, बलवन्तः, बुद्धिमन्तः, अनुग्रहशीलाः । एवं साधारणेषु बहुषु गुणेषु सत्सु परस्परसादृश्यभूम्ना यदेकस्यासाधारणं विशेषणं तदन्यस्यापि कदाचित् प्रतिपादितमासीत् । यथा वृत्रहन्तृत्वम् । तद्धि भूयिष्ठेषु स्थलेषु इन्द्रस्यैवासाधारणतया प्रतिपाद्यते । तथाऽपि क्वचिदग्नेरपि वृत्रहेति विशेषणं क्रियते । इदमत्र कारणं यद्बहूनि देवताद्वन्द्वानि उद्भूवन् अग्नीषोमौ इन्द्राग्नी इत्यादीनि । अनेन क्रमेण देवताचिन्तनं चिरात्प्रवृत्तं एकस्यैव बहुरूपत्वग्रहणे पर्यवस्यति स्म । अग्निः भूमौ ज्वलनात्मना, अन्तरिक्षे विद्युद्रूपेण, दिवि सूर्याकारेण चेति यस्मान्नानाकारो दृश्यते तस्मात् एकस्यैव बहुधाऽवस्थानमिति बुद्धिरजायत । 'एकं सद् विप्रा बहुधा वदन्ति। अग्निं यमं मातरिश्वानमाहुः' इति ऋषय आहुः। न परमेवमेकस्य नानादेवतात्मकत्वम् अपि तु भूतभविष्यद्वर्तमानसर्वपदार्थात्मकत्वमपि कस्यचिद्देवताविशेषस्य उच्यते । उपनिषत्सु बहुधा वर्धिष्यमाणस्य वेदान्तरहस्यस्य अत्रायं बीजावाप इति मन्यन्ते । क्वचिद्वरुणः, क्वचिदिन्द्रः, क्वचिदग्निरिति बहवो देवाः प्रत्येकं स्वेतरसर्वाधिकत्वेन स्तूयन्ते। एतद्दर्शिनो विमर्शकाः पौर्वापर्येण एषां सर्वेश्वरत्वं अभिमतमासीदिति तर्कयन्ति । वस्तुतस्तु सर्वेयं पाश्चात्यविमर्शकानां पर्यालोचनसरणिः अस्मद्ग्रन्थसंप्रदायानभिज्ञत्वनिबन्धनेति प्रतिभाति । यथा उपनिषत्सु पदार्थान्तरवाचकैरपि शब्दैर्बहुभिः सर्वेश्वर एकः अभिधीयत इति न्यायनिरूपणेन वेदान्तसूत्रेषु निर्धारितमस्ति, तथैव अत्रापि अग्नीन्द्रादिशब्दैः स एकः जगत्कारणभूतः परमात्मा अभिसंहितः इति चेत् गृह्णीयाम न तत्र काचिदनुपपत्तिः स्फुरति ।

देवाः सर्वे आदिमन्तः द्यावापृथिव्योः पुत्रत्वेन क्वचिदभिधीयन्ते । क्वचित् प्राक्तनदेवतान्तरजन्यत्वेन । सोमपानेन ते अमर्त्याः अभूवन्निति च उच्यते । इन्द्रादयः केचित् नित्ययुवान इति । सर्वे ते सत्यशीलाः धर्मरक्षिणः मनुष्याणां सुहृदः रक्षितारश्च । यद्यपि देवाः मनुष्येभ्यः अनुग्रहं कुर्वन्ति तथाऽपि न निरपेक्षाः। यज्ञेषु हविर्दत्त्वा तेषामनुग्रहः

समपाद्यत । 'देहि मे ददामि ते' इति देवानां मनुष्याणां च परस्परं स्थितिः ।

एवंविधेषु देवेषु उपविंशाः प्रधानभूताः । तेष्वपि प्रथमगणनीयः इन्द्रः, यस्य स्तुत्यर्थे पञ्चाशद्विशत्यवराणि सूक्तानि प्रवृत्तानि । तदनन्तरं अग्नेः प्राधान्यम्, ततस्सोमस्य, यस्मादनयोर्द्वयोः क्रमेण द्वे शते शतञ्च सूक्तानि स्तुत्यर्थं प्रवृत्तानि । पर्जन्ययमयोः एषु चरमं स्थानं, यतः प्रत्येकं त्रिभिरेव सूक्तैः इमौ स्तूयेते । अन्येषां देवानां एतन्मध्ये अवस्थितिः ।

देवतासु प्राचीनतमा द्यौः, यस्मात् ग्रीस्-देशेऽपि Zeus इति नाम्ना सा प्रसिद्धा । पृथिव्या सह द्वन्द्वभावेनैव षट्सु सूक्तेषु इयं स्तुता । देवानां अन्येषां च पितृत्वेन अभिधीयमानेयं द्यौः न क्वचित्पुरुषाकारा अवर्णि । यस्मात् दिवः पतन्ती वृष्टिः अत्र क्षेमहेतुर्भवति तस्मात् वृषभत्वेन क्वचिद्वर्ण्यते । निशासु नक्षत्रमालाप्रदीप्तत्वात् मुक्ताप्रवालपरिमण्डितकृष्णाश्वरूपत्वेन क्वचित् स्तूयते । अशनिसंबन्धेन वज्रायुधधारित्वं विद्युत्प्रकाशेन स्मयमानत्वं च तस्याः प्रतिपाद्यते ।

---

# विश्वरूपवृत्रवधः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

तैत्तिरीययजुर्ब्राह्मणतैत्तिरीयारण्यकमन्त्रप्रश्नसंवलिता क्रमान्ततैत्तिरीयसंहिता कार्त्स्न्येन, जटाघनावेकदेशेन चाध्यैयन्त । तैत्तिरीयप्रातिशाख्यव्याख्यानादिषु परिश्रमो विद्यते । अतः बहुविदां बहुग्रन्थकृतां केषाञ्चित् सुहृदां नियमनमनुरुध्य वैदिकविशेषाः प्रतिपादयिष्यन्ते। तैत्तिरीयसंहिताद्वितीयकाण्डपञ्चमप्रपाठके द्वितीयानुवाके पौर्णमासीगताग्नीषोमीयपुरोडाशविधिरर्थवादेनोदनीयत । प्रथमानुवाके तद्विधेरुपोद्घातः द्वितीयानुवाके आदौ तस्योपोद्घातस्य तद्विध्युपयोगश्चाभ्यधीयेताम् । तयोस्सायणभट्टभास्करभाष्ये अनुसृत्यायं विषयोऽद्य निरूप्यते—

त्वष्टुः पुत्रो विश्वरूपः देवानां पुरोहित आसीत् । तेषां स शरीरसम्बन्धी नाभवत् । असुराणां तु स भागिनेयभावमभजत । स सात्त्विकेन शिरसा सोममपिबत् । राजसेनान्नमादत् । तामसेन सुरां पपौ । स

त्रिभिस्त्रिभिश्शीर्षैरुपेतत्वात् विश्वरूपनाम्ना पप्रथे । स यज्ञमण्डपेषु गत्वा सर्वेषां श्रोत्रप्रत्यक्षं यथा भवति तथा देवेभ्यो हविर्भागो युक्त इत्यवदत् । सर्वेषां परोक्षं यथा भवति तथा रहस्ये ऋत्विग्भिस्सहायं हविर्भागोऽसुरेभ्यो युक्तोऽतस्तानेवोद्दिश्य वितरतेत्यवोचत् । तेषामृत्विजां स परोक्षवादो विश्वासमावहत् यस्मात् स परोक्षवादो हृदयपूर्वकः । लोकेऽपि सर्वस्मै पुरुषाय प्रीतिमुत्पादयितुं तवायं भाग इति तत्समीपे वदन्ति । हृदयपूर्वकत्वाभावात् न स उदितो भवति । परोक्षं यदर्थं तु भाग उच्यते तस्यैव भागो हृदयपूर्वकत्वादुक्तो भवति । इन्द्र एतं वृत्तान्तं श्रुत्वा तस्माद्विश्वरूपात् अयमेवं स्वामिद्रोहं सर्वथा कुर्वन् राष्ट्रमप्यस्मत्तोऽपहृत्यासुरेभ्यो दास्यतीत्यबिभेत् । ततस्स तस्य मस्तकानि वज्रमादायाच्छिनत् । तस्य यदुत्तमाङ्गं सोमपानमासीत् स कपिञ्जलोऽभवत् यत्सुरापानं स कलविङ्कः यदन्नादनं स तित्तिरिः । वासवः पापिनां शिक्षायामीश्वरेण नियुक्तानां यमचित्रगुप्तादीनां पुरतोऽञ्जलिं कृत्वा निर्भयस्सन् ब्रह्महत्या मया बुद्धिपूर्वकमेव कृतेत्येवमङ्गीचकार । अकृतप्रायश्चित्तः संवत्सरं निरन्तरं ब्रह्महत्यामङ्गीकृत्यैव तस्थौ । आत्मतत्त्वज्ञानेन पापलेपे तत्प्रयुक्तभये चासत्यपि सर्वेऽपि प्राणिनः तं शक्रं ब्रह्महन् इत्येवं सम्बोध्य तस्याक्रोशमभितोऽकलयन् । ततस्स तस्य जनापवादस्य परिहाराय पृथिवीमुपेत्यास्या ब्रह्महत्यायास्तृतीयं भागं प्रतिगृहाणेत्याह स्म । साऽब्रवीत्—जनाः स्वेच्छया तत्रतत्र भूमिं खनन्ति । तदुपद्रवात् पीडिता भविष्यामीति मन्ये । ततो निमित्तादहं मा पराभूवमिति वरं वृणे इति । अथ पाकशासनः ते खातप्रदेशः संवत्सरसमाप्तेः प्राक् पांसुप्रक्षेपात् तृणाद्युत्पत्तेर्वा पूरितो भूयादित्याचष्ट । तस्मात् वर्षपूर्तेःपूर्वं मह्याः खातप्रदेशः पूरितो भवति । अस्याः खातपूरणं वरेणालभ्यत । इयं ब्रह्महत्यायास्तृतीयं भागं प्रत्यगृह्णात् । अस्यास्स्वीकृतस्तृतीयो ब्रह्महत्याया भागः स्वतस्सिद्धमूषरक्षेत्रमासीत् । यस्मादिरिणं ब्रह्महत्यायास्स्वरूपं तस्मादाहिताग्निश्श्रद्धावान् तस्मिन्निरिणे कदाचिदपि न तिष्ठेत् तत् देवयजनत्वेन नाध्यवस्येद्वा । मरुत्वान् वनस्पतीन् यात्वाऽस्याः ब्रह्महत्यायास्तृतीयमंशं प्रतिगृह्णीतेति कथयामास । तेऽगदन् अवयवच्छेदनजातोपप्लवात् पीडिता भविष्याम इति चिन्तयामः । ततो निमित्तात् वयं मापराभूमेति वरं वृणामहे इति । तदनु मघवान् वः छिन्नप्रदेशात् बह्वङ्कुरा उत्तिष्ठन्त्वित्यभणत् । तस्मात् वृक्षाणां छिन्नप्रदेशात् बह्वङ्कुरा उत्तिष्ठन्ति । एषां छिन्नप्रदेशात् बह्वङ्कुरोद्गमो वरेण प्राप्यत । इमे ब्रह्महत्यायास्तृतीयं भागं स्वीचक्रुः । एषामुपात्त

स्तृतीयो ब्रह्महत्याया भागो वृक्षान्निर्गत्य घनीभूतो यो रसः तद्रूपो निर्यासः पर्यणमत् । यस्मात् निर्यासस्य स्वरूपं ब्रह्महत्यायास्स्वरूपं तस्मात् तत् न भोजनमर्हति । अपि च पक्षान्तरमस्ति— यो लोहितवर्णः यश्च छिन्न-वृक्षप्रदेशान्निर्गतः तस्योभयस्य निर्यासस्य स्वरूपं न भोज्यं भवति । अलोहितस्यानाव्रश्चनान्निर्गतस्य निर्यासस्य स्वरूपम् इच्छायां सत्यामशितुं योग्यमिति । शुनासीरः स्त्रीणां सभामासाद्यास्याः ब्रह्महत्यायास्तृतीयमंशं स्वीकुरुतेति ता अलपत् । ता ऊचुः— ऋतुसम्बन्धाद्वीर्यात् प्रजां विन्दामहै । प्रथमसम्भोगादेव गर्भे जातेऽपि काममुद्दिश्याप्रसवात् पुरुषेण सङ्गन्छामहै । गर्भोपद्रवो निषिद्धदिनकृतःप्रत्यवायश्चास्माकं माभूदिति वरं वृणामहै इति । तस्मात् स्त्रियः ऋतुसम्बन्धाद्वीर्यात् प्रजां लभन्ते काममुद्दिश्याप्रसवात् पुरुषेण सम्पृचते च । आसां तथाविधं प्रजावेदनं पुरुषसङ्गमनं च वरेणासाद्यत । ता ब्रह्महत्यायास्तृतीयं भागमाददिरे । यो ब्रह्महत्यायास्तृतीयो भागः सा रजस्वला योषिद्बभूव । यस्मादेषा ब्रह्महत्याया रूपं शरीरे कञ्चुकवत्प्रतिमुच्यास्ते तस्मात्तया सह न सम्भाषेत । तया साकमेकस्मिन्गृहे न वसेत् । तत्स्वामिकं तत्स्पृष्टं वाऽन्नं नाश्नीयात् । अपि चाभिज्ञाः केचिदेवमाहुः— तैलादिकमेव स्त्रियाः शृङ्गारोपयोगित्वेनान्नस्थानीयम् । तस्मात् तैलादिकमेव नाददीत । तया वा स्वशरीराभ्यञ्जनं न कारयेत । अन्यदन्नं सत्यामिच्छायां भोक्तव्यमिति । गृहे यया मलवद्वाससा पुरुषास्सङ्गच्छन्ते ततो यो जायते स मिथ्यापवादेन दुष्यति । अरण्ये ययोदक्यया पुमांसस्संयुज्यन्ते तस्यास्तेन उत्पद्यते । उच्चारणभीत्या लज्जया वा पराङ्मुखीं यामृतुमतीं नरास्सम्भुञ्जते तस्यास्सभायामवाङ्मुखो वक्तुमशक्तश्च सूनुरुद्भवति । या पुष्पवती स्नाति तस्या अप्सु मरणशीलः, याऽभ्यनक्ति तस्याः कुष्ठी, या भित्तौ चित्रादिकं करोति तस्याः केशशून्यमस्तकोऽपमृत्युमान्, या आनक्ति तस्याः कुण्ठिताक्षः, या दतो धावते तस्याः मलिनदन्तः, या नखानि निकृन्तति तस्याः कुत्सितनखः, या तृणानि लुनाति तस्याः क्लीबः, या रज्जुं सृजति तस्या रज्जुं बध्वा मरणशीलः, या पद्मदलादिना पिबति तस्या उन्मादुकः, या वह्निपक्वेन शरावादिना धयति तस्या वामनस्तनयो जायते । एतद्दोषपरिहाराय रजस्वला तिस्रो रात्रीः सङ्गमादिवर्जनरूपं नियममाचरेत । अञ्जलिना वा अदग्धशरावादिना पात्रेण वा पिबेत् । एतद्व्रताचरणमुत्पत्स्यमानायाः प्रजाया रक्षणाय कल्पते ।

इन्द्रहतपुत्रस्स त्वष्टा कोपादिन्द्ररहितं सोमयागं कर्तुमुद्यच्छत। तस्मिन्मखे मामाह्वयेत्येवं पुरन्दरो व्याहरत्। स तु त्वष्टा तं पुत्रं मेऽवधीरित्यभाषत। स तं पुरुहूतं नोपाह्वयत्। स बिडौजाः यज्ञस्य विघातं कृत्वा बलात्कारेण सोममधयत्। जिष्णुना बलात्पीतस्य तस्य सोमस्य सम्बन्धि रसरूपं यदल्पमत्यशिष्यत तद्गृहीत्वा त्वष्टाऽभिचारं कर्तुमाहवनीयमाश्रित्य पीतशेषसोमहोमेनाग्निं वैर्युत्पादनायोददीपयत्। स तस्मिन् होमे मन्त्रमिममुदचारयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति। तस्यायमर्थः— हे वह्ने, तुभ्यमिदं स्वाहुतमस्तु। इन्द्रस्य शातयिता कश्चित्पुरुषो भूत्वा वर्धस्वेति। यस्मात्कारणादस्योत्पत्त्यर्थमाहुतिमवर्तयत् तस्मात्कारणात्, जातो वृत्रः आहुतिं वर्तयत्येतदर्थमिति व्युत्पत्त्या वृत्रशब्देन व्यपादिश्यत। यस्माद्धेतोरिन्द्रशत्रुशब्दे षष्ठीसमासस्वरमन्तोदात्तं विसृज्य बहुव्रीहिस्वरमाद्युदात्तमुच्चारितवान् तस्माद्धेतोरिन्द्रश्शातयिता यस्येति व्युत्पत्त्या वृत्रस्यास्य इन्द्रो घातकस्संवृत्तः। स जातवेदाः पुरुषरूपेण सम्भवन्नेव होमाधाराङ्गाराभिमानिनमग्निदेवं हूयमानरसाभिमानिनं सोमदेवं च स्वमुखे प्रक्षिप्योभयोः पार्श्वयोरूर्ध्वाधोदन्तपङ्क्तिभ्यामदशत्। उत्पन्नस्स वृत्रः इषुपातो यावति देशे भवति तावन्तं देशं सर्वासु दिक्षु व्याप्य प्रतिदिनमवर्धत। क्रमेणेमान् सर्वानपि लोकानावृणोत्। यस्माद्धेतोरिमान् सर्वाँल्लोकानावृणोत् तस्माद्धेतोः स वृत्रशब्देनोदैर्यत। तस्मात् पाकशासनस्तत्रास। स मम कश्चिच्छत्रुरजनि इत्याचक्षाणः प्रजापतिमसेवत। स प्रजापतिः वृत्रमुद्दिश्य कृत्याभिमन्त्रितजलेन वज्रं सिक्त्वा एतेन जहीति ब्रुवन् सुत्राम्णे प्रायच्छत्। तेन कुलिशेनेन्द्रो वृत्रमहन्।

अत्र सायणाचार्यः मलवद्वाससा न संवदेतेति निषेधः केवलपुरुषार्थ इति, निजनिर्मितजैमिनीयन्यायमालातद्विस्तरयोरुक्त सपूर्वपक्षं सिद्धान्तं तथैव प्राकाशयत्। भट्टभास्कराचार्यः द्वितीयकाण्डचतुर्थप्रश्नद्वादशानुवाकस्थस्यात्रत्यस्य च स्वाहेन्द्रशत्रुर्वर्धस्वेति मन्त्रस्य भाष्ये, महाभाष्यकारेण पस्पशाह्निके व्याकरणाध्ययनानुषङ्गिकप्रयोजनप्रदर्शनाय मन्त्रो हीन इति पदद्वयमपनीय तत्स्थाने दुष्टश्शब्द इति पदे निवेश्य पठितम्—

'दुष्टश्शब्दस्स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोऽपराधात्' ॥

इति पाणिनीयशिक्षापद्यं प्रमाणत्वेन प्रादर्शयत्।

पेक्स्पिअर्-कृतं

# यथाभिमतम्॥ III.2

—❀—

आर्लण्डो— दयस्व, कं प्रति कालो गच्छति ?

रोसलिन्द्—अये, वधूं प्रति विवाहनिश्चयदिनस्य तन्निर्वर्तनदिनस्य चान्तराले स मन्दं गच्छति; यद्यपि तदन्तरालं सप्तदिनमात्रमेव तथापि कालस्य गतिस्तथा मन्दा भवति यथा तत् सप्तवत्सरदीर्घं भाति।

आर्लण्डो—कं प्रति कालश्चलति ?

रोसलिन्द्—लाटिन्-भाषानभिज्ञं पुरोहितं प्रति, अरसिकं धनिकं प्रति च; यतः एकः विद्याभियोगस्याशक्यत्वात् सुखं निद्राति, अपरः क्लेशानुभवविरहात् सानन्दं जीवति : एकस्य अवसादकारी विद्याधिगमभरो नास्ति, अपरस्य अत्युद्वेजकदारिद्र्यभरो नास्ति : इमौ प्रति कालश्चलति।

आर्लण्डो—कं प्रति स धावति ?

रोसलिन्द्—आघातं नीयमानं चोरं प्रति ; यतः यावन्मन्दं पदविन्यासः शक्यः तावन्मन्दमपि गच्छन् सः अतित्वरया तत्र गतमात्मानं पश्यति।

आर्लण्डो—कं प्रति सः निश्चलस्तिष्ठति ?

रोसलिन्द्— विरामस्थान् वागाजीवान् (व्यवहारविदः) प्रति। यतस्ते कालस्य च कालस्य च मध्ये — ग्रीष्मादि-विरामावसरे—निद्रान्ति। अनन्तरं च कालः कथं चलतीति न जानन्ति।*

---

* कालगमनस्य विद्यमानत्वाविद्यमानत्वभेदेन द्वेधा विभागे वागाजीवविषये अविद्यमानतैव, यस्मात् विश्रान्तिसमये निद्रानिलीनत्वात् प्रवृत्तिसमये व्यवहारेषु अतिवैयग्र्याच्च ते कालं गच्छन्तं न जानन्ति। विद्यमानं तु गमनं तीव्रमन्दमन्दतरभेदेन त्रिविधम्। तत्र वध्यस्य चोरस्य विषये तीव्रम्। शक्यस्य सर्वस्य विलम्बस्य करणेऽपि वधक्षणस्य झटिति प्राप्ततया प्रतीतेः। निश्चितविवाहकन्याविषये मन्दम्। सा हि तदेकचित्ता सती कथं तद् दिनं स मुहूर्तः अद्यापि नागच्छतीति उन्मनायते। लाटिन्-मूढस्य पुरोहितस्य अरसिकस्य धनिकस्य च विषयेमन्दतरम्। अनयोर्हि आहारचिन्ता नास्ति। अत एव तत्सम्पा-

आर्लेण्डो— कुत्र ते वासः, सौम्य ?

रोसलिन्द्— अनया मम स्वस्रा अजपालया सह ; अत्रैव अस्य वनस्य पर्यन्ते कञ्चुलिकाया अञ्चल इव ।

आर्लेण्डो— किमयमेव ते अभिजनः ?

रोसलिन्द्— यथाऽस्य शशस्य, यः, त्वं वेत्सि यत्र जायते तत्र वसति ।

---

# प्रकृतिभेदः ॥

I

—आम्रफलम्, आम्रफलम् ।

—रे आम्रफलकार, अत्र एहि । किं फलं त्वय्यस्ति, दर्शय । कथं ददासि ?

—पश्य स्वामिन् । उत्तमजातिफलम् । नेदमद्य अत्र सुलभम् । अल्पमेव आगतम् । सर्वं विक्रीतम् । त्रिचतुराणि फलानि सन्ति । त्रीणि रूप्याणि द्वादशकस्य ।

—फलं तावन्नातिदुष्टम् । मूल्यं तु अत्यधिकं । ब्रवीषि पुनः सकृद् ब्रूहि ।

—साधु । द्वे रूप्ये त्रीन् पादांश्च कुरुध्वम् । उं । गृह्णीत । कति फलानि सन्तु । एकं द्वादशकं वा, अर्धं वा

—न तावन्ति मे अपेक्षितानि । एकं द्वे वा क्रेष्यामि । एकस्य एकमाणकं दास्यामि ।

---

दनार्थप्रवृत्तिविशेषश्च । तेन विद्याव्यसनेन कालयापनार्हौ इमावुभौ । तत्र एको भाषानभिज्ञत्वात् अपरो विद्यायां रुचिविरहाच्च न तथा कालं गमयितुं शक्नुतः । एवं तूष्णीमवस्थानात् अनयोर्विषये कालो मन्दतरं यातीति भावः ।

—अपेहि अग्य,बहु फलमक्रैषीः । एतदर्थं नु सदम्भमाहूतवानसि । क्रेतुमशक्तैः तूष्णीमवस्थेयम् । .... ....

—अरे तात । किमये एवं कुप्यसि । बहवो बहुधा पृच्छेयुः । तत्र किं कोपः कार्यः । त्वदुक्तमेव मूल्यं किं सपदि सर्वे दद्युः ?

—अपेहि अग्य, अलम् । त्वादृशैः क्रेतृभिर्भाव्यम् । तूष्णीमास्स्व । भाषसे भाषणम् .... ....

II

—आम्रम्, आम्रम् ।

—अये आम्र, एहि तावदितः । फलं दर्शय, किं जानपदम् उत जात्यम् । किं मूल्यं ब्रवीषि ?

—इदमार्य, सम्यक् पश्यतु भवान् । मदीयानां फलानां गुणान् किमहमेव कथयानि । एकं फलं कर्तित्वा भुक्त्वा परीक्ष्यताम् । तृप्तौ सत्यां क्रीणीत । न चेत् गच्छामि ।

—अस्तु । मूल्यं कियत् ।

—एकस्य षडाणकाः ।

—सौम्य, याहि त्वम् । तावन्मूल्यं मया दातुं न शक्यम् ।

—न तथा स्वामिन् । यद् भवत इष्टं तन्मूल्यं भवान् ब्रवीतु । सम्मतौ दास्यामि न चेत् गमिष्यामि ।

—तन्माभूत् । कोपस्ते भवेत् ।

—को नु स्वामिन् कोपः । भवदभिमतं भवन्तो ब्रुवन्ति । अस्माकं सम्मतत्वे दद्मः न चेन्न । तत्र कोपस्य कोऽवकाशः ? एकस्य पादाणक इति भवान् पृच्छतु । नाहं कोपिष्यामि ।

---

Registered No. M 2300.

Book XXIV ॥ श्रीः ॥ Nos. 11 & 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २४] कलि ५०५२ खर { कर्कट साधारण सं ११
सिंह शास्त्रानुबन्ध सं १२
आहत्य सं १२

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

July & August 1951

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.
निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः। ३६१—३६४

1 मेनका।
2 व्याजोक्तिरत्नावली।
3 प्रजापालनम्।
4 संस्कृतग्रन्थजातम्।
5 वैदिकविशेषाः।
6 यथाभिमतम्।
7 राज्यनिर्वहणम्।
8 प्रकृतिभेदः।
9 प्रतिबोधनम्। in the wrap[per]

च कृतं त्यागं च पश्यतां मेनका, स्वर्णाम्बा, कनकाम्बा, वराहस्वामी, इति चतुर्णामेषामत्यन्तविद्रुते मनसि कृतज्ञतापरीवाह उदजृम्भत। चक्षुषोरानन्दबाष्पः निर्झरवत् प्रास्रवत्। देहः प्रवृद्धः रोमाञ्चित आसीत्। तदा कनकाम्बा नितान्तविद्रुतचित्तं "अहो बत, रङ्गराजुवत् किमन्यो मनुष्यो लोके लभ्येत। अहो अहो, को गुणः को गुणः! केवलं सेवक इति अनक्षरज्ञो मूढ इति च किल जना अवमन्यन्ते। अक्षरज्ञमूढेषु किमीदृशं परोपकारित्वं त्यागः औदार्यं च भवेयुः? तस्य कृत्स्नमिदं राज्यं दत्वा सम्मानेऽपि किं तदनुरूपं भवेत्? आः, मनुष्येण सता एवंविधेन हि भाव्यम्। ईदृशमुत्तमं पुत्रं कस्या नु पुण्यवत्या उदरं धृत्वा प्रासूत!" इत्यभिधाय महान्तं विस्मयमापेदे।

तदाकर्णितवती मेनका 'तस्य भार्यापुत्र्यौ हि गुणेषु तमतिक्रान्ते वर्तेते। पुरुषो भार्या पुत्रीति त्रयोऽपि एकमनसः गुणवन्तश्च भवन्तीत्येतद्विना मनुष्याणां प्राप्यं किमन्यत् सुखमस्ति। तादृशानां जीवितस्य स्वर्गसुखमपि न तुल्यं भवति' इत्यवदत्।

स्वर्णाम्बा— 'एषामीश्वरः कदापि न हानिं करिष्यति' इति मृदु भाषित्वा स्वकीयां हार्दां कृतज्ञतां प्रकटयामास।

कनकाम्बा—साधु। मेनके, उपरि वाचयाम्ब। स इतोऽपि किं किं कार्यं कृतवानिति पश्येम। इति।

मेनका उपरि वाचयति— 'अहं सद्यः गृहं गत्वा विषयान् सर्वान् पुत्रीगृहिण्योरभिधाय ताभ्यां सह भृशं समतुष्यम। स्वामिन्या अम्बायाः सपदि शस्त्रचिकित्सा भवेदिति सा जीवेदिति च मतिमकुर्म। पालकाः कथमपि यजमानमुपलप्स्यन्त इति निश्चयश्च मे मनसि उदभवत्।

ततः परमहं कस्यापराधस्य कृते अस्मत्स्वामिनं शासितारः अधिकारान्निवर्तयन्ति स्मेति विचारयितुमारभे। अनुमतिं विना स्वामी द्विः मद्रपट्टणमगच्छदित्येतदर्थं निवर्तित इत्यजानाम्। तत्र प्रथमवारे स्वामी सञ्चारेण 'अम्बासत्रे' वसति स्म। तदानीं ममापि सहैवावस्थानात् तस्मिन् दिने स मद्रमगच्छदित्येतत् अमूलं मिथ्याकल्पनमिति स्फुटीभवति स्म। सद्योऽहं प्रस्थाय अम्बासत्रमगच्छम्। स्वामी तस्मिन् दिने तत्पुरग्रामणीकरणप्रभृतीनां गणितपुस्तकेषु धर्मसत्रगणितेषु च हस्ताक्षरं विन्यस्य

दिनसङ्ख्यामपि निर्दिष्टवानासीत्। अपि च तदा पालकैर्गृहीत्वा आनीतस्य कस्यचित् चोरस्य कारायां निरोधादेशं दत्तवानभूत्। तावतो विषयान् निस्सन्देहं विज्ञाय तञ्जापुरं प्रत्यागच्छम्।

द्वितीयवारे स्वामी मद्रमागच्छदित्येतद् वास्तवम्। परं तु ततः पूर्वं माण्डलिकोऽनुमतिमदादिति शतेश्वरः तान्दोनिरायः यत् सेवकपक्किरिमुखेन वार्तां प्रैषयत् तदस्मद्गृहे स्थिताः शतेश्वरगृहे स्थिताश्च बहवः सेवका विदितवन्त आस्म। इतरान् सेवकानादाय पक्किरिसमीपमगच्छम्। अस्थाने अनृतमुक्त्वा महतोऽधिकारिणः अनर्थोपादनं प्रति तं वयमनिन्दाम। सः 'शतेश्वरस्य आज्ञया तथा अवदम्' इति, 'एवं माण्डलिकस्य सविधे वक्तुं सज्जोऽस्मि' इति चाभ्युपजगाम। अन्ये च सेवकाः 'उपमाण्डलिकसमीपे आगत्य पक्किरिणोक्तं वयं जानीम इति वक्ष्यामः' इत्यङ्गीचक्रुः। अनुपदमहं इदं सर्वं निर्दिश्य विज्ञापनपत्रमेकं विलिख्य आदाय माण्डलिकं प्रभुं दृष्ट्वा तस्मिन् समार्पयम्। प्रथमं स मम वाचमविश्वसन् ममोपरि सीत्कृत्य पतति स्म। पत्रे लिखितं एकैकमपि विषयं यथातृप्ति निरूपयिष्यामीति पुनः पुनर्दृढमभिहितवति मयि विश्वस्य तस्मिन्नेवाहनि प्रस्थाय अम्बासत्रमगच्छत्। गणितानि पर्यवैक्षत। सर्वेषु सम्यग् विचारणामकरोत्। उपमाण्डलिकः परमार्थतः तस्मिन् दिने तत्र आगत आसीदिति निस्सन्दिग्धमजानात्। सद्यस्तञ्जापुरमागच्छत्। पक्किरिप्रभृतीन् सेवकान् विचारयामास। यजमानं प्रति शतेश्वरस्य महान् द्वेष इति, स्वेनानुमतिर्दत्तेति मिथ्यावाचं पक्किरिद्वारा प्रेषयामासेति च जानन् माण्डलिकः यजमानविषये आत्मना कृतं महापराधं प्रदर्शितं क्रौर्यं च पश्यन् जातानुकम्पः खिन्नमनाः विव्यथे। तेन सः 'स्वस्य यत् किमपि कष्टं भवतु यदि भवति' इति धैर्यमालम्ब्य लेखान्तरं विलिख्य शासितृभ्यः प्राहिणोत्। तत्र 'शतेश्वरस्य वञ्चकवृत्त्या स्वयं प्रतारितत्वात् भूतार्थानविज्ञाय उपमाण्डलिकोपरि लिखितान् दोषान् प्रति सानुशयोऽस्मीति, उपमाण्डलिकः सद्यः अधिकारे स्थापनीय' इति च पुरुषकारवृत्त्या विलिख्य तदुपरि निर्बन्धिकार्यविशेषनिमित्तं स्वस्य स्वदेशगमनस्यावश्यकत्वात् षण्मासविश्रान्तिरात्मने देय इति च प्रार्थनामकरोत्। तस्य निवेदनस्योपरि शासितॄणां समुचितादेशकरणे

विलम्बः स्यादिति प्रतिभानात् तावदन्विष्य स्वामी उपलब्धव्य इति मतिमकरवम्। शासितॄणां सकाशादनुकूलादेशप्राप्तौ सः चेङ्गल्पट्टु-पालकस्थानकं प्रति प्रेषणीय इति माण्डलिकसकाशे विज्ञाप्य तस्यामेव रात्रौ तञ्जापुरात् प्रस्थितोऽभवम्।' इति वाचितवत्या मेनकायाः चक्षुषोरुद्गतानामानन्दबाष्पाणां गण्डयोः स्रवणात् लिपयो न दृष्टिगोचरा अभवन्। उपरि वाचयितुमशक्नुवती सा सपदि विरराम। तत्रत्याश्चत्वारोऽपि रङ्गराजोः दुष्कराणि कर्माणि, महोपकारं, निरुपमां स्वामिभक्तिं च दृष्ट्वा मनस्यमान्तमानन्दं प्राप्य उत्कम्प्योत्कम्प्य अरुदन्।

तदा वराहस्वामी, 'आः। अस्मिन् स्वल्पे काले कति नाम आश्चर्यकार्याणि वृत्तानि। एकमितरदतिशेते। कति नाम विपदः। कति परिभवाः। अहो अहो। श्रोतु हि न शक्यन्ते।' इत्युवाच।

कनकाम्बा— 'किमाश्चर्यम्। एतावदपि नु तस्य स्वयम्प्रमाण (तान्दोनि) रायस्य कार्यम्। अये निकृतिकार, किं नाम ते अनिष्टं मम पुत्रश्चकार? अस्मान् विनाश्य कथमपि त्वं भार्यापुत्रैः सुखं जीव तात। वयं नश्यामो यदि नश्यामः।' इति नितान्तखिन्ना जगाद।

तावति स्वर्णाम्बा मेनकामुखे उद्भिन्नान् स्वेदबिन्दून् प्रेम्णा प्रमृज्य 'अम्ब, उपरि पठ। तव पितरमुपलब्धवान् न वा, तद्धि न ज्ञायते। त्वरितं पठ' इति सकुतुकमभिधाय तां प्रोत्साहयामास। मेनका उपरि पठति।—

''परेद्युः प्रभातेऽहं चेङ्गल्पट्टु आगत्य ऋजु पालकस्थानकं गत्वा प्रत्यवेक्षकं दृष्ट्वा स्वामिनं प्रति व्यचारयम्। मम तञ्जापुरगमनानन्तरदिन एव स उपलब्ध इति स ज्ञापयामास। तदाकर्ण्य अपारमानन्दं प्राप्तवानप्यहं तदुक्तानि विषयान्तराणि श्रुतवान् प्रव्यथितमना अभवम्। किमिति चेत् धनापहारानन्तरदिने प्रभाते स्वामी उन्मत्तवत् प्रलपन् चेङ्गल्पट्टु-समीपस्थायाः क्षीरनद्यास्तीरं गत इति, भृशं अगाधवाहिनि जले अविशङ्कमवतीर्ण इति, सपदि जलेन आकृष्टः नष्टप्रज्ञः नद्यां लुठन् गच्छन्नासीदिति, तत्र स्थिताः पथिकाः कतिपये क्षिप्रं तमादाय तीरं नीत्वा मूर्छामपोह्य 'कस्त्वम्' इति पप्रच्छुः इति, स उपर्युपरि प्रलापानकरोदिति, अनुपदं ते तं पालकस्थानमानीय अर्पयामासुरिति च पालकप्रत्यवे-

क्षकोऽवादीत्। अस्य विस्तरस्य श्रवणेन मानसं विवरीतुमशक्यां व्यथां प्राप। उपरिवृत्तावगमकौतुकेन पृष्ट्वा, सद्यः पालकाः तं वैद्यशालां प्रैषय-न्निति, स तत्र चिकित्स्यमानो वर्तत इति चाकर्ण्य तदैव वैद्यशालामधावम्। मां पश्यन् स्वामी "को न्वरे त्वम ? कुत इह तिष्ठसि ? अपेहि" इति अपरिचितपूर्वीव भाषमाणः श्लथ्य मामभि निष्ठीवनमकरोत्। वस्त्राणि पाटयति स्म। अहं च तत्र स्थिताः कर्मकराश्च केनाप्यश्रान्तमनसः नक्तन्दिवं ततोऽनपसरन्त आस्म। अतिकुशलो भिषक् अनुगुणानि भेष-जान्युपयुज्य श्रद्धया प्रीत्या च चिकित्सां कुर्वन्नासीत्। मया नीताद् वित्ताच्च पञ्चाशतं रूप्याणि तस्मै दत्वा सावधानं चिकित्सा कार्येति प्रार्थ-यम्। सोऽपि तथैव अवहितः कुर्वन्नासीत्। मम जीवितं स्मरणं च स्वामिनि अर्धं स्वामिन्यामर्धमिति प्रस्खलती अभवताम्। अपि तु पट्टणे इयता कालेन शस्त्रचिकित्सा निर्वृत्ता स्यादिति, स्वामिन्यम्बा लब्धस्वास्थ्या स्यादिति च मत्वा धैर्यमालम्ब्य इयन्ति दिनानि स्वामिना साकमवर्तिषि। भवतीभ्यः एकस्य पत्रस्य लेखनायापि अद्यावधि अवकाशो न लब्ध आसीत्। स्वामिनो बुद्धिः क्रमेण प्रसादं प्राप्नुवत्यवर्तत। ह्यो रात्रौ कार्त्स्न्येन प्रसन्नबुद्धिः अस्मद्वृत्तान्तं सर्वमपृच्छत्। तद्दृष्ट्वा आनन्दपारवश्यं प्राप्तोऽहं पट्टणे तञ्जापुरे च वृत्तान् विषयानबोचम्। स्वामी झटित्युत्थाय मां तथैव उपगृह्य आलिङ्ग्य बहुधा अश्लाघत। तदैव पक्षिवत् पट्टणमा-गन्तुं मतिमकरोत्। किन्तु ततोऽपि दिनद्वयं वैद्यशालां विहाय न गन्तव्य-मित्यभिधाय भिषक् निवारयति स्म। तस्मात् स्वामी अद्य प्रातः पुरुषप्रेषणमादिक्षत्। तावदद्य प्रातः तञ्जापुरात् स्वामिनः महानन्दकरी काचन वार्ता आगमत्। माण्डलिकहूणाय षण्मासविश्रान्तिं दत्वा तस्य स्थाने अस्मत्स्वामिनमेव त्रिसहस्रीवेतने तञ्जापुरमाण्डलिकपदे शासितारो नियमितवन्त इति ततोऽवगतमभून्। तदाकर्णनानुपदं मम जातं कुतूहलं ब्रह्मानन्दश्च किं वाचा वक्तुं शक्यम्। तथैवोत्थाय आनन्दनृत्तं कुर्वन् एक-घटिकावधि सन्तोषेण आपूरितः अभिवृद्धः अभूवम्। देवताभ्यः सर्वा-भ्यः उपहारं सङ्कल्प्य यावद्वाग्विभवं अस्तौषम्। स्वामिनि सहस्रकृत्व उक्त्वा समतोषयम्। किन्तु स्वामी तथा अभ्यनन्ददिति नाभात्। स्वामिनी, वत्सा मेनका, जामाता, इतीमान् त्रीन् प्रति कस्याश्चिदपि वार्ताया अश्र-वणात् स्वामिनो मनः पट्टण एव सक्तमासीत्। भवतीभ्यः सद्यः तन्त्री

Oh Chataka! you indeed hold a very high place among those who prize honour before anything as you do not, even when dying with thirst, deign to turn your eyes towards the mundane water-courses which, descend to lower and lower levels, which are frequently confounded by a hundred vortices, which overflow the limits of their banks on their getting an influx of new floods and which run fast as if afraid of applicants. 74

निःशङ्कं किमु शेरते वनमृगास्त्वद्बाहुगुप्ता वने
तेषामुच्छ्रयहेतवेऽप्यवहितस्त्वं कासु वा नीतिषु ।
दर्शं दर्शमनागसो मृगगणान्निघ्नन् क्षुधःशान्तये
मर्माविध्यति यन्मृगादन, भवान् कीर्त्या मृगेन्द्रोऽभवः ॥७५॥

Do the beasts of the forests lie down for rest without fear, being confident of the protection of your strong arms? What laws of justice are you administering for their well being? You kill their harmless selves in groups no sooner than you catch sight of them in order to propitiate your hunger. It pains me sorely oh beast-eater! that you should have ever attained reputation as the king of the beasts. 75

पद्मानां श्रियमाकलय्य कुमुदैर्म्लानं च तेषां च तै-
र्मत्स्यानां बकदाम्भिकैर्निगरणोपायं स्मरद्भिः स्थितम् ।
हंसैरुल्लसितं रथाङ्गमिथुनैः श्लिष्टं च नष्टं पुन-
र्नैको वेद सरोवरप्रमथनं नेदीयसा वारणम् ॥ ७६ ॥

On seeing the lotuses blossom the Kumuda flowers shrank (with envy) and vice-versa. The treacherous cranes stood meditating how best the fish could be stealthily caught and swallowed. The swans sported with joy. The chakra

couple met and separated again. Not one of them, however was aware of the fact that the elephant was near at hand about to carry destruction to the whole lake itself.

76

अश्रान्तं प्रचलोर्मिरम्बुधिरपारोऽसाविति प्राणिन-
स्तास्मिन्नद्रिनिभा इति ज्वलति तद्गर्भे शिखावानिति ।
रत्नान्यत्र तु शर्करा इति कविप्रज्ञाविकासस्त्वयं
नान्यद्दर्दुर तत्र चाखिलविदो बुद्धिः प्रमाणं तव ॥ ७७ ॥

That the ocean is surging with incessant billows, that it is so wide as to have no banks, that the creatures living in it are as big as mountains, that a fire is ever blazing in its bowels and that precious stones lay scattered in it as its pebbles— all this is merely the poet's imagination and cannot be anything different, for oh frog! how such things if they exist could be unknown to you who are all-knowing?

77

श्रीमान् दर्शनमात्रतोऽपि जगतामानन्दनश्चन्द्रमाः
सौभाग्यं कमलाकरस्य सुरभेरन्यादृशं दीव्यति ।
अन्योन्यं गुणसम्पदां बहुमतौ तौ चेन्न धत्तः स्पृहां
कस्तत्रार्हति सर्वथा भुवि गुणश्लाघैव निर्वापिता ॥ ७८ ॥

The very sight of the shining moon delights the world and the beauty of the fragrant lotus-pond stands unparallelled. But if they do not mutually recognize and appreciate each other's rare excellences, who else is competent to do so? The net result is that on the earth, unfortunately all generous recognition of other's merits is for ever extinguished.

78

क्ष्वेलं प्रागुदितं निपीय कलयन् स्वस्थं जगच्चाखिल
निःशङ्कोऽसि महेश, शङ्कर इति ख्यातिश्च ते सङ्गता ।
किं त्वद्यापि खलात्मनां स परितो वाचि स्फुरन् निर्दह-
त्यस्मान् किं परिदेवितैरुत पुरो लब्धप्रतिष्ठस्य ते ॥ ७९ ॥

Once upon a time you swallowed the poison which emerged (from the ocean) and you have presumed that the world is safe for ever, never suspecting any further mishap. And the fame of your being the comfortor of all has stuck to you. But oh lord! Mahesa! even to day that same poison spurting out of the tongues of wicked men scorches us badly. Alas! what good is there in complaining to one who being once safely established in his reputation never more cares to listen to the voice of the aggrieved. 79

पुष्टस्त्वं शिशुरेव यैर्न कुरुषे तेषां हितार्थं वचः
क्वेदानीं मधुरास्व मौनमुदितः क्लेशस्तवोद्गायतः ।
गूढेर्ष्यैरिति पक्षिसंसदि मृषाश्रद्धाविशालं वचो
ध्वांक्षैरभ्युपपादितं कलरवः शृण्वन् जगौ केवलम् ॥ ८० ॥

"You do not pay heed to the wholesome counsel of those who nourished you from your childhood It is not yet Spring now. So keep silent. Don't you see that you are fatigued by even this much of a song." In the assembly of the birds. the Kokil heard this admonition of the crows who were prompted by secret jealousy and spoke large words with pretended concern, and coolly resumed its song (without making any answer.) 80

पद्मेन्द्वोरुपमानभावमुखरो वक्त्रस्य वामभ्रुवा-
मन्योन्यं कविपाश एव विदितः प्रद्वेषणाडिन्धमः ।

एकैकोऽप्युपमार्हतां यदनयोरात्मन्यसाधारणं
व्यङ्क्तुं प्रस्फुरितः परस्य सहते नैवोन्मिषन्तीं श्रियम् ॥ ८१ ॥

The accursed poet repeatedly comparing the face of lovely women with the lotus and the moon is indeed responsible for inciting hostility as between the latter two ; for each of the two vying with the other for demonstrating in itself the sole eligibility for the comparison, has become extremely intolerent of the other's improving in point of loveliness. 81

आसृष्टेरपि च प्रवर्तनधुरां लोकस्य निर्वर्तय-
न्नुद्यन्नस्तमयन् पुनः पुनरपि क्रान्त्वाऽयने द्वे पृथक् ।
भास्वन्निर्भरमुच्छ्वसिष्यसि कदा शान्ते किमेवोष्मणि
प्रायः कष्टमविश्रमः परहिते व्यूढोऽधिकारः सताम् ॥ ८२ ॥

From the first day of creation you govern the working organism of the universe. Again and again you rise and set coursing through the two heavenly path-ways alternatively. Oh Sun ! when are you going to breathe freely off your duty ? Is that likely only when you cool down (into a dead mass) ? Alas ! invariably, the responsible occupations of the good for the benefit of others afford no scope for rest at all. 82

त्रैलोक्याभयदेशिको दिनमणिश्चक्षुश्च चक्षुष्मतां
यातोऽस्तं यदि शोच्यमेव तु परं किं शोचता साध्यते ।
उन्मृष्टेन्दुकलाद्युतिर्विकसितव्योमाङ्गणा तारकै-
रुन्निद्रस्मरशासनाऽपि च निशा सद्यः सुखायास्तु नः ॥ ८३ ॥

 61

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २४] कलि ५०५१ खर { कर्कट } साधारण सं ११
सिंह } शास्त्रानुबन्ध सं १२
आहत्य सं १२

# प्रजापालनम् ॥

राज्यक्लप्तेः प्रजापालनमेकं परमोद्देश्यम् । पालनं सर्वप्रकारं विवक्षितम् । रात्रौ सुप्तेषु जनेषु चोराः सन्धिं कृत्वा गृहं प्रविश्य धनानि वस्तूनि च हरन्ति ।

संस्नाप्य, केशान् प्रसाध्य, तिलकयित्वा, सुक्षालितं वस्त्रमाभरणानि च धारयित्वा शिशून् कलाशालां प्रेषयन्ति । सायं न निवर्तन्ते । परितोऽन्वेषयन्ति । दूरे स्थिते क्षेत्रकूपे कस्मिंश्चित् अपनीताभरणं शिशोः शरीरं प्लवते ।

धूमशकटे प्रयान्ति । शकटो महता वेगेन गच्छति । कवाटानि दत्तार्गलानि । कथमपि चोरा अन्तः प्रविशन्ति । तं तां वा पाणिपाद-बन्धेन निश्चेष्टयन्ति निर्जीवयन्ति वा । ततः तदीयं स्वं सर्वं हरन्तो धावन्ति ।

इत्युच्चावचा हिंसाः । आभ्यो जनानां पालनं नास्ति साम्प्रतम् अपहृते स्वे, हते जने, विदितविषयाः पालकाः स्वोद्योगनियमानुरोधेन किमपि कुर्वन्ति । अस्मद्राज्ये कथमेवं दुष्कृतप्रवृत्तिरिति कस्य शोको भवति ? यथैतत् क्वापि पुनर्न प्रवर्तेत तथा किं कर्तव्यमिति चिन्ताकुलं कस्य मनो भवति ?बहुनाथा आत्मनाथा वा जनाः साम्प्रतं वस्तुतोऽनाथा इति सूक्ष्मतत्त्वदर्शने कः प्रभवति ?

इत्थं महद्भ्योऽपायेभ्यो रक्षणे दुर्लभे सति क्षुद्रोपद्रवैर्वयं तदा तदा

बाध्यामह इत्यत्र आक्रोशकरणं नूनं न युक्तम्। अथापि वर्तमानं सङ्कटम् अन्यापेक्षया वस्तुतोऽल्पमपि तदात्वे असह्यं भाति। परिहारचिन्ता च प्रवर्तते। अद्य अस्मद्दृष्ट्या दुष्करतमेषु कार्येषु प्रयाणमन्यतमम्। सर्वथा तत् परिहर्तव्यमिति दृढं सङ्कल्पयतामपि अवशात् कर्तव्यं भवति। एवं कतिपयेभ्यो दिनेभ्यः पूर्वं वृत्ते प्रयाणे 'अत्र नातीव जनसम्मर्दो भविष्यति' इति मत्वा परिगृहीते स्थाने उपविश्य नात्युपद्रुता एव बहु दूरमगच्छाम। प्रयाणस्य पादांशोऽवशिष्टः। तदा अन्विष्येव अल्पावकाशामपि तामेव पेटीं क्रमेण बहव आगत्य आरोढुमारभन्त। प्राय एकोऽपि आगत्य आरुह्य, लब्धे स्थाने तदुपरि, अलब्धे अधस्ताद्वा उपविश्य, तस्याप्यवकाशविरहे तिष्ठन् वाऽनन्तरक्षणे धूमवर्तिकामादाय अग्निशलाकां घृष्ट्वा दीपयित्वा घनदीर्घनिबिडां धूमच्छटां मोक्तुमारभत। वस्त्रोत्तरेण हस्तेन दृढपिहितमपि मुखनासिकं बलात् प्रविशतो धूमचक्रस्य गन्धमवशादाजिघ्रन्तः तेषां मिथः स्वैरालापान् उपशृण्वन्तश्च किञ्चिद् दूरमयाम। आकारतो भाषणतश्च ते सर्वे धूमशकटयन्त्रशालायां कचित् वैतनिकाः कर्मकरा इत्यभात्। दैवादस्मासु तेषां दृष्टिर्न निपतितेति यावदल्पः सन्तोषः अस्मद्धृदये पदं न्यधत्त तावदेव तेषु कश्चित् अस्मल्ललाटश्रीचूर्णपीतिमानमभिसमीक्ष्य 'अत्र अयं वर्णः, वर्णान्तरमप्यस्ति' इति किमपि प्रास्तौषीत्। झटिति अस्मत्पार्श्वोपविष्टोऽपरः द्विजचर्यावर्णनमुपक्रम्य प्रायेण एकनाडीकालं अविच्छिन्नं अवज्ञाग्राम्योक्तिनिर्भरं परिवादोपन्यासमकरोत्। सति काले शान्तेनैव मार्गेण तत्र समाधानं वक्तव्यमिति अस्माकं मतिरासीदेव। परं तु शकटादवरोहणस्य काल आगच्छत्। तूष्णीमुत्थाय सञ्चिकामादाय उभयतो निबिडं स्तब्धमुपविष्टानां जानुभिरस्मज्जानुनी संघृष्य कथमपि मार्गं कृत्वा तैः सानुकम्पं च सावज्ञं च सस्मितं चाभिवीक्षिताः अवरुह्य आगता अभवाम। एवंविधादवमाननात् कथमस्माकं रक्षणम्? कस्यात्र चिन्ता? अस्मद्देशे जाता अस्मदीया जनाः परस्परस्वरूपमजानन्तः भेदबुद्धिं कुर्वन्तः उत्तमं मनुष्यस्वभावं विहाय तिर्यक्प्राया भूत्वा परस्परं द्विषन्ति, स्पर्धन्ते, असूयन्ति, अवमन्यन्ते। समुचितविवेकजननेन अन्योन्यबहुमानार्हदशाविशेषसमुत्पादनमपि प्रजापरिपालनस्य मुख्यः कश्चन प्रकारः।

---

# संस्कृतग्रन्थजातम् ॥

—— :o: ——

5

## वैदिककाण्डः—ऋक्संहिता ।

### वरुणः

एवंरूपतया प्रतिपाद्यमानः कः पदार्थ इति विमृशन्तः निर्णयमत्र न लभन्ते। अत एवास्य देवस्य अतिचिरन्तनत्वमभ्यूह्यते। वृ धातोर्निष्पन्नत्वमस्य रूपस्य पश्यन्तः अस्मान् परिवृत्य स्थितं गगनमेव अनेन पदेनाभिप्रेतं केचिदिच्छन्ति । वस्तुतस्तु रात्रौ अदृश्यतया आवृतस्वरूपः सूर्य एव वरुण इत्युच्यत इति सायणस्याभिप्रायः तद्भाष्यपरिशीलनेनावगम्यते। इन्द्राद्यपेक्षया अल्पानि एतत्स्तुतिपराणि सूक्तानि । अथापि इन्द्रतुल्यं प्राधान्यमस्य आसीदित्यवगम्यते । इन्द्रो युद्धवीरः। वरुणो धर्मपरिपालकः। वरुणसूक्तेषु आत्मगुणाः भक्तिश्च सुष्ठु प्रकाशन्ते।

वरुणस्य महिमानं एवं ऋषयः प्रतिपादयन्ति । तस्यैव शासनेन द्यावापृथिव्यौ पृथक् विधृते भवतः । सूर्यस्य विस्तृतं पन्थानं स एव चकार । सदागतिर्वायुः तस्य श्वासरूपः। तस्यैव आदेशेन चन्द्रमा निशि दीप्यमानः सञ्चरति । अपराणि च ज्योतींषि नक्तं प्रकाशन्ते दिवा निलीयन्ते। सरितां प्रवृद्धिः तदधीना। तस्यैव सङ्कल्पवशेन सततवाहिन्योऽपि नद्यः सर्वाः समुद्रं नातिपूरयन्ति । स एव पर्जन्यं वर्षयति। भूमिं सिञ्चति। पर्वतान् मेघैश्छादयति— इति । एवं दिव्येन जलेन सम्बद्धो वरुणः क्वचित् क्वचित् समुद्रसम्बन्धमपि लभते।

तस्य सर्वज्ञत्वमसकृत् प्रशस्यते। अन्तरिक्षे पक्षिणां, समुद्रे नावां, सततगामिनो वातस्य च गतिं स वेद । रहस्यमपि त्रैकालिकं सर्वं वस्तु स पश्यति । मनुष्याणां सत्यासत्ये तस्य प्रत्यक्षे। तं विना यः कोऽपि जन्तुः निमेषणायापि नालम् । धर्मपरिपालने सर्वान् देवान् अतिशेते वरुण इत्युक्तम् । तच्छासनातिक्रम एव पापमित्युच्यते । तेन सः अतिमात्रं क्रुध्यति। तीव्रं दण्डं च पातयति। पापिनां बन्धाय पाशं स वहति। तथापि पश्चात्तापिनः क्षमते। न केवलमात्मकृतेभ्यो दुष्कृतेभ्यः अपि तु पूर्वपुरुषकृतेभ्योऽपि स पुरुषान् परिरक्षति। सततापराधकारिणोऽपि शरणागतान् न हिनस्ति। तथाऽबुद्धिपूर्वापराधकारिणः। प्रायेण नास्ति किञ्चित् वारुणं

सूक्तं यत्रापराधक्षमा न प्रार्थ्यते। यथा देवतान्तरेभ्य ऐहिकसम्पत्समृद्धिः, तथा अस्मात् नियमेन पापेभ्यो मुक्तिः प्रार्थ्यते। एवं प्रथमतः सर्वप्राधान्यभाजोऽपि वरुणस्य पश्चात् प्रजापतिप्रादुर्भावे सति क्रमेणाप्राधान्यमभूत्। तस्य सर्वाधिपत्यं नष्टम्। केवलं जलाधिपतिरवर्तत।

---

# वैदिकविशेषाः॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

---

## स्वदेवतैव पूजनीया।

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे पञ्चमप्रश्ने तुरीयानुवाके 'नागतश्रीर्महेन्द्रं यजेत' इत्यादिः 'पापीयान् भवति' इत्यन्तो वेदस्य भागः अप्राप्तश्रियामिन्द्रो देवता, प्राप्तश्रियां तु महेन्द्रः इति सान्नाय्यस्य देवताव्यवस्थां विधत्ते। तदित्थम्— अप्राप्तश्रीर्महेन्द्रं न यजेत। शुश्रुवान्वेदत्रयाभिज्ञः। वेदत्रयस्य च श्रीरूपत्वात्तदभिज्ञः प्राप्तश्रीर्भवति। श्रीरूपत्वं चैवमाम्नायते 'अहेबुध्नियमन्त्रं मे गोपाय। यमृषयस्त्रयिविदा विदुः। ऋचःसामानि यजूꣳषि। सा हि श्रीरमृता सताम्' इति। धनवत्त्वेन ग्रामाध्यक्षः राजपुत्रश्च प्राप्तश्रीकौ। तेषामेव त्रयाणां महेन्द्रो देवता। एवं सति यः पुरुषः स्वकीयां देवतामतिक्रम्य यजति, एतेषु कश्चिदिन्द्रं यजति, एतेभ्योऽन्यो वा महेन्द्रं यजति, तादृशः स्वकीयदेवतायाः प्रच्यवते परकीयदेवतां न प्राप्नोति च, तत्तद्देवताशापेन पापीयान् भवति इति। कवितार्किककेसरिणा श्रीमद्वेङ्कटनाथेन विरचिते महाकाव्ये यादवाभ्युदये षष्ठे सर्गे 'यो वै स्वाम्' इत्याद्यां 'पापीयान् भवति' इत्यन्ताम् इमां श्रुतिं शब्दतोऽर्थतश्चानुसृत्य प्रणीतं

'अतियजेत निजां यदि देवतामुभयतश्च्यवते जुषतेऽप्यघम्।
क्षितिभृतैव सदेवतका वयं वनवताऽनवता किमहिद्रुहा॥'

इति पद्यं दृश्यते। अप्पय्यदीक्षितकृतयादवाभ्युदयव्याख्यानकुवलयानन्दयोरेतत् सम्यग्व्याख्यायत च।

---

## मनसा प्रजापतेर्होमः। 63

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे पञ्चमप्रश्ने एकादशानुवाके 'वाक्च मनश्चार्तीयेताम्' इत्यादीनि 'प्रजापतेराप्त्यै' इत्यन्तानि वाक्यानि 'मनसाऽऽघारयति' इति यद्विहितं तदेव पुनः प्रशंसन्ति। तदेवम्। वाक्च मनश्च देवेभ्यो हव्यवहनरूपमतिशयमैच्छताम्। वाक्–'अहं देवेभ्यो हव्यं वहामि' इत्यब्रवीत्। मनः 'अहं देवेभ्यो हव्यं वहामि' इत्यगदत्। एते हविर्वहननिर्णयाय प्रश्नं कर्तुं प्रजापतिं प्राप्नुताम्। स प्रजापतिर्वाचमाचष्ट–'हे वाक्, त्वं मनसो दूत्येवासि, न तु स्वतन्त्रा। यस्माल्लोके पुरुषो यत्पूर्वं मनसा ध्यायति तत्पश्चाद्वाचा वदति' इति। तदनु क्रुद्धा वागभणति स्म 'हे प्रजापते, यद्यहं दूती तर्हि तुभ्यं कोऽपि वाचा मा जुहोतु' इति। तस्माद्यजमानाः आघारं प्रजापतये मनसा जुह्वति। यथा मनः सङ्कल्पेन कार्यं साधयति, तथा प्रजापतिरपि। अतः प्रजापतेः मनःसादृश्यात् मनसा होमः प्रजापतेराप्त्यै भवति।

---

## मनुना दायस्य विभागः।

तैत्तिरीययजुस्संहितातृतीयकाण्डे प्रथमप्रश्ने नवमानुवाके 'मनुः पुत्रेभ्यो दायं व्यभजत्' इत्यादीनि 'ततो वै तस्य रुद्रः पशून्नाभ्यमन्यत' इत्यन्तानि वाक्यानि मन्थिसँस्रावहोमं विधातुं पीठिकामारचयन्ति। सा चैवम्—मनोः प्रजापतेः बहवः पुत्रा बभूवुः। तेषु कनिष्ठो नाभानेदिष्ठनामको बालो वेदमध्यैत। तदानीं स मनुः प्रबुद्धेभ्यः सुतेभ्यः स्वकीयं धनं विभज्याददात्। वेदाध्ययनपरं तं भागरहितमकरोत्। अधीतवेदस्स आगच्छत्। स पितरमब्रवीत् 'केन हेतुना मां निर्भागमकलयः' इति। स तातः त्वां निर्भागं न व्यदधामित्यभणत्। स एवमुक्त्वा इत्थं तनयमाचष्ट अङ्गिरोनामका इमे महर्षयः सत्त्रयागमनुतिष्ठन्ति। ते तु स्वर्गप्राप्तिसाधनानां नाभानेदिष्ठनामकशस्त्रादीनामपरिज्ञानात् सुवर्गं लोकं न प्रजानन्ति। अतस्तेभ्यः त्वयाऽधीतं शस्त्रादिप्रतिपादकं ब्राह्मणं ब्रूहि। ततस्ते ब्राह्मणोक्तार्थानुष्ठानेन स्वर्गं गच्छन्तो य एषां तदात्वे यागोपयुक्तेभ्योऽवशिष्टाः सहस्रसङ्ख्याः पशवस्ताँस्ते सत्रान्ते विश्राणयिष्यन्ति। स ते भागप्राप्तेरुपाय इति। जनकेनैवमभिहितस्स सूनुस्तद्ब्राह्मणं तेभ्योऽवदत्।

ते नाकं यन्तो य एषां पशव आसन्तानमौ प्रत्यपादयन्। अङ्गिरोभि-र्दत्तान् पशून् स्वगृहं नेतु तदीयायां यज्ञभुवि क्रतुशेषैः पशुभिस्सञ्चरन्तं नाभानेदिष्ठं रुद्र आससाद। स रुद्रोऽगदत इमे पशवो ममैवेति। ततः स नाभानेदिष्ठोमह्यमङ्गिरस इमान् पशून् व्यतरन्नित्यभाषत। तदनु रुद्रो यागशेषस्य द्रव्यस्याङ्गिरसो न स्वामिनः। तैर्दत्तं पशुद्रव्य-मस्वामिदत्तत्वात्तव न योग्यम्। यद्द्रव्यमध्वरभूमौ सवसमाप्तेरूर्ध्वमव-शिष्यते तत्सर्वं ममैव स्वम्। तस्मात् ममानुज्ञामन्तरेण मख़तन्तुस्थलं केनापि न प्रवेष्टव्यम्। यदि तव शिष्टपश्वपेक्षास्ति तर्हि मां मखे भागिनं वितनु। यदि तथा क्रियते तुभ्यं दत्तानेतान् पशून् न मारयिष्यामि। मदीयानामेतं लाभं सोढाऽस्मीत्यवोचत। ततो नाभानेदिष्ठस्तस्मै रुद्राय एतं मन्थिनस्सँस्रावमजुहोत् – मन्थिग्रहं हुत्वा तत्पात्रस्थं द्रव्यशेषं परिधेर्बहिः स्थापितेऽङ्गारे अहौषीत्। ततस्तुष्टो रुद्रस्तस्य नाभानेदिष्ठस्य पशून् नैव व्यनाशयत् इति। श्रुतिः पीठिकाम् (आख्यानम्) इत्थं परिसमाप्य 'यत्रैतमेवं विद्वान् मन्थिनस्सँस्रावं जुहोति न तत्र रुद्रः पशूनभिमन्यते' इति वाक्येन मन्थिसँस्रावहोमं व्यधत्त।

मनुः कनिष्ठपुत्रस्य नाभानेदिष्ठस्य ज्ञानं सम्पादयन् तस्य धनार्जन-योग्यताऽस्तीति मत्वा तदितरपुत्रेभ्यो दायं व्यभजत् तस्मै तं नाददात्। यदिदानीं लोके क्वचित्पितरो बहुषु पुत्रेषु सत्सु कस्यचित् तनयस्य धना-र्जनयोग्यज्ञानं जनयन्तस्तस्मै दायमप्रयच्छन्तस्सुतान्तरेभ्य एव तं वितर-न्तश्च दृश्यन्ते तत्रेदं मनोरनुष्ठानं मूलं स्यात्।

---

शेक्स्पिअर्-कृतं

# यथाभिमतम्॥ III.2

आर्लण्डो– स्त्रियः प्रति तेनोक्तेषु प्रधानदोषेषु, अपि नाम यं कञ्चन स्मरसि?

रोसलिन्द्– न तत्र प्रधानदोषाः केचन। सर्वे ते मिथः समानाः यथा अर्धाणकखण्डाः। एकैको दोषः दुःसहोऽभूत् यावत् तत्तुल्यः अपरः प्रादुरभूत्।

आर्लण्डो– प्रार्थये, तेषु कांश्चिदुदाहर्तुमर्हति अत्र भवान्।

रोसलिन्द्—न । नाहं आर्तव्यतिरिक्तेषु मदीयमौषधं व्ययीकरिष्यामि । अस्ति कश्चिन्मनुष्यः अस्मिन् वने पर्यटन् यः वृक्षकाणां त्वक्षु 'रोसलिन्द्' इति लिखन् तान् कदर्थयति । केषुचित् गुल्मेषु गीत-पद्यानि लम्बयति, अपरेषु विरहगाथाः । सर्वमिदं, वस्तुतः रोसलिन्द्-अभिधायाः कस्याश्चित् उपश्लोकनपरम् । कल्पनाकुतूहलिना अनेन चेत् समागमो भवेत्, तस्मै कञ्चिदुपदेशं कुर्याम्, यतः स कामज्वरेण पीड्यमान इव दृश्यते ।

आर्लेण्डो—अहमेव सः तथा कामेन आकुलीक्रियमाणः ।

रोसलिन्द्—अस्मन्मातुलोक्तेषु लक्षणेषु न किञ्चित् त्वय्यस्ति । कामपीडितस्य लक्षणं स मे उपदिष्टवान् । नूनं तस्मिन् कारागृहे न त्वं बन्दीकृतः ।

आर्लेण्डो—कानि तदुक्तानि लक्षणानि ?

रोसलिन्द्—कृशः कपोलः, यस्ते नास्ति । नीलं मग्नं चक्षुः यत् ते नास्ति । सम्भाषणवैमुख्यं, यत् ते नास्ति । उपेक्षितं श्मश्रु, यत् ते नास्ति परं तु अस्मिन् विषये त्वामहं क्षमे, यतः यः कनीयान् भ्राता तस्य इदमेव (श्मश्रुधारणमेव) स्वम्—अथ ते जङ्घावेष्टनेन अनिबिडितेन भाव्यम्, शिरस्त्रेण असंश्लिष्टेन हस्तकञ्चुकेन असंहितान्तेन पदत्रेण अग्रथितेन । त्वत्सम्बन्धिभिः सर्वैर्वस्तुभिः अनादरस्य अत्यन्तोपेक्षायाश्च प्रकाशकैर्भाव्यम् । त्वं तु नेदृशः पुरुषः । प्रत्युत वसनादिषु प्रत्यंशमत्यन्तावहितः यथा आत्मानं कामयमानो भासि, न त्वन्यां काञ्चित् ।

आर्लेण्डो—सौम्य, अस्ति मे कामः अहं कामय इति तव प्रत्ययमुत्पादयितुम् ।

रोसलिन्द्—मम प्रत्ययं जनयितुम् । तस्याः प्रत्ययं त्वरया जनयितुमर्हसि, यां त्वं कामयसे । सा तत्र नूनं प्रत्ययं करिष्यति यद्यपि आत्मनः कामयमानतां नाभ्युपगमिष्यति । अयमेको विषयः यत्र स्त्रियः आत्मानं वञ्चयन्ति । अथ तु परमार्थतः किं त्वं सः यः वृक्षेषु पद्यानि लिखति, येषु रोसलिन्द् स्तूयते ?

आर्लेण्डो—रोसलिन्द्-अस्याः पाण्डरेण करेण अहं ते शपे, साक्षात् सोऽहम्, स मन्दभाग्योऽहम् ।

रोसलिन्द्—अथ किं त्वं तथा तीव्रकामोऽसि यथेमे तव शब्दाः प्रकाशयन्ति ।

आर्लेण्डो – न शब्दैः नवाऽनुमानं प्रकाशयितुमलं यावदहं कामये।

रोसलिन्द् – कामो नाम केवलमुन्मादः। सः सत्यं अन्धकारावृतं गृहं कशाघातं च तथैवार्हेति यथा उन्मत्ता मनुष्याः। परं तु यत् ते तथा न दण्ड्यन्ते चिकित्स्यन्ते च तत्र इदं कारणं यत् स उन्मादः तथा साधारणः यथा दण्डयितारोऽपि तद्वन्तः (तेऽपि कामुकाः) तथापि, दृढं ब्रवीमि, उपदेशेन तमहं चिकित्सिष्यामि।

आर्लेण्डो – कच्चिद् भवान् तथा कञ्चन कदाचित् चिकित्सितवान् भवति?

रोसलिन्द् – आम्, एकम्, अनेन च प्रकारेण। स मयि तत्कान्तामतिं कृतवानासीत्। प्रत्यहं ममानुवर्तनं कार्यमित्यचोदयम्। तदाऽहं चन्द्रसङ्काशो युवा भवन् विषीदेयम्, स्त्रीस्वभावः विभिन्नावस्थः अभिकांक्षन् अनुरज्यन् भवेयम्; दृप्तः, मनोराज्यकारी, दाम्भिकः, शून्यः, अस्थिरः, भूयिष्ठबाष्पः, भूयिष्ठहासः, या या चित्तवृत्तिः तस्यास्तस्याः किञ्चिद् भवन् वस्तुतस्तु यस्याः कस्याश्चिदपि चित्तवृत्तेः किमपि न भवन् यथा प्रायो लोके बालाः स्त्रियश्च एवंविधा एव प्राणिनः; अद्य तमनुरज्येयम्; अथ अपरज्येयम्; अथ तमाराधयेयम्, अथ परित्यजेयम्; अद्य तस्य कृते रुद्याम्, अथ तमभिनिष्ठीवेयम्; एवं मम कामुकं तं कामरूपादुन्मादात् साक्षादुन्मादं प्रत्येव पर्यावर्तयम्, यदेतत् लोकवृत्तिप्रवाहं कृत्स्नं परित्यज्य क्वापि कोणे सन्यासिरूपेण वासे पर्यवस्यति स्म। इत्थमहं तस्य चिकित्सामकरवम्। तामेव पद्धतिमहमादास्ये तवाङ्गं क्षालयित्वा यथा अजस्य हृदयं तथा विमलं कर्तुं येन तत्र कामस्य बिन्दुमात्रमपि नावशिष्येत*।

आर्लेण्डो – सौम्य, नाहं चिकित्सितो भविष्यामि।

---

* अस्य रोसलिन्द्-भाषितस्य भावो दुर्ग्रहः। किं यः कोऽपि पाश्चात्यः इहत्यो वा आङ्गलसाहित्याभिज्ञः इमं यथावद् गृहीतवानिति अस्ति नो महान् संशयः। रोसलिन्द् स्वयं कृतत्वेन यद्विस्तरेणाह तत्सर्वम् उन्मत्तचेष्टितमेव। तस्मात् 'तव कामोन्मादं मदीयेन वास्तवोन्मादवृत्तान्ताभिनयाभ्यासेन शमयिष्यामि' इति रोसलिन्द् वक्तुमिच्छतीति भाति।' 'unfortunately in this case the cure resulted in a real sort of madness' इति लिखन्तः पाश्चात्या न गृहीतकवितातात्पर्या इति प्रतीमः।

रोसलिन्द्—अहं त्वां चिकित्सेयम्, यदि त्वं मां 'रोसलिन्द्' इत्याह्वास्यसि, प्रतिदिनं मद्गोष्ठमागत्य मामनुवर्तिष्यसे च ।

आर्लण्डो—मम कान्तया शपथं करोमि, अहमागमिष्यामि । ब्रूहि कुत्र तद्वर्तते ।

रोसलिन्द्—मया सह आगच्छ । तत् तेऽहं दर्शयिष्यामि । इदं च मे ब्रूहि अस्मिन् वने कुत्र त्वं वससीति । कच्चिदागमिष्यसि ?

आर्लण्डो—परिपूर्णेन हृदयेन, सौम्य ।

रोसलिन्द्—न । रोसलिन्द् इति त्वयाऽहमाह्वातव्या ।

---

# राज्यनिर्वहणम् ॥

(पण्डित V. अनन्ताचार्यः)

अस्मिन् विषये बहुधा विप्रतिपत्तिः अतृप्तिश्च सकलजनमनांसि अत्यन्तमाकुलयति । अस्या दुस्थितेः परमं निदानं तावत् एकमेव । सुपरिहरं च तत् । तत् किमिति चेत् अस्मदीयाः सर्वेऽपि राज्यकार्यनिर्वहणाधिकृताः भारतीया अपि स्वयं सर्वात्मना पाश्चात्यरीतिभिः अवकुण्ठिता दरीदृश्यन्ते । पूर्वमेतदुचितमासीत् यत् पाश्चात्याः पाश्चात्यां रीतिमवलम्ब्य कार्याणि निरवहन् इति । अधुना तु भारतीयाः अन्यदीयां रीतिमवलम्बन्त इतीदम् अतिमहद्विपरीतम्, अत्यन्तमनुचितं च । परन्त्वेते तपस्विनः न मात्रयापि अस्मत्पूर्वमहत्तरैः प्रहतां कार्यनिर्वाहपद्धतिं जानन्ति । दुःस्थितिधोरणीयमनुदिनमभिवर्धत इति दृष्ट्वा निकामं निर्विण्णा भवन्ति मनीषिणः । इदमिदानीं प्रेक्षावतामवश्यकर्तव्यमापतति यदतिचिरन्तनस्मृत्युक्तप्रकारेण कार्यनिर्वाहरीतिप्रकाशनम्, नवीनरीतिषु उपलभ्यमानानां दोषाणां प्रशमनबोधनं चेति । इत्थं "विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि" इत्युक्तरीत्या लोकक्षेमकरणं प्राचीनभारतीयविद्यानिपुणेष्वेवायतत इति सर्वे जानन्तु ।

---

# प्रकृतिभेदः ॥

I

पिता—जात, कुत्राम्बा ? किं नु बहिर्वेद्यामेव उपविष्टो वर्तसे ?

पुत्रः—नाहं जाने तात, कुत्र सा गतेति । नदीत आगत्य पश्यामि कवाटं योक्त्रितमस्ति । आगमिष्यति आगमिष्यतीति प्रतिपालयन् वर्ते ।

पिता—अस्वस्थो हि शिशुः । तं भिषजे अनन्तकृष्णाय दर्शयितुं अनन्तरवीथ्यां तस्य गृहं गता स्यात् । इदानीमेव आगच्छेत् । आस्स्व ।

पुत्रः—तथा चेदहं गत्वा आह्वयामि ।

पिता— मा मा । सा स्वयमागच्छेत् । अविलम्बमागच्छेत् । क्षणं प्रतीक्षस्व ।

पुत्रः—न तात । न मे श्रमः । गत्वा आह्वयामि । कियच्चिरं भवान् बहिः स्थास्यति ।

(भिषजो गृहं गत्वा मातरं दृष्ट्वा)

अम्ब, अम्ब, तात आगतो बहिर्वर्तते । कवाटं योक्त्रयित्वा आगताऽसि.... ....

माता—आम्, तात । योक्त्रयित्वा आगताऽस्मि । न कश्चित् तत्र गृहावेक्षणायावतिष्ठ । त्वरया निवर्त्स्यामीत्यागताऽस्मि । वैद्यगृहे एवं विलम्बोऽजनि । किं कुर्याम् ? किं गृहमागतस्य पितुश्चिरमासीत् । त्वं वेगेन धाव । ब्रूहि प्रत्यागच्छन्ती वर्त इति । इयं कुञ्चिका । गृहीत्वा धाव । कथं वत बहिरेव इयच्चिरं तिष्ठेत् । इयत् शीघ्रं प्रत्यागमिष्यतीति विदितं चेत् नैव गृहात्प्रस्थिता स्याम् । धाव धाव ।

II

पिता—याहि रे । कियच्चिरं वदामि याहि याहीति । न गमिष्यामीति वर्तसे ।

पुत्रः—का नु तात ते त्वरा ? अस्यां बहिर्वेद्यामेव उपविष्ट आस्स्व । पादो मे रुजति । तदजानन् त्वं पुनः पुनर्वदसि । स्वयमम्बा आगमिष्यति ।

पिता—न तथा अरे । सा क्वचित् वृथा सञ्जल्पन्ती वर्तेत । सम्भाषणाय काचित् लब्धा चेदलं तस्याः । कालं गच्छन्तं नैव जानीयात् । गच्छ तात गच्छ ।

पुत्रः—अपेहि तात । तव कार्यान्तरं नास्ति । अत्र गच्छ तत्र गच्छ इति सर्वदा उपद्रवन्नेव आस्से । उं । (मन्दं गत्वा वीथ्यन्तरगृहे मातरमवेक्ष्य)

अम्ब, अम्ब ;.... अम्ब अम्ब ।

माता—अये शने, सम्भाषणे वर्तमाने कतिकृत्व आह्वयसि । का ते पीडा अजनि ? आस्स्व तूष्णीम् । अन्यथा प्रहरेयम् । (अन्यां प्रति) ततः परं....

पुत्रः—उं प्रहरिष्यसि । तात आगत्य द्वारे तिष्ठति । त्वमिह वृथा जल्पान् कुर्वती वर्तस्व ।

माता—महान् मे कोपो भविष्यति यद्येवमुपरोधं करिष्यसि । (अन्यां प्रति) शृणु मामि । ततः परं ....

पुत्रः—उं कोपो भविष्यति । तात आगत्य द्वारे तिष्ठतीति वदामि । तत् कर्णे अकृत्वा मां निन्दसि ।

माता—तात आगतश्चेत् आगत्य तिष्ठतु । किं हीनं भवति ? किं आतपे तिष्ठति किं वर्षे तिष्ठति ? तव तातश्च त्वं च । अपेहि अल्पायुः ।

---

१२२ 990

श्रीः

# उद्यानपत्रिका ॥

चतुर्विंशवर्ष-

# विषयसूची ॥

## UDYANA PATRIKA

## [XXIV Year] CONTENTS


1 मेनका । 1, 31, 59, 85, 103

2 व्याजोक्तिरत्नावली । Y. Mahalinga Sastri, M.A. B. L.] [5, 35, 63, 89, 107

3 वेदः । 9

4 संस्कृताभिवृद्धिः । (V. Ananthachariar) 10

5 संस्कृतग्रन्थजातम् । 11, 42, 69, 95, 113

6 अजामिळोपाख्यानम् । (Vidyalankara V. R. S. Tatacharya Siromani) 15

7 रोदसीव्याप्तकीर्तिः । [T. Ramachandra Sastri Siromani] 20

8 शिरियतिरुमडल् विवरणसमेतः । [T. E. Viraraghavacharya Siromani] 21, 51, 81

9 यथाभिमतम् । 25, 55, 77, 100, 116

10 काव्यपुरुषोत्पत्तिः । [Pandit K. S. Ramaswami Sastri, Baroda] 20

11 लोकवार्ता । 29

12 प्रकृतिभेदः । 29, 57, 79, 101, 120

13 पुस्तकपरामर्शः । 30, 58, 80

14 विद्वत्सु विज्ञापनम् । 39

15 गजेन्द्रमोक्षः । [Vidyalankara V. R. S. Tatacharya Siromani] 46

16 सौराज्यम् । 67

17 श्रीरामपादुके । [Vidyalankara V. R. S. Tatacharya Siromani] 73

18 अमात्यसम्पत् । 93

19 विश्वरूपवृत्रवधः । [Vidyalankara V.R.S. Tatacharya Siromani] 96

20 प्रजापालनम् । 111

21 वैदिकविशेषाः । [V. R. S. Tatacharya Siromani] 114

22 राज्यनिर्वहणम् । [Pandit V. Ananthacharya] 119

शास्त्रानुबन्धः । कुवलयानन्दः बुधरञ्जनीसमेतः । [333-364]